॥अथशांतिरत्नाकरग्रंथप्रारंभः॥पत्रें ३५६॥

शां.र०
१

॥ श्रीगणेशायनमः॥ ॥अथशांतिरत्नाकरलिख्यते॥ नारायणात्मजश्रीमद्रा
मकृष्णस्यसूनुना॥ कमलाकरसंज्ञेनप्रोच्यंतेशांतयःक्रमात्॥१॥ तत्र॥ एवंविनायकं
पूज्यग्रहांश्चैवविधानतः॥ कर्मणांफलमाप्नोतिश्रियंचाप्नोत्यनुत्तमामितियाज्ञव
ल्क्येनसर्वकर्मांगत्वोक्तेः॥ विनायकशांतिरुच्यते॥ तत्राधिकारिणमाहयाज्ञवल्क्यः॥
विनायकःकर्मविघ्नसिध्यर्थंविनियोजितः॥ गणानामाधिपत्येचरुद्रेणब्रह्मणात
था॥ तेनोपसृष्टोयस्तस्यलक्षणानिनिबोधत॥ स्वप्नेवगाहतेत्यर्थंजलंमुंडांश्चप
श्यति॥ काषायवाससश्चैव॥ क्रव्यादांश्चाधिरोहति॥ अंत्यजैर्गर्दभैरुष्ट्रैःसहैक
त्रावतिष्ठति॥ व्रजन्नपितथात्मानंमन्यतेनुगतंपरैः॥ भविष्योपि॥ तेवाङ्गंगात्रंवि
धुरकरवीरविभूषितं॥ एवंस्वप्नानुक्त्वाप्रत्यक्षदर्शनान्याहयाज्ञवल्क्यः॥ विम १

नाविफलारंभःसंसीदत्यनिमित्ततः॥ तेनोपसृष्टोलभतेनराज्यंराजनंदनः॥
कुमारीनचभर्त्तारमपत्यंगर्भमंगना॥ अंगनागर्भंनलभतेगर्भिणीचापत्यं
नलभतेनजीवतीत्यर्थः॥ आचार्यत्वंश्रोत्रियश्चनशिष्योध्ययनंतथा॥ वणिग्ला
भंनचाप्नोतिकृषिंचापिकृषीवलः॥ स्नपनंतस्यकर्त्तव्यंपुण्येह्निविधिपूर्वकं॥
तस्योपसृष्टएवाधिकारी॥ सचशूद्रोपीतितस्याप्यधिकारः॥ ब्राह्मणैःक्षत्रियैर्वै
श्यैःशूद्रैश्चसिद्धिकामुकैः॥ कर्मनिर्विघ्नसिध्यर्थंसंपूज्यस्तुगजाननइतिलैंगात्
॥ अतएवमहार्णवेयजमानस्तुशूद्रश्चेद्द्विजैस्तान्नियोजयेदित्युक्तं॥ एवंस्त्री
णामप्यधिकारः॥ अतएववृहत्पराशरेण॥ तेनोपहतपुंसांतुकर्मस्यान्निःफ
लंकृतं॥ स्त्री— मपितथासर्वंक्रियमाणंतुनिःफलमित्युपसृष्टत्वंस्त्रीणाम

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ग्रां०२० २

धिकारार्थमुक्तं:॥ अत्रापिकुमारीनचभर्त्तारमित्यादि॥ अत्रपुण्येक्षीत्युक्तेपिहस्त॰
पुष्याश्वयुक्सौम्यवैष्णवान्यतमेशुभे॥ नक्षत्रेचमुहूर्त्तेच मैत्रेवाब्रह्मदैवतेइति
॥ विष्णुधर्मे विनायकस्नानेतौविशिष्योक्तानिनक्षत्राणिशुक्लपक्षेचतुर्थ्यांचवारे
चधिषणस्यच॥ तिष्येचवीरनक्षत्रेतस्यैवपुरतोनृपेति भविष्यपुराणोक्ताश्चाय
विशेषाश्चज्ञेयाः॥ विवाहादिकर्माणमुपसर्गनाशार्थंचयत्रकाश्चिदृवनक्षत्रेकत्ति
कादिविनाशवांतेयपुण्यंनक्षत्रामितिकल्पसूत्रेकार्यंपुण्याह एवकुरुतेइत्युक्तेः॥ वक्र
स्यराज्ञारोपि॥ चतुर्थ्यांशुक्लपक्षेचअयनेचोत्तरायणे॥ पुण्यार्थंसर्वसिध्यर्थंकु
र्याच्छांतिविनायकौ॥ वरुभावस्त्वांदसः॥ याज्ञवल्क्यः॥ गौरसर्षपकल्केनसाज्य
नोत्सादितस्यच॥ सर्वौषधैःसर्वगंधैर्विलिप्तशिरसस्तथा॥ भद्रासनोपविष्ट

२

स्यस्वस्तिवाच्याद्विजाशुभाः॥ उत्सादितस्यउद्वर्त्तितस्यसर्वौषधानिच॥ मुरामां॰
सीवचाकुष्टंशैलेयंरजनीद्वयं॥ सटीचंपकमुस्ताचसर्वौषधिगणःस्मृतइतिम
हार्णवात्क्तानि॥ कुष्टमांसीहरिद्रेद्वेमुराशैलेयचंदनं॥ वचाचंपकमुस्ताचसर्वौष
ध्योदशस्मृताइतिछंदोगपरिशिष्टे॥ मुरामहाराष्ट्राणांमोहरीइतिप्रसिद्धा॥ शै
लयंशिलाजं॥ सर्वगंधमितिप्रोक्तसमस्तसुरवर्त्तनं॥ मिति॥ मदनरत्नेतुचंदनं
कुंकुमागरुकर्पूरकमल्लिकाजातीफलानिसर्वगंधाउक्ताः॥ तत्रमूलंचिंत्यं॥ अ
श्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्धतात्॥ मृत्तिकारोचनांगंधान्गुग्गुलुंवा
प्सुनिक्षिपेत॥ तामाहृत्ताह्येकवर्णैश्चतुर्भिःकलशैर्हृदात्॥ गंधान्सर्वगंधान्
॥ अत्रविशेषमाहपराशरेवैजवापः॥ चतुःप्रस्रवणेभ्यश्चतुरःकुंभानाहृत्य

Dr. BHAU DAJI

शां०र० ३ तेषुसर्वौषधीः सर्वगंधान्हिरण्यव्रीहियवौ॥ गुग्गुलंमदमाख्यातकर — मिति॥ द्वि
पदितिशेषः॥ किंच॥ चर्मण्यानडुहेरक्तेस्थाप्यंभद्रासनंततः इदंचपूर्वेस्थाप्यं॥ पूर्व
विनियोगोक्तेः॥ तत्रैकहस्ताद्विहस्तावाचतुरंगुलोच्चावेदीकार्येतिकेचित्॥ तच्चिंत्यं
॥वेद्यांमानाभावात्॥ करणेपिहस्तोयुक्ता॥ यत्रहोमोत्तरमभिषेकस्तत्रोत्तरतः पू
र्वतोवाकार्यंप्राच्युदंचवाकर्माणीतिकात्यायनोक्तेः॥ तेनोत्तरतः स्नानपीठंतद्दक्षि
णेहोमश्चमूर — णांहेय॥ दक्षिणसंस्थतपत्तेः॥ सहस्राक्षंशतधारमृषिभिः पाव
नंकृतंतेनत्वामभिषिंचामिपावमान्यः पुनंतुते॥ भगंतेवरुणोराजाभगंसूर्यो ३
बृहस्पतिः॥ भगमिंद्रश्चवायुश्चभगंसप्तर्षयोविदुः — — यत्तेकेशेषुदौर्भाग्यं
सीमंतेयच्चमूर्धनि॥ ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुसर्वदा॥ एकैकोमंत्रःकुं

भत्रये॥ त्रिभिश्चतुर्थकुंभः सर्वैर्मंत्रैश्चतुर्थमितिचोलेद्दशानादितिविज्ञानेश्वरः॥ त्रि
भिरेकैककुंभः सप्तपरार्कः॥ स्नातस्यसार्षपंतैलंकृत्वणोडुंबरेणतु॥ जुहुयान्मूर्ध
निकुशान्सव्येनपरिगृह्यचामितम्मसंमितश्चैवतथाशालकटंकटौ॥ कूष्मांडोरा
जपुत्रश्चेत्यंतेस्वाहासमन्वितैः॥ नामभिर्बलिमंत्रैश्चनमस्कारसमन्वितैः॥ यज
मानमस्तकेमितादिनामभिस्तैलंहुत्वा॥ तैरेवचरुवक्ष्यमाणहुत्वातच्छेषेणेंद्रादिदशदि
क्पतेभ्योनामभिर्बलिंदद्यादितिविज्ञानेश्वरः महार्णवे॥ पूर्वोक्तनामभिस्तैलं
हुत्वातैरेवकृताकृतादिबलिदानं॥ नतुचरुहोमइत्यपरार्कः॥ बृहत्पराशरोपिना
मभिश्चबलिंदद्यान्नमस्कारसमन्वितैरितिमित्रादिनामभिर्बलिमाह॥ दद्याच्च
तुष्पथेसूर्पेकुशानास्तीर्यसर्वतः॥ कृताकृतांस्तंडुलांश्चपललौदनमेवच॥ म

गं०र० स्यान्यकांस्तथैवामान्माससमेतावदेवतु॥ कृताकृताअवहृताः अनहृताश्च॥ पललं
५ तिलपिष्टं॥ मांसमित्यन्ये॥ तन्मिश्र ओदनः॥ एतावत्पक्वमांसं च॥ पुष्पं चित्रं सुगंधं
च सुरां च त्रिविधामपि॥ त्रिविधा गौडी पैष्टी च माध्वी च॥ एतच्छूद्रपरं तत्र वैश्यायां
पैष्टी विप्रेण तु सर्वापि वर्ज्येति महार्णवः॥ तत्र मानाभावात्॥ चतुर्वर्ण्याधिकारात्र
॥ न च नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्विजातिभिरिति निषेधः॥ तस्य सौत्रामण्य
पि सुराग्रहणस्य च संग्रह इत्यनेकोपत्यं हारीत॥ हेमाद्रिस्तु निषेधस्य निवृत्तिमा
त्रार्थत्वेन विशेषानपेक्षणान्नोपसंहारः॥ विशेषनिषेधेण दोषाधिक्यार्थ इत्या ५
ह॥ अतः स्तद्भावेऽस्मिन्रुद्रजेऽश्वपयो ग्राह्यं॥ सौत्रामण्यां पयोग्रहावासुरिवया
त्तिआपस्तंबेन विकल्पाभावसंधानात्॥ तच्च सैंधवमिश्रमिति महार्णवादयः

शिष्टाः॥ मूलकं पूरिकापूपांस्तथैवांडेरकस्रजः॥ दध्यन्नं पायसं चैव गुडपिंडं समोद
कं॥ मूलकं प्रसिद्धमिति महार्णवे मदनरत्ने च गुडमिश्रं मिष्टमित्यर्थः॥ मोदकाः
पैष्टा इत्यपरार्कलड्डुकाः इति मदनरत्ने॥ वृहत्पराशरेण कुष्माण्डाः फलानि धव
का मुक्तानि बलिमंत्राः प्रयोगे च वक्ष्यंते॥ एतान्सर्वाननुपाहृत्य भूमौ कृत्वा ततः
शिरः॥ स्पृष्ट्वा निधाय निवेद्येत्यर्थः॥ विनायकस्य जननीमुपतिष्ठेत्ततोंबिकां॥ दूर्वा
सर्षपपुष्पाणां दत्वार्घ्यं पूर्णमंजलिं॥ दूर्वापूर्णमंजलिं विनायकायांबिकायै चार्घ्यं
दत्वोपतिष्ठेतेत्यर्थः॥ रूपं देहि यशो देहि भगं भवति देहि मे॥ पुत्रान्देहि धनं देहि
सर्वकामांश्च देहि मे॥ विनायकोपस्थाने भगवच्चित्य हः इति विज्ञानेश्वरः॥ सतस
मानविधानत्वात्सहत्ति विकाराभावेन कथं स्यादिति चिंत्यं॥ अत एवांबिकामित्यु

ग्रा० र० ५

कं॥ततःशुक्लांबरधरःशुक्लांबरधरःशुक्लमाल्यानुलेपनः॥ब्राह्मणान्भोजयेत्पश्चा
द्द्याद्वस्त्रंगुरोरपि॥एवंविनायकंपूज्यग्रहांश्चैवविधानतः॥कर्मणांफलमाप्नो
तिश्रियंचाप्नोत्यनुत्तमां॥यजमानाभिषेकंचवस्त्रंचाचार्यायदद्यात्॥आत्मनोवा
सआचार्यायददाति॥आत्मनोवासआचार्यायददातीतिमदनरत्नेवैजवापोक्तेः
॥अथबौधायनसूत्रेविशेषः॥अथातोविनायककल्पंव्याख्यास्यामोमासिमासि
चतुर्थ्यांशुक्लपक्षस्यपंचम्यांवाऽभ्युदयादौसिद्धिकामःपशुकामोवाविनायकस्य
बलिंहरेत्पूर्वेद्युःकृतैकभक्तोऽथआचम्यदेवयजनोल्लेखनाद्याग्निमुखांकृत्वाद ५
क्षिणामुखोऽयहस्तिमुखंदैवतमावाहयतिविघ्नंविघ्नेश्वरागच्छविघ्नेत्येवनमस्कृ
त॥अविघ्नायभवास्माकंसदास्माकंभवोद्भवेत्यथदूर्वाक्षतासुमनोमिश्रमर्घ्य

ददातीयाआपःशिवतमाःपूताःपूततमामेध्यामेध्यतमाअमृताअमृतरसाःपा
द्याअर्घ्याअर्हणीयाअभिषेचनीयाआचमनीयामार्जनीयाश्चप्रतिगृह्णंतुभग
वान्विनायकोमित्यप्सरूप्यतूष्णींगंधपुष्पधूपदीपैरभ्यर्च्योपतिष्ठतेनमोभूपत
येनमोभुवनपतयेनमोभूतानांपतयेनमइत्यथतिस्मृत्तिस्त्रोविनायकहुतीर्जु
होतिविनायकायभूपतयेनमोविनायकायस्वाहा॥एवंविना०यभुवनपतये
नमोविनायकायस्वाहा॥विना०भूतानांपतयेनमोविनायकायस्वाहा॥जयप्रभृ
तिसिद्धिमाधेनुवरप्रदानादपूपंकरंभोदकसक्तून्पायसमित्यथास्मजपकिर
तिविघ्नायस्वाहा॥एवंविनायकायवीराय०शूराय०उग्राय०भीमाय०हस्तिमु
खाय०वरदाय०विघ्नपरिप्यदेभ्यःस्वाहेत्यथभूतेभ्योबलिमुपहरेद्येभूताःप्रच

ग्रां०र०
६

रंतीत्यथपंचसूत्रंकंकणंहस्तेबध्नाति॥विनायकमहाबाहोविघ्नमेतत्त्वदाज्ञया॥का
मामेसाधिताःसर्वेइदंस्वाहेतिभिरेवघ्नामिकंकणमित्यथाग्निंप्रदक्षिणंकृत्वाप्रण
म्याभिवाद्यविनायकंविसर्जयति॥कृतंयदिमयाप्राप्तंमहाभागगणेश्वर॥उत्ति
ष्ठगणाःसाधुयाहिभद्रंप्रसीदत्तामितिदधिमधुपयआज्यंविसर्जनेकल्पयति
॥अथप्रयोगः॥ पूर्वोक्तेशुभदिनेकर्त्तादेशकालौस्मृत्वाविनायकोपसर्गशां
त्यर्थममुककर्मण्यनिर्विघ्नतासिध्यर्थममुकफलसिध्यर्थंलक्ष्मीप्राप्त्यर्थंवाविना
यकशांतिंकरिष्य इतिसंकल्प्यगणेशपूजनंपुण्याहवाचनवृद्धिश्राद्धानिकृत्वा ६
चार्यंदत्वाचतुरःपराशरमतेष्टौवाऋत्विजोवृणुयात्॥तेषुचत्वारःस्वस्तिवा
चकाइतिमदनरत्ने॥अथाचार्यःपंचवर्णैःशुक्लैर्वापिष्टैर्मध्येस्वस्तिकंकृत्वा

तदुपरिरक्तमानडुहंचर्मप्राचीनग्रीवमुत्तरलोमास्तीर्य॥तत्रश्रीपर्णकाष्ठजंपीठंसं
स्थाप्यतत्रश्वेतंवस्त्रमाच्छाद्यचतुर्भिर्दिक्षुचत्वारिस्वस्तिकानिकृत्वातेषुप्रागादितः
महीद्यौरित्यादिनाकांडानुसमयेनएकवर्णांश्चतुरःकुंभान्धान्यराशौनिधाय
ह्रदोदकेननदीसंगमोदकेनवापूर्यत्वदृतासिवराहेणकृष्णेनशतबाहुना॥म
त्तिकेहरमेपापंयन्मयादुःकृतंकृतमितिमंत्रेणतेषुपंचमृदःक्षिप्त्वागंधद्वारां
मितिचंदनागरुकेसरकस्तूरीकर्पूरादीगोरोचनांगुग्गुलंचनिक्षिप्याश्वत्थेवइति
पंचपल्लवान्निक्षिप्यचंदनमालाभूषितान्कृत्वायाःफलिनीरितिफलंसहिरत्ना
नीतिनवरत्नानिहिरण्यरूपशतहैमेक्षिप्त्वायुवासुवासाइतिवस्त्रेणावेष्ट्यपूर्णाद
र्वीतिपूर्णपात्रंनिधायैवचतुर्दिक्षुकृत्वाप्रतिकलशंकलशस्यमुखेवि०देवदान

शां० र०
७

वइत्यादिपठेत्॥ ततश्चतुर्दिक्षुचत्वारऋत्विजः त्वन्नोअग्नेइतिवरुणमावाह्यषोडशोप
चारैःसंपूज्यानोभद्राःशन्नोवातःपवतामित्यादिस्वशाखास्यशांतिंपठेयुः॥ तत
आचार्योभद्रासनस्यपूर्वतोहोमार्थंस्थंडिलंकृत्वातदीशान्यांहस्तमात्रवेदिकायां
पीठेवस्त्रादौतत्पुरुषायविद्महेवक्रतुंडायधीमहितन्नोदंतिःप्रचोदयात्॥ इति
विनायकं॥ सुभगायैविद्महेकाममालिन्यैधीमहितन्नोगौरीप्रचोदयात्॥ इत्यं
बिकांच हैमीप्रतिमास्वावाहयेत्॥ अपरार्के भविष्ये अन्यामपिदेवताउक्ताः॥ व्यो
मकेशंतुसंपूज्यपार्वतींभीमजंतथा॥ कलस्यपित्तरंतातअर्कमारंसितंतथा॥ ७
धिषणंक्लेदपुत्रंचकोणंलक्ष्मचभारत॥ विधुंतुदंबाहुलेयंनंदकस्यचधारिणं
॥ व्योमकेशःशिवः॥ भीमजोगणेशः॥ आरोभौमः॥ सितःशुक्रः॥ धिषणोगुरुः

क्लेदपुत्रोबुधः॥ कोणःशनिः॥ लक्ष्मचंद्रः॥ बाहुलेयस्कंदः॥ नंदकधारिविष्णुः॥ ततस
रितोयथावकाशंमतिमान्वलतपुंजेषुवाव्योमकेशंपार्वतीं॥ भीमजंवसुदेव॥ अ
र्कमंगलशुक्रबृहस्पतिबुधंशनैश्चरंचंद्रराहुं॥ बाहुलेयंविष्णुं॥ एतानइंद्रादि
लोकपालांश्चावाह्यासनादिनैवेद्यांतैरुपचारैःसंपूज्यभद्रासनस्यपूर्वतः स्थं
डिलेगृह्योक्तविधिनाग्निंप्रतिष्ठाप्यान्वादध्यात्॥ केचित्तुग्रहमखमेतत्समान
तंत्रंकुर्वंति॥ तत्रविनायकादिग्रहादिरावाहनंकुर्यात्॥ तत्रान्वाधानेचक्षुष्यंत
मुक्त्वाअत्रप्रधानंगृह्यसमिदाज्यचरुभिः मितसंमितंशंगारंकृटंकृष्णांउंराजपु
त्रंचैकैकयाचर्वाहुत्वाव्योमकेशादीनेकैकयाचर्वाहुत्वाशेषेणस्विष्टकृतमित्यादि
चतुःसंप्रपयित्वाबर्हिष्यासाद्यगआज्यलोरितेनगौरसर्षपाकल्केनोद्वर्त्तितं

सर्वांगंपूर्वोक्तैः सर्वौषधैः सर्वगंधैश्च विलिप्तशिरसं यजमानमाचार्यो भृंगालके दद्यो
षे भद्रासने उपवेशयेदिति विज्ञानेश्वर महार्णवादयः॥ बृहत्पराशरोप्येवमाह
उपवेश्यो भर्तृयोदितित मदनरत्ने॥ ततो यजमानः पूर्ववत्तैः चतुर्भिर्ब्राह्मणैः स
हस्वस्तिवाचनं कुर्यात्॥ ततः जीववत्पतिपुत्राभिः सवेषाभिः स्त्रीभिर्नीराजनं का
र्यं॥ ताभ्यश्च यजमानः वस्त्राणि कंचुकानि च दद्यादित्याचारः॥ ततः आचार्यः पूर्व
देशस्थं कलशमादाय सहस्राक्षं शतधारमृषिभिः पावनं कृतं॥ तेन त्वामभिषि
चामि पावमान्यः पुनंतु ते इति मंत्रेण यजमानमभिषिंचेत्॥ भगं ते वरुणो राजा
भगं सूर्यो बृहस्पतिः॥ भगमिंद्रश्च वायुश्च भगं सप्तर्षयो विदुरिति दक्षिणकुंभेन
न॥ ततः यत्ते केशे पु दौर्भाग्यं सीमंते यच्च मूर्धनि॥ ललाटे कर्णयोरक्ष — — स्त

घ्नंतु सर्वदा इति पश्चिमकुंभेन ततः उत्तरकलशमादाय सहस्राक्षमित्याद्यैर्मंत्रैर
भिषिंचेत्॥ अपरार्कमते तु त्रिभिरेकैककुंभेनाभिषेकः॥ ततः श्चतुर्भिर्मिलि
तैः कुंभैरभिषिंचेत् बृहत्पराशरोक्तैः॥ एतद्वै पावनं स्नानं सहस्राक्षं ऋषिस्मृतं
॥ तेन त्वा शतधारेण पावमान्यः पुनंतु मां॥ शक्रादिदशदिक्पाला ब्रह्मेशाः
केशवादयः॥ आपस्ते घ्नंतु दौर्भाग्यं पतिं ददतु सर्वदा॥ सुमित्रिया न आप ओष
धयः संतु दुर्मित्रियास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्मः॥ समुद्रा गिरयो नद्यो
मुनयश्च पतिव्रताः॥ दौर्भाग्यं घ्नंतु मे सर्वे शांतिं यच्छंतु सर्वदा॥ पादगुल्फोरुजंघा
स्फिनितंबोदरनाभिषु॥ स्तनोरबाहुहस्ताग्रग्रीवांसांगसंधिषु॥ नासाललाटक
र्णाक्षकेशांतेषु च यत्स्थितं॥ तदापोघ्नंतु दौर्भाग्यं शांतिं यच्छंतु सर्वदा॥ ततआ

ग्रां०र०
९

चार्यःप्राङ्मुखोयजमानस्यपश्चात्तिष्ठन्सव्यपाणिनाकुशान्यजमानमूर्ध्निनिधा
यतत्रसार्षपंतैलमौदुंबरेणस्रुवेणादाय॥ॐमितायस्वाहा॥मितायेदमितियज
मानः॥एवमग्नेपिॐप्रमितायस्वाहा॥ॐशालायस्वाहा॥ॐकटंकटायस्वाहा॥ॐकू
ष्मांडायस्वाहा॥ॐराजपुत्रायस्वाहेतिषडाहुतीर्जुहुयात्॥अपरार्कमतेतुशालकटंक
टाभ्यामेका॥कूष्मांडराजपुत्राभ्यामेकाहुतिरितिचतस्रः॥ततःवक्रौदध्माधमनादि
कृत्वापूर्वोक्तैःषड्भिर्मंत्रैःअसौचरुंहुत्वाव्योमकेशादिभ्यश्चैकैकाहुतिंहुत्वास्विष्टकृ
दादिप्रायश्चित्तहोमंतिपूर्वादिदिक्षुइंद्रादिदशलोकपालेभ्योनाममंत्रैश्चरुशे
षेणबलिंदत्वाशुद्धोदकेनस्नातोधौतांबरधरोयजमानःसाचार्योविनायकमं ९
बिकांचपूर्वोक्तनाममंत्राभ्यांषोडशोपचारैःसंपूज्यकृताकृततंडुलान्तिल

पृक्तोदनंपक्वापक्वमत्स्यान्विधुसुरां॥तदभावेसैंधवपुतंपात्रत्रयेक्षीरपक्वमांसंमू
लकापूपपूरिकांडेरकाकृदध्यन्नपायसगुडमिश्रपिष्टमोदकलड्डुकचित्रसुगंधपु
ष्पकुल्माषफलानिचैकपात्रेशूर्पेवाकृत्वापूर्वोक्तमंत्रेणविनायकायेदमुपहारं
निवेद्यइदमुपहारंविनायकायेवमंबिकायैचदत्वा॥कुसुमगंधदूर्वासर्षपसहि
तेनोदकेनांजलिमापूर्यप्रत्येकंपूर्वोक्तमंत्राभ्यामर्घंदत्वादूर्वासर्षपपुष्पांजलिं
चमंत्राभ्यांदत्वाभूमौशिरःकृत्वा॥रूपंदेहियशोदेहिभगंभगवन्देहिमे॥पुत्रान्दे
हिधनंदेहिसर्वकामांश्चदेहिमे॥इत्यंबिकांचोपतिष्ठेत्॥बृहत्पराशरोमंत्रांतर
माह॥सौभाग्यंमेंबिकेदेहिरूपंभगंयशोपिच॥स्त्रियंपुत्रांश्चतथाशेषंचदे
हिमे॥गणेशमातरंवाल्लेयकिंचिन्मदभीप्सितं॥एकानात्मेवतद्देहिदेहिगौरि

शां०र०
१०

वरान्मम्मेति ॥ अर्घ्यदानमुपस्थानं च चतुष्पथे बल्यनंतरं कार्यमिति मदनरत्ने ॥
ततश्चाचार्यः शूर्पे कुशानास्तीर्य तत्र मंत्रोक्ता देवताः संपूज्य तत्र शूर्पं निधाय बलिं
दद्यात् मंत्रास्तु ॥ बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा ॥ मरुतोथाश्विनौ रुद्राः सुप
र्णाः ॥ पन्नगा ग्रहाः ॥ असुरा यातुधानाश्च पिशाचा मातरो गणाः ॥ शाकिन्यो यक्षवे
ताला योगिन्यः पूतनाः शिवाः ॥ जृंभकाः सिद्धगंधर्वा नागा विद्याधरा नगाः ॥
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः ॥ मा
विघ्नं मा च मे पापं मा संतु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहा — १०
ः ॥ ततो यजमानो गृहमागत्य पादौ प्रक्षाल्याचम्याचार्यं संपूज्य तस्मै वस्त्रयुगं
हेमदक्षिणां दत्वान्यर्त्विग्भ्यो यथाशक्त्या तेभ्यश्च भूयसीं दत्वा विनायकांबिकयो

रुत्तरपूजां कृत्वा विसृज्याचार्याय दत्वाग्निं संपूज्य विभूतिं कृत्वाग्निं विसृज्य ब्राह्मणान्भोज
यित्वा कर्मेश्वरार्पणं कुर्यात् ॥ ॥ इति श्रीनारायणभट्टसूरिसूनुरामकृष्णभट्टसूनु
कमलाकरभट्टकृते शांतिरत्ने विनायकशांतिः ॥ ॥ हेमाद्रौ भविष्ये ॥ चतुर्थ्यां वारणे
हैमं पद्मार्द्धेतु शोभनं ॥ कारयित्वांकुशायुतं तिलद्रोणोपरिन्यसेत् ॥ वस्त्रैः पुष्पैः
पूजयित्वा नैवेद्यं विनिवेद्य च ॥ ततस्तु ब्राह्मणे दद्याद्गणेशः प्रीयतामिति ॥ कार्यारं
भेषु सर्वेषु तस्य विघ्नं न जायते ॥ तेन विनायकशांत्यविकल्पः ॥ वारणाः सप्तजन्मानि
भवंति मदविह्वलाः ॥ इदं चैत्रे श्रावणे कार्तिके वा कार्यमिति हेमाद्रिः ॥ अथ सर्व
शांतिप्रकृतिभूतग्रहयज्ञ उच्यते ॥ तत्र स्कांदयाज्ञवल्क्यौ ॥ श्रीकामः शांतिका
मो वा ग्रहयज्ञं समाचरेत् ॥ वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्नपि ॥ स चतुर्ध

ग्रं॰र॰ ११ केवलः अयुतहोमो लक्षहोमः कोटिहोमश्चेति ॥ अथ याज्ञवल्क्याद्यैरुक्ताः ॥ अन्येमा
श्चोक्ताः ॥ ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिचोदितः ॥ प्रथमोयुतहोमः स्याद्द्व लक्ष
होमस्ततः परं ॥ तृतीयः कोटिहोमश्च सर्वकामफलप्रदः ॥ ते द्वेधा नैमित्तिकाः
काम्याश्च ॥ तदुद्देशास्तत्रैव ॥ गृहस्योत्तरपूर्वेण मंडपं कारयेद्बुधः ॥ रुद्रायतनभू
मौ वा चतुरस्रमुदक्प्लवं ॥ दशहस्तमथाष्टौ वा हस्तान्कुर्याद्विधानतः ॥ तस्य द्वा
राणि चत्वारि कर्तव्यानि विचक्षणैः ॥ मंत्रमुक्तावल्यां ॥ चतुर्हस्ताश्चतुर्द्वारा अष्ट
हस्तादिनस्त्रयः ॥ चतुर्विंशतिहस्तांता हीनमध्योत्तमाः क्रमात् ॥ यद्वा द्वादशह ११
स्ताद्याः षोडशहस्ता दृष्टिता न च ॥ अष्टाविंशतिपर्यंताः कैश्चिदुक्ता मनीषिभिः ॥ अ
यं नैमित्तिकनित्यकाम्यो मंडपः ॥ नित्यं नैमित्तिकं हित्वा सर्वस्मिन्नस्य मंडपमिति

शारदातिलकात् ॥ कुंडमंडपप्रकारोऽस्मात्पितृकृतप्रयोगदीपिकायां मत्कृते दानद
कमलाकरे च ज्ञेयः ॥ स्कांदे ॥ नवग्रहमखे कुंडं हस्तमात्रं समं भवेत् ॥ चतुरस्रमथो
हस्तं योनिवक्त्रं त्रिमेखलं ॥ चतुरंगुलविस्तारा मेखला तदुच्छ्रिता ॥ मानहीनाधि
कं कुंडमनेकभयदं स्मृतं ॥ योनिमत्र प्रवक्ष्ये ॥ वितस्तिमात्रा योनिः स्यात् षट्सप्तांगुलवि
स्तृता ॥ कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगुलोच्छ्रिता ॥ गजोष्ठसदृशी तद्वदायता छि
द्रसंयुता ॥ मेखलोपरि सर्वत्र अश्वत्थदलसन्निभा ॥ कुंडस्याभावे स्थंडिलं वा ॥ नित्यं नै
मित्तिकं होमं स्थंडिले वा समाचरेत् ॥ इति शारदातिलकात् ॥ कुंडमेवंविधं न स्यात्स्थं
डिलं वा समाश्रयेदिति प्रपंचसाराच्च ॥ स्कांदे ॥ तस्य चोत्तरपूर्वेण स्थंडिलं वा समा
श्रयेदिति स्थंडिलं हस्तमात्रकं ॥ तस्य कुंडस्य स्थंडिले वेदिर्द्विवक्त्रं चतुरस्रं च चि

शां०र०
१२

तस्तु छायसंमितं ॥ द्विरंगुलोछ्रितोवप्रः प्रथमः समुदाहृतः ॥ अंगुलोछ्रायसंयुक्तं
वप्रद्वयमथोपरि ॥ घ्यंगुलस्तत्र विस्तारः सर्वेषां कथितो बुधैः ॥ नवग्रहमखे देक्यादिति
जश्चतुरः शुभात् ॥ अथवा चैक मभ्यषे विधिना ब्रह्मणा सह ॥ मदनरत्ने स्कांदे ॥ नव
ग्रहमखे विप्रा स्त्वतासौ वेद्यादितः ॥ अथवा ऋत्विजो शांतो द्वावेव कृतिको विदो द्वा
वेवायुतयोमे तु नमसज्जेत विस्तरं ॥ वेद्यां संभवे सर्वतो भद्रं कार्यं ॥ मंडलं सर्वतो भद्र
मेतस्याधारणं स्मृतमिति शारदातिलकात् ॥ मात्स्ये ॥ पुण्ये क्वि विप्रकथिते कृत्वा ब्राह्म
णवाचनं ॥ अग्निप्रणयनं कृत्वा वेद्यामावाहयेत्सुरान् ॥ देवानां तत्र संस्थाप्य विंश
ति द्वादशाधिका ॥ आदित्याभिमुखाः सर्वे साधिप्रत्यधिदेवताः ॥ प्रतिमा आह याज्ञ १२
वल्क्यः ॥ ताम्रका स्फाटिका रक्तचंदना स्वर्णका इभो ॥ रजता दयसः सीसात्कांस्या

त्कार्याग्रहाः क्रमात् ॥ स्वर्णैर्वा वा पटे लेख्या गंधैर्मंडलकेषु वा ॥ मात्स्ये ॥ पद्मासनः पद्म
करः पद्मगर्भसमद्युतिः ॥ सप्ताश्वः सप्तरज्जुश्च द्विभुजः स्यात्सदा रविः ॥ पीतमाल्यां
बरधरः कर्णिकारसमद्युतिः ॥ खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥ देवदैत्यगुरु
तद्वत्पीतश्वेतौ चतुर्भुजौ ॥ दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू ॥ इंद्रनीलद्युतिः शूली
वरदो गृध्रवाहनः ॥ बाणासनधरः — — — कर्तव्योर्कसुतः सदा ॥ करालचंदनः ख
ड्गचर्मशूली वरप्रदः ॥ नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते ॥ धूम्रा द्विबाहवः स
र्वे गदिनो विकृताननाः ॥ गृध्रासनगता नित्यं केतवस्सुवरप्रदाः ॥ सर्वे किरीटिनः का
र्या ग्रहा लोकहितावहाः ॥ स्वांगुलेनोछ्रिताः सर्वे शतमष्टोत्तरं सदा ॥ स्कांदे ॥ जन्म
भं गोत्रमग्निश्च वर्णस्थानमुखानि च ॥ यो ज्ञात्वा कुरुते शांतिं ग्रहास्तेनावमानिताः

शा०र०
१३

उत्पन्नोर्कः कलिंगेषु यमुनायां च चंद्रमा ॥ अंगारकस्त्ववंत्यां च मगधायां हिमांशु—ः
सैंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा ॥ शनैश्चरस्तु सौराष्ट्रे राहुर्वैराटिनापुरे ॥ अं
तर्वेद्यां तथा केतुरित्येते ग्रहभूमयः ॥ आदित्यः काश्यपे गोत्रे आत्रेयश्चंद्रमा भवेत्
॥ भवेद्भौमस्तथात्रेय ———— श्च सोमजः ॥ गुरुश्चैवांगिरोगोत्रः शुक्रो वै भा
र्गवस्तथा ॥ शनिः काश्यप एवाथ राहुः पैठीनसिस्तथा ॥ केतवो जैमिनी या श्च ग्रहा
स्त्विस्तदनंतरं ॥ आदित्ये पिंगलो नाम पिंगलः सोमउच्यते ॥ धूमकेतुस्तथा भौमे ज
ठराग्निर्बुधे स्मृतः ॥ गुरो श्चैवं शिखी नाम शुक्रे भवति हाटकः ॥ शनैश्चरे महातेजा
राहुकेतो हुताशनः ॥ भास्करांगारकौ रक्तौ शुक्लौ शुक्रनिशाकरौ ॥ सोमपुत्रो गुरु १३
श्चैव तावुभौ पीतकौ स्मृतौ ॥ कृष्णं शनैश्चरं विद्याद्राहुं चित्रं च केतवः ॥ गोभिले

न तु ॥ ब्राह्मणौ भार्गवाचार्यौ क्षत्रियावर्कलोहितौ ॥ वैश्यो सोमबुधौ ज्ञेयौ शेषाः शूद्रा
न विनिर्दिशेत् ॥ स्कांदे ॥ वैश्यौ सोमबुधौ ज्ञेयौ ॥ स्कांदे ॥ मध्ये तु भास्करं विद्याच्छशिनं
पूर्वदक्षिणे ॥ दक्षिणे लोहितं विद्याद्बुधं पूर्वोत्तरेण तु ॥ उत्तरेण गुरुं विद्यात्पूर्वेणैव तु
भार्गवं ॥ पश्चिमे तु शनिं विद्याद्राहुं दक्षिणपश्चिमे ॥ पश्चिमोत्तरतः केतुं स्थाप्यां वै
शुक्लतंडुलैः ॥ अथवा वर्णकैः कार्याः कार्याः स्वर्णादिधातुभिः ॥ शुक्रार्कौ प्राङ्मु
खौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतो मुखाः ॥ प्राङ्मु
खा ऊर्ध्वदृष्टी स्यादुदङ्मुखो वामदृष्टिगः ॥ प्रत्यङ्मुखा बुधे दृष्टी आदित्याभिमुखा ग्र
हाः ॥ इति मात्स्योक्ते हेमाद्रिः ॥ विकल्प इति युक्तं ॥ वर्णरूपगुणैर्युक्तान्ग्रहानावा
हयेत्तु तान् ॥ स्कांदे ॥ भानुं तु मंडलाकारं सोमं तु चतुरस्रकं ॥ अंगारकं त्रिकोणं तु

शां० र०
१४

बुधंबाणाकृतिंतथा॥ गुरुंतुप्रदिशाकारंपंचास्रंभार्गवंतथा॥ धनुस्तुल्यंशनिंवि
द्याद्राहुंशूर्पाकृतिंतथा॥ ध्वजाकाराःकेतवःस्युर्गणेशांतस्वरूपिणः॥ तत्पूर्णमंड
लेषुताम्रादिप्रतिमासुतंडुलैःस्थापयेदित्यर्थः मंडलमृत्योर्विकल्पइतिहेमाद्रिः
॥ ग्रहमंत्रान्याहयाज्ञवल्क्यः॥ आकृष्णेनइमंदेवाअग्निर्मूर्द्धादिवःककुत्॥ उ
द्बुध्यस्वेतिचततोयथासंख्यंप्रकीर्त्तिताः॥ बृहस्पतेअतियदर्यस्तथैवान्नात्परि
स्रुतः॥ शन्नोदेवीस्तथाकांडीकेतुंकृण्वन्निमास्तथा॥ स्कांदेतुकयानइतिराहोश्चे
त्युक्तं॥ मात्स्येत्वन्येउक्ताः॥ अग्निर्दूतंदिनेशायसोमायाप्यस्वइत्यपि॥ स्योनापृ
थिविभौमायइदंविष्णुर्बुधायच॥ इंद्राआसांसुरेज्यायशुक्रज्योतिःसितायच॥ प्र
जापतेतिसौरायआयंगौरितिराहवे॥ केतवेब्रह्मजज्ञानंस्वैःस्वैर्मंत्रैःप्रतिष्ठिताः

१४

अन्यार्थानामपिमंत्राणांवचनात्वयथार्थमैंद्रंस्यादितिन्यायेनत्वितियोगो॥ होमेप्येत
एवत॥ अधिदेवाःस्कांदे॥ सूर्यस्यचोत्तरेशंभुं मांसोमस्यदक्षिणे॥ स्कंदमंगारकाच्चै
वदक्षिणस्यांनिवेशयेत्॥ सौम्यात्पश्चिमतोविष्णुंब्रह्माजीवस्यपूर्वतः॥ इंद्रमैंद्रंसि
ताद्धिहिमंदस्याग्नेयतोयमं॥ राहोःपूर्वोत्तरोकाळंसर्वभूतभयावहं॥ केतोर्निऋति
दिग्भागेचित्रगुप्तंनिधापयेत्॥ ईश्वरंत्र्यंबकंचेतिश्रीश्वतेतिचपार्वती॥ यदक्रंदेतिच
स्कंदंविष्णुंविष्णोरराटतः॥ आब्रह्मन्निति ब्रह्माणंसजोषाइंद्रवासवं॥ यमायचेतिच
यमंकालंकर्षिरसीतिच॥ चित्रायबास्त्विति मंत्रेणचित्रगुप्तंनिधापयेत्॥ अग्निरा
पःक्षितिर्विष्णुरिंद्रऐंद्रीप्रजापतिः॥ सर्पाब्रह्मचनिर्दिष्टाअधिदेवायथाक्रमं॥ अग्नि
र्दूतमितिह्यग्नेर्वरुणस्यउदुत्तमं॥ स्योनापृथिविमेदिन्याइदंविष्णुस्तुविष्णवे॥ इंद्रा

ग्रां०र०
१५

येंद्रोश्तींद्रस्योत्तानपर्णेशचीस्मृतौ॥प्रजापतेप्रजे—स्यएषब्रह्मेतिवानिधेः॥मंत्री
नमोस्तुसर्पेभ्यःसर्पाणांस्थापयेत्ततः॥गो॥भिलववसिष्ठे॥ग्रहदेवतयोर्मध्येअधिदे
वान्विक्षण॥मदनरत्नेसंग्रहेतु॥अधिदेवाद्दक्षिणतोवामेप्रत्यधिदेवताः॥स्थापनी
याःप्रयत्नेनव्याहृती॥भिःपृथक्पृथकु —त्सलपरिमाणो॥ग्रहस्यदक्षिणेपार्श्वे
स्थापयेदधिदेवतां॥ग्रहस्योत्तरपार्श्वेतुन्यसेत्प्रत्यधिदेवताः॥स्थापनीयाःप्रय
त्नेनव्याहृती॥भिःपृथकु२ शौनकः॥क्षेत्रस्यपतिनाक्षेत्रपालंभुजोत्तरंन्यसेत्॥भू
जोभौमःग्रहदेवाधिष्टिदेवानांनैवेद्यंतुकुसुमानिच॥ग्रहवच्चासनंदानंस्थापने
चानुपूर्वशःस्मृतं॥वासिष्ठांत्वन्यथोक्तं॥रुद्रंत्र्यंबकमंत्रेणरवेरुत्तरतोन्यसेत्॥ १५
सोमस्याग्नेयदिग्भागेश्रीश्चतेमेनकात्मजां॥यदक्रंदेतिभौमस्यस्कंदंयाम्येप्रपूज

येत्॥विष्णुंविष्णोरराटेतियजेत्पूर्वेबुधस्यच॥गुरोरुत्तरतःस्थाप्योब्रह्मसौब्रह्मज्ञेतिमंत्र
तः॥सजोषेंद्रेतिमंत्रेणप्राच्यांशक्रंनिधापयेत्॥वा—ःपश्चिमतःस्थाप्योयमाय
त्वेत्यचायमः॥काषिरसीतिमंत्रेणराहोःकालंतथोत्तरे॥चित्रगुप्तंतुकेतूनांचित्राय
स्वितिनैर्ऋते॥ग्रहदेवतयोर्मध्येआधिदेवान्निवेशयेत्॥मात्स्ये॥विनायकंतथादु
र्गांवायुमाकाशमेवच॥आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ॥मदनरत्नेस्कां
दे॥उत्तरेशानिसूर्याभ्यांगुरोःकेतोश्चदक्षिणे॥गणाधिपंप्रतिष्ठाप्यसर्वदेवनमस्कृ
तं॥तत्रैवसंग्रहे॥राहुमंददिनेशानामुत्तरस्यांयथाक्रमं॥गणेशंदुर्गांवायुंश्वराहु
केतोश्चदक्षिणे॥आकाशमश्विनौचेतिपंचैतान्स्थापयेद्बुधः॥वसिष्ठः॥विनायकंग
णानांत्वादुर्गांवेजातवेदसे॥वायोशतेतथावायुंधत्तंघृतेतिवांबरं॥यावांकशानि

स्यंपूज्यो क्षावुप्येतोत तोग्भिनो॥ गो भलीय॥ द्वात्रिंशाद्देवतास्थाप्या दिक्पालाश्च दिगा
ताः॥ याज्ञवल्क्यः॥ यथावर्णमदेयानि वासांसि कुसुमानि च॥ गंधाश्च वलयश्चैव धू
पो देयश्च गुग्गुलुः॥ स्कांदे॥ दिवाकरकुजाभ्यां हि दापयेद्रक्तचंदनं॥ चंदनं भार्गवे चैव
सितवर्णं प्रदापयेत्॥ कुंकुमेन तु संयुक्तं चंदनं जीवसौम्ययोः॥ अगरुं चंदनं दद्याच्छ
हुंकेलकर्जे षुच॥ ग्रहवर्णानि पुष्पाणि गायत्र्या धूपमाददेत्॥ रवेः कुंदुरकं धूपं
शशिनस्तु घृताक्षतः॥ भौमे सर्जरसं चैव अगरुं च बुधे स्मृतं॥ सिल्हकं गुरवे दद्या
च्छुक्रे विल्वांगतं तथा॥ गुग्गुलं मंदचारे तु लाक्षा राहोश्च केतवे॥ उदीप्यस्वेति मं
त्रेण दीपं दद्यात् घृतं प्रियं॥ गुडोदनं रवे दद्यात्सोमाय घृतपायसं॥ लोहिताय हविः
ष्यान्नं बुधाय क्षीरषाष्टिकं॥ दध्योदनं गुरोर्दद्याच्छुक्राय च घृतोदनं॥ मिश्रितं ति

लमाषैश्च नैवेद्यं तु शनैश्चरे॥ राहोर्माषोदनं दद्यात्केतोश्चित्रौदनं तथा॥ मात्स्ये तु म
स्तराश्च कुजे क्ष्याद्दित्युक्तं॥ निवेदयित्वा हुतिभिर्होमं कुर्यात्ततंद्रितः॥ अत्र विशेषो म
त्कृते दानकमलाकरे ज्ञेयाः॥ मात्स्ये धूपामोदोत्र सुरभिरुपरिष्टाद्वितानकं॥ अधि
देवादीनां तु स्थलपरिमूले॥ सर्वेषां लोकपालानां चंदनं च विलेपनं॥ आतपत्राणि पु
ष्पाणि दद्याद्गुग्गुलुधूपकं॥ दीपं गोघृतसंयुक्तं नैवेद्यं च घृतोदनं॥ मात्स्ये॥ प्रागुत्तरे
णानस्मात्त्व दध्यक्षतविभूषितं॥ चूतपल्लवसंयुक्तं फलवस्त्रयुगान्वितं॥ पंचरत्न
समायुक्तं पंचभंगयुतं तथा॥ स्थापयेदव्रणं कुंभं वरुणं तत्र विन्यसेत्॥ गंगाद्याः
सरितः सर्वाः समुद्राश्च सरांसि च॥ गजाश्वरथ्यावल्मीकात्संगमाद्ध्रदगोकुलात्
॥ मृदमानीय विप्रेंद्र सर्वौषधिसमन्वितं॥ स्नानार्थं विन्यसेत्तत्र यजमानस्य ध

ग्रा०र० ११

मेवत्॥ याज्ञवल्क्यः॥ कर्त्तव्या मंत्रवंतश्च - - - - - खः प्रतिदैवतं॥ नानाम्नयतो
स्नमोस्त्वचेतिवचनात्सह पश्यग्वान्नपयेत्॥ मात्स्ये होमं समारभेत्सर्पिर्यवव्रीहिति
लादि भिः हेमाद्रौ देवीपुराणे॥ गणाधिपतये देया प्रथमात्तु वराहुतिः॥ अन्य
थाविफलं विप्र भवती हन संशयः॥ अर्कः पलाशः खदिरः अपामार्गोथ पिप्पल
ः॥ अडुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात्॥ एकैकस्यात्वष्टशतमष्टाविंशति
रेववा॥ होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः॥ प्रादेशमात्रसमिधअशाखा
अपलाशिनीः॥ देवानामपि सर्वेषां मुपांसु परमार्थनत्॥ स्वेन स्वेनैव मंत्रेण हो ११
तव्याः समिधः पृथक्॥ होतव्यं च घृताक्ताभिश्चरुभक्ष्यादिकं ततः॥ स्कांदे॥ र
स्थापनं मंत्राः होममंत्रा उक्ताः॥ अधिदेवादीनां चैवं॥ वासिष्ठ्यामपि॥ सौपा

पां स्थापने मंत्रै होमो घाहुतिभिस्तिलैः॥ मात्स्ये॥ त्वधिदेवानामन्ये मंत्रा उक्ताः॥
आवो राजेति रुद्रस्य बलिहोमं समाचरेत्॥ आपोहिष्ठेत्युमायाश्च स्योनेति स्वा
मिनस्तथा॥ विष्णोरिदं विष्णुरिति॥ तमीशेति स्वयंभुवः॥ इंद्रमिदेवतातयइंद्रायजुह
यासुनः॥ तथा यमस्य चायंगोरिति होमः प्रकीर्त्तितः॥ कालस्य ब्रह्मजज्ञानमिति
मंत्रः प्रशस्यते॥ चित्रगुप्तस्य चाज्ञातमिति वेदविदो विदुः॥ अग्निं दूतं वृणीमह इ
ति वह्नेरुदाहृतः॥ उदुत्तमं वरुणमित्यपां मंत्रः प्रकीर्त्तितः॥ भूमेः पाथिव्यंतरिक्ष
मिति वेदेषु पठ्यते॥ सहस्रशीर्षा पुरुष इति विष्णोरुदाहृतः॥ इंद्रायेंदो मरुत्वत इ
ति शक्रस्य शस्यते॥ उत्तानपर्णे सुभगे इति शच्याः प्रशस्यते प्रजापतेः पुनः हो
मः प्रजापत इति स्मृतः॥ नमोस्तु सर्पायइति सर्पाणां मंत्र उच्यते॥ एष ब्रह्मय

स्वस्तिय इति कुस्मपुष्पा रुतः॥ विनायकस्य चात्र न इति मंत्रो बुधैः स्मृतः॥ जातवेदसे
सुनवाम दुर्गामंत्रोपमुच्यते॥ आदित्यलस्य तत्र आ शास्त्व उदाहृतः॥ क्षाण्या त्रि
मुमेहीनां च वायो मंत्रः प्रकीर्त्तितः॥ एषोऽत्र षाअपूर्व्येति आम्नि नो मंत्र उच्यते॥ स्कां
दे॥ नैवेद्यशेषं हुत्वा तु होममंत्रादनंतरं॥ अथ व्याहृतिभिर्हुत्वा एकैकस्य यथाक्रमं
अष्टोत्तरं च साहस्रं शतमष्टाधिकं तथा॥ अष्टाविंशतिरष्टौ वा एकैकस्य तु होमयेत्
॥ नैवेद्यशेषहोमः केषांचित्॥ हेमाद्रौ॥ ततो वदानधर्मेण स्रुक्चैवं जुहुयाच्चरुं॥ घृ
ताक्तार्कसमिद्भिश्च सर्पिषा च तिलैः क्रमात्॥ तत्तन्मंत्रैश्च होतव्याः क्रमात्तद्धि दे
वताः॥ तेन चरोः प्रत्याहृत्य वदानधर्मः॥ केचिद्धस्तेन होममाहुस्तच्चिंत्यं॥ मात्स्ये॥
होतव्यं च समित्सर्पिश्चरु भक्ष्यादिकं पुनः॥ मंत्रैर्दशाहुती हुत्वा होमं व्याहृतिभि १८

स्ततः॥ उदङ्मुखाः प्राङ्मुखाः प्राङ्मुखा वा कुर्युर्ब्राह्मणपुंगवाः भक्ष्यादिकं नैवेद्यशेषं कु
त्वा तत्तद्ग्रहमंत्रैरयुतहोमीयतिलादिद्रव्येण प्रत्येकं दशाहुतीर्हुत्वा प्रणवादि भूरादि
व्याहृतिभिर्व्यस्ताभिस्तिस्रः समस्ताभिश्चैकेत्येवमावृत्त्यायुतलक्षहोमादिसंख्या
पूरणीयेति हेमाद्रौ मदनरत्ने चोक्तं॥ एवं विभागे मूलं तु न विद्मः॥ तत्त्वं तु तत भि
र्व्याहृतिभिरेकाहुतिरित्येव सर्वो होम इति प्रतिभाति॥ तदुक्तं हेमाद्रौ भविष्ये॥ भू
र्भुवःस्वस्तथा स्वाहा लक्षहोमविधिः स्मृत इति हेमाद्रिस्तु पूर्वापरविरोधाज्ज्ञात ए
व॥ मात्स्ये॥ मंत्रवंतश्च कर्त्तव्याश्चरवः प्रतिदैवतं॥ हुत्वा चाता श्चरुं सम्यक् ततो हो
मं समाचरेत्॥ पूर्णाहुतिं च मूर्द्धानं दिव इत्यभिपातयेत्॥ अथाभिषेको मंत्रेण
वाद्यमंगलगीतकैः॥ पूर्णकुंभेन तेनैव होमांते प्रागुदङ्मुखैः॥ यजमानस्य क

ग्रां॰र॰ १९

र्तव्यंचतभिस्तत्पनंद्विजैः॥ तत्रस्मरणस्त्वेत्स्याद्यमंत्राः प्रयोगेवक्ष्यंते॥ अग्निपुराणे
॥मृद्भानादिवमंत्रेणसंस्रवेणचधारय॥ दद्याद्भ्रात्पूर्णविनोपविद्गुपकदाचन॥
महापापवृत्तमृष्ठनंपुनस्तस्माद्दिलाःपूर्णादिविसृजतेअग्नेइतिपूर्णाहुतौचत्वारोमं
त्राउक्ताः॥ भविष्योत्तरे नसंख्यानियमस्त्वत्रब्राह्मणानांनरोत्तमा॥ तत्काल
नियमश्चैवस्वेद्धपायत्तउच्यते॥ ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः॥ सर्वौ
षधैःसर्वगंधैःस्नापितोवेदपुंगवैः॥ यजमानःसपत्नीकःऋत्विजश्चसमाहि
तः॥ दक्षिणाभिःप्रयत्नेनपूजयेद्गतविस्मयः॥ वाग्विद्धं॥ ततस्तस्याभिषिक्त
स्यरक्षार्थंबलिंनिक्षिपेत॥ दिग्विदिक्षुविचित्रान्नैर्द्वीपैर्नीराजयेत्ततः॥ प्रयोगपा
रिजातेवामनः॥ आचार्यप्रभृतिभ्यश्चग्रहार्चनफलंततः॥ समिदाज्यचरु

णांचतिलहोमफलंतथा॥ तेषांजपफलंतद्वद्गृह्णीयाज्जलपूर्वकं॥ ततस्तेभ्योय
थाशक्तिदातव्यादक्षिणापृथक्॥ ताश्चयाज्ञवल्क्येनोक्ताः॥ धेनुःशंखस्तथानड्वा
न्हेमवासोहयःक्रमात्॥ कृष्णागौरायसंछागएतावैदक्षिणाःक्रमात्॥ मात्स्ये
सुवर्णेनसमाचार्याययजमानेनदक्षिणा॥ सर्वेषामथगांदद्याद्गुरुणायेनतुष्यति
॥स्वमंत्रेणप्रदातव्याःसर्वाःसर्वत्रदक्षिणाः॥ तेचमंत्राः॥ मत्कृतेदानकमला
करेज्ञेयाः॥ अत्रापिप्रयोगेवक्ष्यंते॥ मदनरत्नेआश्वलायनः॥ एवमेकाहुतौ
विप्रंहोमेत्वत्तेनभोजयेत्॥ अत्यथोमध्यमश्चापिविप्रमेकंशताहुतौ॥ सह
स्रस्यहुतेवैकंजघन्योपिप्रभोजयेत्॥ अन्यथादहतिभ्रमंतआष्ट्रदुंनात्रसंश
यः॥ अंतेदातुमशक्तश्चेद्दक्षिणांचान्नमेववा॥ जपैःप्रणामैःस्तो — त्रैश्चतो १९

शां० र०
२०

बंयत्नपर्यैद्गुरुन्॥ स्कांदे॥ यथाग्रहो द्विजस्तद्वद्विधिज्ञो वेदपारगः॥ तोषयेन्मखवद्
स्त्राद्यैस्तुष्टमेनं विसर्जयेत्॥ याज्ञवल्क्यः॥ गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं
॥ दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च दद्याद्ग्रहक्रमादेतद्द्विजेभ्यो भोजनं बुध
शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं॥ हविष्यं तौदनः चूर्णं तिलचूर्णमिश्र
ओदनः॥ वसिष्ठः॥ दिशान्यामादरेद्ग्रस्तस्तु चावाथस्रुवेण वा॥ चंदनं कारये
त्तेन शिरः कंवासकंठेषु च मास्य॥ एवं समग्र निष्पाद्य सर्वे देवान्विसर्जयेत्॥
यांतु देवगणाः सर्वे पूजामादाय पार्थिवात्॥ इष्टकामप्रसिध्यर्थं पुनरागमना
य च॥ अनेन विधिना यस्तु ग्रहपूजां समाचरेत्॥ सर्वान्कामानवाप्नोति प्रेत्य
स्वर्गे महीयते॥ यस्तु पीडाकरोत्स्येतमल्पचित्तस्य वा ग्रहः॥ तं तु यत्नेन संपू २०

ज्य शेषानभ्यर्चयेन्नरः॥ तथा॥ सदैवायुतहोमोयेन ग्रहमखः स्मृतः॥ विवाहो
त्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु॥ निर्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगाद्भुतेषु च॥ वश्या
कर्माभिचारादि तथैवोच्चाटनादिके॥ नवग्रहमखं कृत्वा ततः कर्म समारभेत्॥
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित्॥ अद्भुतं भूकंपादि अन्यच्चात्र विशे
षः पितृकृतप्रयोगदीपिकायां ज्ञेयः॥ यत्तु शिष्टाः॥ ग्रहमंत्राणामयुतसंख्या स
हस्रादि जपं कृत्वा॥ तद्दशांशेन तिलैर्होमः कुर्वंति॥ तत्कुत्रापि जपानुक्तेः किं
मूलकमिति न विद्मः॥ इत्ययुतहोमविधिः॥ अथ प्रयोगः॥ स च यद्यप्यस्मत्पिताम
हकृतोस्त्येव तथापि संक्षेपेणोच्यते॥ कर्ता देशकालौ स्मृत्वा श्रीकामः ग्रहपी
डायामुत्पाते रोगे वा तच्छांतिकामः शत्रुपराजयकामो वायुतहोमाख्यं नवग्र

Dr. BHAU DAJI
डाक्टर भाऊ दाजी इत्यस्य पुस्तकम्

ग्रां०र०
२१

हयज्ञेनाहंयक्ष्ये॥ केवलेतुग्रहयज्ञंकरिष्यतिवासंकल्प्यगणेशंसंपूज्यमातृपूजा
वृद्धिश्राद्धंचकृत्वाचार्यंवृत्वाप्रार्थयेत॥ त्वंनोगतिः पितामातात्वंगतिस्त्वंपराय
णं॥ त्वत्प्रसादेनविप्रर्षेसर्वंमेस्यान्मनोगतं॥ आपश्चिमोत्मायचमेकुरुयज्ञमत्र
स्थितः॥ कोटिहोमाख्यमतुलंशांत्यर्थंसार्वकामिकमितिः॥ ततःचतुरोऽन्यत्विजो
वृणुयात॥ सदाचार्योब्रह्माचेतिद्वौतेषांतद्वारवपामधुपर्कः॥ ततोदशहस्त
मष्टहस्तंवामंडपंकूटंवाकृत्वातन्मध्ये॥ ईशानेकुंडमिति — हेमाद्रिः॥ तदीशान्यां
वेदीहस्तविस्तृताचितस्तुच्चाव्रमध्ययुताचतुरस्राकारा॥ आद्यवप्रोद्व्यंगुलो २१
च्चःद्वितीयस्त्र्यंगुलोच्चःद्वावपिद्व्यंगुलविस्तारौ॥ ततआचार्योयत्रसंस्थित
मितिमत्रर्षयान्विकीयापोहिष्टीशुचीचो — — — नकुशोदकेनाभ्युक्ष्यसरुप

यन्नंतास्वामित्यस्त्वयंपवेत॥ मूलंत्वस्य — — पितृप्रयोगदीपिकायांज्ञेयं॥ अत्रमं
डपप्रतिष्ठात्रैलोक्येयानिभूतानिअत्यंतामकृतेदानकमलाकरेज्ञेयाससाचमंड
पाभावेनेनकार्या॥ द्वारलोपात करमंडपेतुकार्यावित्र्याहस्तप्रमाणेनमंडपंकूटमे
वचेति॥ लेगेविकल्पोक्तोव्रीहियवतस्समानविधानत्वादित्यत्रविस्तारः॥ ततः
कुंडंसंस्कृत्योर्ध्वमेखलायांब्रह्माणंमध्यमेखलायांविष्णुमधोमेखलायांरुद्रंयो
न्यांगौरींचसंपूज्याग्निंस्वगृह्योक्तविधिनाप्रतिष्ठाप्यग्रहवेद्यांग्रहान्स्थापयेत॥
पश्चाग्रहवेद्यांवस्त्रेःष्टदलंगंधादिनाकृत्वामध्येकर्णिकायांवर्तुलमंडलेमूर्त्तौर्तं
डलंपुंजेवाकृष्णेनाहिरण्यपुत्रसयूःसविताश्विष्टमंत्रांतेॐभूर्भुवस्वःकलिंगदेशो
द्भवकाश्यपगोत्ररक्तवर्णसूर्येहागच्छेहतिष्ठेति॥ अग्निंदूतमितिसूर्यस्थापनम्

ग्रां०र०
२२
तिमदनरत्नो ॥ व्याहृतिभिरेवाद्यमंत्रेणास्थापनमितितत्रैव ॥ एवमग्रेपि ततआग्नेय
दलेचतुरस्रेआप्यायस्वगोतमः सोमोगायत्रीअनेना — — — इतिवाॐभूर्भुवस्वर्य
मुनातीरोद्भवात्रेयगोत्रशुक्लवर्णसोमेमेत्यादि दक्षिणदलेत्रिकोणेअग्निर्मूर्द्धावि
रूपोगारकोगायत्रीअनेनस्योनापृथिवीतिवाभूर्भुवस्वरवंतासमुद्भवभारद्वाज
गोत्ररक्तवर्णभौमेत्यादि ॥ ऐशानेउद्बुध्यध्ववधः सोम्योबुधस्त्रिष्टुप्अनेनेदंविष्णु
रितिवाॐभूर्भुवःस्वर्मगधदेशोद्भवात्रेयगोत्रपीतवर्णबुधेत्यादि ॥ उत्तरदीर्घच
तुरस्रे ॥ बृहस्पतेअतियदर्यो बृहस्पतिस्त्रिष्टुप्अनेनेन्द्रस्ता मितिवाॐभूर्भुवःस्वः २२
— सिंधुदेशोद्भवांगिरसगोत्रपीतवर्णबृहस्पतेइत्यदेत्यादि ॥ पूर्वदलेपंच
कोणेअन्नात्परिस्रुतइतिवाशुक्रज्योतिरितिवाॐभूर्भुवःस्वभोजकटदेशो

द्भवभार्गवगोत्रशुक्रेहेत्यादि ॥ केचित्शुक्रःशुशुक्वारित्यर्थर्धर्चेशुक्रमंत्रमाहुस्त
च्चित्यं ॥ पश्चिमेधनुराकारेशन्नोदेवीः सिंधुद्वीपःशनिर्गायत्रीअनेनप्रजापते
नत्वदितिवाॐभूर्भुवःस्वः सौराष्ट्रदेशोद्भवकाश्यपगोत्रकृष्णवर्णशनैश्चरहेत्या
दि ॥ नैर्ऋत्यांशूर्पाकारेकयानोदामदेवोराहुर्गायत्रीअनेनकांडात्कांडादितिवायं
गौरितिवाॐभुर्भुवःस्वर्विराटीनापुरोद्भवपैठीनसिहगोत्रकृष्णवर्णराहोइहेत्यादि
॥ वायव्येध्वजाकारेकेतुंमधुच्छंदःकेतवेगायत्रीअनेनब्रह्मजज्ञानमितिवाॐभू
र्भुवःस्वरंतर्वेदिसमुद्भवजैमिनिगोत्रचित्रवर्णकेतोइहेत्यादि अथाधिदेवाः ॥
सूर्योत्तरेत्र्यंबकमितिरुद्रं ॥ सोमदक्षिणेअप्स्वंतेइत्युमां ॥ भौमदक्षिणेयदक्र
देतिस्कंदं ॥ बुधपूर्वेविष्णोरराटमितिविष्णुं ॥ गुरोरुत्तरेआब्रह्मन्नितिब्रह्माणं

ग्रां० र० कपूर्वेसजोषाइंद्रेतीद्रं॥ ईशानेराग्नेयेयमायत्वेतिममंत्रा होरीशानेकाधिरसीति
२३ चित्रगुप्तं॥ अथप्रत्याधिदेवाः॥ तेचग्रहदक्षिणोत्तरेवा अग्निंदूतः अग्निंअ
श्वयग्नेः यस्योनापृथ्विविभ्रमिदंदंविष्णुविष्णुःइंद्रआसांइंद्रंआदित्येरास्त्वामिदंशा
णीं॥ प्रजापतेप्रजापतिं॥ नमोस्तुसर्पेभ्यः सर्पान्॥ ब्रह्मजज्ञानंब्रह्माणंस्थाप
येत॥ ततोरवेरुत्तरेगणानांत्वेतिगणेशं॥ शनेरुत्तरेजातवेदसइतिदुर्गां॥
सूर्योत्तरेवायोरेनइतिवायो॥ राहोर्दैशानेघृतंघृतपावानइत्याकाशं॥ केतो
र्दक्षिणेयावांकशेत्यश्विनोस्थापयेत॥ ततोदिक्षु त्रातारमग्निंदूतंयमाय २३
त्वाअस्मुन्वंतं तत्त्वायामि वयंसोम तमीशानं ब्रह्मजज्ञानंनमोस्तुसर्पेभ्य
इतिदशादिक्पालानावाहयेत॥ जलहोमंतुसुपर्णोसिगरुत्मानिति म

निः शेषदेहस्त्वंवाहनंपरमेष्ठिनः॥ विषयापहरोनित्यमतः शांतिप्रयछमेइति॥
गरुडमावाह्यकोटिहोमपूर्वेब्रह्मजज्ञानमितिब्रह्माणं॥ मध्येइदंविष्णुरितिवि
ष्णुं॥ पश्चिमेत्र्यंबकमितिरुद्रंउत्तरेज्यपाअत्रेतिचस्ततागनेय्यांमरुतोयस्येति म
रुतश्चावाह्यसंपूज्यप्रार्थयेत॥ आदित्यावसवोरुद्रामरुतोलोकपास्तथा॥ ब्रह्मा
जनार्दनश्चैवशूलपाणिर्भगोग्रहाः॥ अत्रसंनिहिताः सर्वेभवंतुमखभागि
नः॥ पूजांगृह्णंतुसर्वत्रमयाभक्त्योपपादितां॥ कुर्वंतुचशुभंसर्वेयज्ञकर्तुः समा
हिताः॥ अत्रमंत्राणांवाचनिकत्वेपिस्वशाखीयैस्ततत्प्रकाशकैरावाहनादि
कार्यं॥ संहितायांतुयेमंत्रास्तद्दैवत्यःक्रतास्मृताः॥ तेः पूज्यालोकपालानांकर्त
व्यातुसमंततइतिहेमाद्रौगरुडस्योपलक्षणार्थत्वादि तिकेचिदाहुः॥ ततो

ग्रां०२० वेद्यांईशान्यांमहिद्यौरितिभूमिंस्पृष्ट्वा॥ओषधयःसमितियवान्निक्षिप्याकलशेष्वि
२५ तिकुंभंनिधायेमंमेगंगेतिर्थजलेनापूर्यतत्रगंधद्वारामितिगंधंयाओषधीरि
तिसर्वौषधीर्दधिक्राव्णोइतिदधिओषधयःसमितिअक्षतान्कांडात्कांडा
दितिदूर्वाःअश्वत्थेवइतिचूताश्वत्थवटोदुंबरप्लक्षपल्लवान्स्योनापृथिवीत्य
गजस्थानवल्मीकसंगमह्रदगोकुलराजद्वारेभ्यःसप्तमृत्तिकायाःफलि
नीरितिफलंसहिरत्नानीतिपंचरत्नानिहिरण्यरूपइतिहिरण्यंचक्षिप्त्वायुवासु
वासाइतिवस्त्रयुग्मेनावेष्ट्य॥पूर्णादर्वीतिपूर्णपात्रंनिधायावतेहेडइतिवरुणे २५
तिवरुणमावाह्यसर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥आयांतुयजमान
स्यदुरितक्षयकारकाःइतितीर्थान्यावाह्यसर्वेषांप्रणवादिनमोंतनामभिरुक्तत

त्तद्वर्णवस्त्रगंधपुष्पधूपदीपेघृतदीपोक्तनैवेद्यफलतांबुलदक्षिणानमस्कारैःपू
पूजांकुर्यात्॥उपरिफलपुष्पयुतंवितानंचदद्यात्॥एवमाहोमसमाप्तिप्रतिदि
नंकुर्यात्॥ततःकलशस्यमुखेदेवदानवसंवादइत्याद्यैःकुंभंसंप्रार्थ्यकुंडे॥त्वाधाम
दिप्रत्येकंनिर्वापादिप्रोक्षणादिनास्तमोप्येकत्रभिन्नान्वाचरून्श्रपयित्वाज्यभागां
तेयजमानःकर्माणितत्तद्देवताउद्दिश्यउत्सृज्येनममयथादैवनमस्तुइतित्यजेत्
॥ततोग्रहाणामुक्तसमिधःप्रादेशामधुघृतदधियुतास्तन्मंत्रैःप्रत्येकमष्टोत्तर
शतमष्टाविंशतिंवाहुत्वाधिदेवप्रत्यधिदेवविनायकादिपंचलोकपालेषुउक्तमं
त्रैन्यूनसंख्ययाष्टौचतस्रोवाहुत्वातत्तन्मंत्रैरेकैकामाज्याहुतिंहुत्वोपस्तरणादि
नाप्रत्येकंतत्तन्मंत्रोक्तचर्वाहुतिमेकैकांजुहुयात्॥ततःचरोःस्विष्टकृतंहुत्वाव्री

ग्रां॰२॰
२५

हिमवद्घृतयुतैस्तिलैर्यथाकाममुपकल्पितद्रव्येणाग्रहेभ्यस्तत्तन्मंत्रैः दशांशेनाहु-
तीर्हुत्वाभूरादिव्याहृतिभिर्व्यस्ताभिस्तिस्रः समस्ताभिश्चैकेत्येवमयुतसंख्यो होमः
कार्यः॥ अयुतलक्षहोमादिसमाप्तौ स्विष्टकृदादस्त्येव प्रायश्चित्ताहुति पूर्णाहुत्या-
द्येव कार्यमिति हेमाद्रिमदनरत्नादयः॥ तन्न॥ भूर्भुवः स्वः स्वाहेति सर्वो होमः स्वि-
ष्टकृदंते भिन्नः॥ अयुतहोमादावतिदेशप्राप्तस्य तस्य बाधमानाभावात्॥ एत-
च्छरीरधर्मत्वात्पुष्टित्वापत्तेरुक्तं॥ अन्येत्वंत्यदिन एव स्विष्टकृत्॥ अन्यथा
सुत्योत्कर्षे सवनीयपशुयागादौ का गतिः॥ शिष्टस्थापनार्थं चाज्यलेपादिरूपा- २५
पआस्थापनार्थं चाज्यलेपादिरूपापआस्थेयः इति वदंति॥ वयं तु स्विष्टकृद्या-
गद्वयं कार्यं स्विष्टकृद्यागे हि मानं भूष्ठे शेषस्य प्रयोजकः॥ परत्र पुत्रकर्मोपजीवि-

त्वात् शेषस्तु तस्य प्रयोजक एव॥ संस्कार्यत्वात्॥ अन्यथा पशुपुरोडाशादीवपि प-
शुकृत्स्विष्टकृद्भेदं न स्यात्॥ हेमाद्र्यादिलिखि— चैवमाभाति॥ एकत्राहिरिध्माज्यहि
स्विष्टकृतः स्रुचस्तु व्यत्यासआश्वलायनोक्तेः॥ कालैक्ये एकः कालभेदे तु ना— ते
नियुक्तमुत्पश्यामः॥ ततः शुभे मुहूर्ते होमं समाप्य स्विष्टकृदादिप्रायश्चित्तहोमांतं
स्वशाखीयं प्रणीताविमोका— कं कलशादिकृपालेभ्यो ग्रहेभ्यः क्षेत्रपालाय च ब-
ली— त्वा स्कचिद्यदशाग्रहीतं गृहीत्वोर्ध्वस्तिष्ठन्मूर्ध्नि भारद्वाजो वैश्वानराये-
दं न ममेति त्यागः॥ ततः प्रणीताविमोकादिब्रह्मादिविसर्जनांतं कर्म समापयेत्
॥ ततः सर्वौषधैः सर्वगंधैश्च प्रागुक्तैर्विलिप्तांगं यजमानं सपरिवारं च चत्वारो वि-
प्रा ग्रहकुंभोदकेन समुद्रज्येष्ठेत्याद्यैरभिषिंचेयुः पौराणैश्च तैश्च॥ सुरास्त्वाम-

शां०र०
२६

भिषिंचंतु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥ प्रद्युम्नश्चा-
निरुद्धश्च भवंतु विजयाय ते ॥ आखंडलोग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥ वरुणः
पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा ॥
कीर्त्तिर्लक्ष्मीधृतिर्मेधा पुष्टिश्रद्धाक्रियामति ॥ बुद्धिर्लज्जा वपुः शांतिः कांतिस्तुष्टिश्च
मातरः ॥ एतास्त्वाम् अभिषिंचंतु देवपत्न्यः समागताः ॥ आदित्यश्चंद्रमा भौमो बुध-
जीवसितार्कजाः ॥ ग्रहास्त्वाम् अभिषिंचंतु राहुकेतुश्च तर्पिताः ॥ देवदानवगंधर्वा
यक्षराक्षसपन्नगाः ॥ ऋषयो मुनयो गावो देवमातर एव च ॥ देवपत्न्यो ध्रुवा नागा
दैत्याश्चाप्सरसां गणाः ॥ अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ॥ औषधा-
नि च रत्नानि कालस्यावयवाश्च ये ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः

Dr. BHAU DAJI MEMORIAL

एते त्वाम् अभिषिंचंतु सर्वकामार्थसिद्धये ॥ इति ॥ ततः प्राङ्मुखः कर्त्ताग्नेः पश्चादाचार्य
र्त्विजः उदङ्मुखसंपूज्य ॥ देशकालौ संकीर्त्य कृतैतद्युतहोमाख्यग्रहयज्ञप्रति
ष्ठार्थं सूर्यप्रीत्यर्थम् इमां कपिलां गां रुद्रदैवत्याम् अमुकगोत्रेभ्योगुबी — ह्मो दक्षिणा
महं संप्रददे न मम इत्युक्त्वा ॥ कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥ तीर्थदेव
मया यस्माद् अतः शांतिं प्रयच्छ मे इति पठेत् ॥ एवम् अग्रेप्येयं पुण्यस्त्वं शंख पुण्या-
नां मंगलानां च मंगलं ॥ विष्णुना विधृतोसि त्वं अतः शांतिं प्रयच्छ मे ॥ इति सोमाय
शंखं ॥ धर्मस्त्वं वृषरूपेण जगदानंदकारकः ॥ अष्टमूर्त्तेरधिष्टानम् अतः पाहि सनात
नेति ॥ भौमाय वृषं ॥ हिरण्ययमानंदकारकः अगर्भगर्भस्त्वं हेमबीजं विभावसोः
॥ अनंतपुण्यफलदम् अतः शांतिं प्रयच्छ मे ॥ इति बुधाय हेमं ॥ पीतवस्त्रयुगं यस्मा

ग्रां०र० वासुदेवस्य वरप्रभो ॥ प्रदानात्तस्य मे विष्णुरतः शांति० इति गुरवे पीतवस्त्रं ॥ विष्णुस्त्व
२१ मश्वरूपेण यस्मादमृतसंभवः ॥ चंद्रार्कवाहनं नित्यमतः शां० ॥ इति शुक्राय ॥ य
स्मात्त्वं पृथिवी कृष्णा धेनुः केशवसन्निभा ॥ सर्वपापहरा नित्यमतः० ॥ इति शनये कृष्णां
गां ॥ यस्मादायसकर्माणि तवाधीनानि सर्वदा ॥ लांगलाद्यायुधादीनि तस्मा छां०
इति राहवे लोहं ॥ यस्मात्त्वं छागयज्ञानां मंगलत्वे व्यवस्थितः ॥ यानं विभावसोर्नित्य
मतः शां० इति केतुभ्यश्छागं ॥ सर्वेषामाग्रगा वः ॥ गवामंगेषु तिष्ठंति भुवनानि चतु
र्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र चेति देया ॥ सर्वेभ्यो वा सुवर्णं सर्वप
हेषु आप्यारत्नानि भूमिस्थाधिकानि ॥ तन्मे शास्तु ॥ यस्मादश्न्यं शयनं केशवस्याग्नि २१
वस्य च ॥ शय्या ममाप्यशून्यास्तु दत्ता जन्मनि जन्मनि ॥ यथा रत्नेषु सर्वेषु सर्वे दे

वाः प्रतिष्ठिताः ॥ तथा शांतिं प्रयच्छंतु रत्नदानेन मे सुराः ॥ यथा भूमिप्रदानस्य कलां ना
र्हंति षोडशीं ॥ दानान्यन्यानि मे शांतिर्भूमिदानाद्भवत्विह ॥ इति ॥ वस्त्रकांचनरत्नान्यपि
यथा ˉ दद्यात् ॥ ततो ग्रहाणामुत्तरपूजां कृत्वा यांतु देवगणा इति विसृज्याग्निं संपूज्य
विभूतिं धृत्वा गच्छगच्छ सुरश्रेष्ठेति विसृज्योक्तसंख्यया विप्रा ˉ भोज्य कर्मेश्वरार्पणम
स्तु कुर्यादिति ॥ ॥ इति नारायणभट्टतनुज रामकृष्णभट्टात्मज कमलाकरभट्टकृ
ताऽयुतहोमात्मकग्रहमखः ॥ अथ लक्षहोमः मात्स्ये ॥ कथितोऽयुतहोमोऽयं लक्षहो
ममतः शृणु ॥ सर्वकामाप्तये यस्माल्लक्षहोमं विदुर्बुधाः ॥ अस्माद्दशगुणः प्रोक्तो ल
क्षहोमः स्वयंभुवा ॥ आहुतीभिः प्रयत्नेन दक्षिणाभिस्तथैव च ॥ अन्नेन गुडोदना
दिनैवेद्यन ॥ द्विहस्तविस्तृतं तद्वच्चतुर्हस्तायतं तथा ॥ लक्षहोमे वेकुंडं योनिवक्त्रं म

त्रिमेखलं ॥ चतुर्हस्तायतमितिपक्षांतरं चिरत्नादियवादिविषयं ॥ अन्येतु क्षेत्र-
फलोक्तिरियं ॥ द्विहस्तकरण्यां हस्तचतुष्टयं क्षेत्रं भवति ॥ तेनैकएवपक्ष इत्या-
हुः ॥ अत्र कुंडलिजो बहवृचराचार्येणोक्ताः ॥ सुगमास्तु कुंडलिजः कार्या ब्राह्मणाये वि-
पश्चितः ॥ नित्यजपपराश्चैव नियोज्यास्ते दश द्विजाः ॥ कंदमूलफलाहारा दधिक्षी-
राशिनोपि वा ॥ मात्स्ये ॥ द्विरंगुलो — ता कार्या प्रथमा — खला बुधैः ॥ त्रिरंगुलोन्न-
तात्र द्वितीया समुदाहृता ॥ उच्छ्रायविस्ताराभ्यां च तृतीया चतुरंगुला ॥ चतुरंगु-
लविस्तारः पूर्वयोरपि शस्यते ॥ तस्य चोत्तरपूर्वेण वितस्तित्रयसंमितं ॥ प्रागुदक्-
प्रवणं तद्वच्चतुरस्रसमंततः ॥ विष्कंभार्धे — च्छ्रितं प्रोक्तं स्थंडिलं विश्वकर्मणा २८
अष्टादशांगुलोच्चमित्यर्थः ॥ संस्थापनाय देवानां वप्रत्रयसमावृतं ॥ द्विरंगुलो-

च्छ्रितो वप्रः प्रथमः समुदाहृतः ॥ अंगुलोच्छ्रायकं प्रोक्तं वप्रद्वयमथोपरि ॥ द्व्यंगुलस्तत्र
विस्तारः सर्वेषां कथितो बुधैः ॥ दशांगुलोच्छ्रिता भित्तिः स्थंडिले स्यात्तथोपरि ॥ तस्मि-
न्नावाहयेद्देवांश्च पूर्ववत्तु कृतं डले ॥ आदित्याभिमुखाः सर्वे साचि प्रत्यधिदेवताः ॥
स्थापनीयाः प्रयत्नेन नांतरेण पराङ्मुखाः ॥ ग्रहमध्ये गरुत्मदादि देवान्स्थाप्य ॥ अं-
ते तु बादरायण इति न्यायात् ॥ तदावाहनमंत्रः सामनिःशेषदेहस्त्वं बाहनं परमे-
ष्ठिनः ॥ विषपापहरो नित्यमतः शांतिं प्रयच्छ मे ॥ विषापहरण इति वा पाठः ॥ पूर्ववत्कुं-
भमामंत्र्य तत्र होमं समाचरेत् ॥ ग्रहस्थायां शतं कृत्वा समित्संख्याधिकं पुनः ॥ पूर्व-
वत्समिदाज्यचरून्हुत्वा सुपर्णोसीति गरुत्मानिति गरुड होमं कल्पतरुसमस्ता-
भिरेकैकं च वं समस्तव्याहृतिभिर्लक्षहोमं कुर्यादित्यर्थः ॥ एतत्कुंभवसोर्धारां पा-

ग्रां० र० २९

तयेदनलोपरि॥ औदुंबरीयथाशंचपर्णशाखाविवर्जितांबाहुमात्रांस्तुचंकृत्वातत
स्तभक्ष्योपरि॥ वाक्योर्मात्रा — — यस्मात् हस्तद्वयांतरालरोघेत्यर्थः॥ कुंभमलेय
वमात्रंछिद्रंकार्यमित्युक्तंहेमाद्रौघृतधारांततःसम्यगग्नेरुपरिपातयेत्॥ श्राव
येस्तत्क्रमान्प्रेयवैश्वदेवंगृहमेदृवं॥ मतावैश्वानरंसाम्नज्येष्ठसामाचपावयेत्॥ अग्निमी
ळेनवानांमंत्रुछंदसांगायत्रीआग्निः॥ विष्णोर्नुकंषण्णांदीर्घतमास्त्रिष्टुप्॥ आतेपितरि
तिपंचदशानांजमदग्निरुद्रस्त्रिष्टुप्॥ स्वादिष्ठयादशानांमधुछंदाःसोमोगायत्री॥
महावैश्वानरसाम्नोवैश्वानरऋषिर्देवताजगतीबृहतीछंदः॥ मूर्द्धानंदिवइतिज्ये
ष्ठसामभरद्वाजोवैश्वानरस्त्रिष्टुप्॥ स्नानंचयजमानस्यपूर्ववत्स्वस्तिवाचनं॥ दातं २९
व्यायजमानेनपूर्ववद्दक्षिणाःपृथक्॥ पूर्ववत्सुरास्त्वेत्यादिमंत्रपाठंकुर्यादित्यर्थः

नवग्रहमखेविप्राश्चत्वारोवेदवादिनः॥ अथवाऋत्विजौशांतौद्वावेवश्रुतिपारगौ॥ का
र्यावयुतहोमेतुनभवेज्जेतविस्तरे॥ तद्वच्चदशचाष्टौवालक्षहोमेतुऋत्विजः॥ कर्तव्या
:शक्तितस्तद्वच्चत्वारोवाविमत्सराः॥ नवग्रहमखश्चवलिक्षहोमेदशोत्तरं॥ दत्वादद्या
नुनिश्चेष्टभूषणान्यपिशक्तितः॥ आसनानिसवस्त्राणिहेमानिकटकानिच॥ कर्णां
गुलीपवित्राणिकंठसूत्राणिशक्तितः॥ अन्नदानंयथाशक्त्याकर्तव्यंभूतिमिच्छता॥ अ
न्नहीनःकृतोयस्मादुर्भिक्षभयदोभवेत्॥ अन्नहीनोदहेद्राष्ट्रंमंत्रहीनस्तुऋत्वि
जः॥ कर्त्तारंदक्षिणाहीनोनास्तियज्ञसमोरिपुः॥ नचाप्यल्पधनःकुर्याल्लक्षहोमं
नरःक्वचित्॥ तस्मात्पीडाकरोनित्यंयएवंभवतिग्रहः॥ तमेवपूजयेद्भक्त्यादौवा
त्रीन्वायथाविधिः॥ एकमप्यर्चयेद्भक्त्याब्राह्मणंवेदपारगं॥ दक्षिणाभिःप्रयत्नेनव

ग्रां० र०
३०

हवनस्य वित्तवान् ॥ लक्षहोमस्तु कर्त्तव्यो यदा वित्तं भवेद्बहु ॥ यतः सर्वानवाप्नोति कु
लजान्कामान्विधानतः ॥ आहुतेरेकः शतं सहस्रेवकाविप्र इत्यर्थः ॥ फलेन तु ॥ पूज्य
ते त्रिबलोके च वस्वादित्यमरुद्गणैः ॥ यावत्कल्पशतान्यष्टावथ मोक्षमवाप्नुयात् ॥
सकामो यस्त्विमं कुर्याल्लक्षहोमं यथाविधि ॥ सर्वान्कामानवाप्नोति पदं वानन्त्यमश्नु
ते ॥ पुत्रार्थी लभते पुत्रं धनार्थी लभते धनं ॥ भार्यार्थी लभते भार्यां कुमारी च शुभं
पतिं ॥ भ्रष्टराज्यस्तथा राज्यं श्रीकामः श्रियमाप्नुयात् ॥ यं यं चाप्यपते लाभं तं तं
माप्नोति पुष्कलं ॥ निष्कामः कुरुते यस्तु परं ब्रह्माधिगच्छति ॥ इति लक्षहोमः ॥ ३०
॥ अथ कोटिहोमः ॥ मात्स्ये ॥ अस्माच्छतगुणः प्रोक्तः कोटिहोमः स्वयंभुवा ॥ आ
हुतीभिः प्रयत्नेन दक्षिणाभिः फलेन च ॥ पूर्ववद्ग्रहदेवानामावाहनविसर्जने

होममंत्रास्त एवोक्ताः स्नाने दाने तथैव च ॥ कुंडमंडपवेदीनां विशेषोयं निबोध मे ॥ कोटि
होमे चतुर्हस्तं चतुरस्रं समंततः ॥ योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलं ॥ एकं यो
निवक्त्रं पश्चिमे परं दक्षिणे इति हेमाद्रौ मदनरत्ने चोक्तं ॥ वेदिश्च कोटिहोमे स्या
द्वितस्तीनां चतुष्टयं ॥ चतुरस्रा समंतात्त्रिभिर्वप्रैः समावृता ॥ वप्रप्रमाणं पूर्वो
क्तं वेदिकायास्तथोच्छ्रयः ॥ यत्तु — विष्णुः कुंडस्य पूर्वभागे तु वेदिं कुर्याद्विचक्षणः ॥
चतुर्हस्तां समां — वहस्तमात्रोच्छ्रितां नृपेति ॥ त — च फलपरं ॥ तथा षोडशहस्त
स्यान्मंडपश्च चतुर्मुखः ॥ पूर्वद्वारे च संस्थाप्य बह्वृचं वेदपारगं ॥ यजुर्वेदविदं
याम्ये पश्चिमे सामवेदिनं ॥ अथर्ववेदिनं तद्वदुत्तरे स्थापयेद्बुधः ॥ अष्टौ तु हो
मकाः कार्या वेदवेदांगवेदिनः ॥ एवं द्वादश तान्विप्रान्वस्त्रमाल्यानुलेपनैः ॥

ग्रा०र० पूर्ववत्पूजयेद्भक्त्या सर्वाभरणभूषिता॥ रात्रिसूक्तं च रौद्रं च कूष्मांडं शांतिमेव च पाव
३१ येद्दक्षिणाचारि यजुर्वेदिनमुत्तमं॥ सौपर्णमथर्वैराजमाग्नेयं रुद्रसंहितं॥ ज्येष्ठसा
म तथा शांतिं छंदोगः पश्चिमे पठेत्॥ शांतिसूक्तं च सौरं च तथा शाकुनिकं शुभं॥ पौ
ष्टिकं च तथा राजन्नुत्तरेण त्वथर्ववित्॥ भविष्योत्तरे॥ चिंतयेत्तत्र देवेशं पंचास्यं न
पृपावकं॥ मुखानि तस्य चत्वारि सप्तजिह्वानि पार्थिव॥ एकजिह्वमथैकं तु तस्य
तं सार्वकामिकं॥ पुण्याहजयघोषेण होमकर्म समारभेत्॥ तिलाः कृष्णा घृता- ३१
भ्यक्ताः किंचित्सर्षपसमन्विताः॥ होमो व्याहृतिभिस्त्वेवं सर्वस्तत्र विधीयते॥ पूर्वद्वारे
इति जापकाः उक्ता द्वारपालास्तु भिन्ना इति हेमाद्रिः पंचभिः सप्तभिरित्ति द्वादश
होमकाः॥ मात्स्ये एव षोडशाप्युक्ताः॥ तत्रापि ऋत्विजः कार्या रविनंदन षोडश॥

सर्वहोमेषु राजर्षे दद्याद्वित्तेषु यावना इति॥ हेमाद्रौ तु विंशतिर्वा तु विंशतिर्वा त्रिंशाच्च
तुःषष्टिः शतं होतार इत्युक्तं॥ भविष्योत्तरेऽपि॥ नियोजयेद्द्विजांस्तत्र शतसंख्या
न्यथोत्तमः॥ अलाभे तु बहूनां च यथालाभं नियोजयेत्॥ विद्यावृत्तान्वयोपेतान्गृ
हस्थान्धर्मिकान्शुचीन्॥ न संख्या विषमश्चात्र ब्राह्मणानां नरोत्तम॥ नकार्ज
नयमश्चात्र स्वेच्छया यजनज्यते॥ भविष्ये॥ प्रणवादिभिश्च तन्मंत्रैः स्वाहाकारां
तपूजितैः॥ जुहुयात्सर्वदेवानां वेद्याद्यै चोपकल्पिताः॥ पंचभिः सप्तभिर्वापि
होमः कार्योत्र पूर्ववत्॥ हेमाद्रौ भविष्योत्तरे॥ पूजयित्वा प्रयत्नेन ब्राह्मणं वेदपार
गं वस्त्रैश्च भूषणैश्चैव गंधमाल्यानुलेपनैः॥ प्रणम्य विधिवत्तस्य आत्मानं विनि
वेदयेत्॥ त्वं मां गतिः पिता माता त्वं गतिस्त्वं परायणं॥ त्वत्प्रसादेन विप्रर्ष

ग्रां०र० ३२

वैमिस्यान्मनोगतं ॥ आपद्विमोक्षाय च मे कुरु रूपजप्तमनुत्तमं ॥ कोटिहोमास्त्वमतुलं
ग्रांत्यर्थसार्वकामिकं ॥ वेद्यां देवा नाहा ॥ कलशानां पूर्वभागे तु मध्ये देवं जनार्दनं ॥ प
श्चिमे तु तथा रुद्रं स्तनुमुत्तरतस्तथा ॥ मनुं स्कंदं वसून्नित्ति वा पावकः ईशान्यां च
हास्व ब्रह्माणं नैर्ऋत्यां मरुतस्तथा ॥ वायुं तामे तथैशान्यां लोकपालान्क्रमेण तु ॥
आदित्या वसवो रुद्रा इति स्त दर्धश्लोक द्वयमयुतहोमे उक्तं ॥ भविष्योत्तरे पूर्ण
र्णे पूर्णे सहस्रे तु दद्यात्पूर्णाहुतिं शुभां ॥ पूर्णाहुत्यः समाख्याताः कोटिहोमे नरा
धिपः ॥ सहस्राणि न पञ्च श्रेष्ठ दशाशास्त्रविशारदैः ॥ स्नाने दाने न मंत्राः स्युस्त एव
मुनिसत्तम ॥ वसोर्धाराविधानं च लक्षहोमवदिष्यते ॥ अनेन विधिना यस्तु कोटि
होमं समाचरेत् ॥ सर्वान्कामानवाप्नोति ततो विष्णुपदं व्रजेत् ॥ अश्वमेधसहस्रा ३२

DR. BHAU DAJI MEMORIAL

णि दशाचाष्टौ च धर्मवित् ॥ कृत्वा यत्फलमाप्नोति कोटिहोमात्तदश्नुते ॥ ब्रह्महत्यास
हस्राणि भ्रूणहत्या—शतानि च ॥ नश्यंति कोटिहोमेन यथा वह्निवभाषितं इति मा
त्स्ये कोटिहोमः ॥ अथ लक्षहोमादौ हेमाद्रिमते नरत्नयोः नृसिंहपुराणे विशेषः ॥
दुःस्वप्नदर्शने घोरे ग्रहपीडासु चात्मनः ॥ हसंतीं प्रतिमां चैवं ज्वलंतीं च विशेषतः ॥
प्रस्वेदयुक्तां प्रतिमां दद्याच्चन्नपनं दृनं ॥ तथा महाज्वरग्रस्ते धनरां देवस्य मूर्धनि
सततं नरसिंहस्य कुर्याद्धाकारयेद्बुधैः ॥ अयने विषुवे चैव चंद्रसूर्यग्रहे तथा ॥ नर
सिंहं समाराध्य लक्षहोमं च कारयेत् ॥ अनावृष्टिमहामारीज्वररोगभये तथा
॥ नरसिंहं समाराध्य ब्राह्मणैर्वेदपारगैः ॥ कारयेल्लक्षहोमं तु ग्रामपश्च नराधि
पः ॥ दृष्टोपसर्गमरणं प्रजानामात्मनश्च हि ॥ सम्यगाराध्य यत्नेन नरसिंहस्य

शां०र०
३३

मंदिरे॥ शंकरायतने वापि कोटिहोमं समाचरेत्॥ प्रमाणं बाहुमात्रं हि सर्वतः कुंड
लक्षणं॥ ब्रह्मचारी व्रतेयुक्तस्त्रिरात्रं तु विशेषतः॥ अहोरात्रमुपोष्याथ गायत्रीमयु
तं जपेत्॥ निराहाराश्च शुचयस्ते सर्वे संयतेंद्रियाः॥ आरभेयुस्ततो यज्ञं ततो हो
ममतंद्रिताः॥ यवधान्यतिलैः पश्चाज्जुहुयात्तैर्मिश्रैश्चापि तथा प्रथमं हुतं॥ जुहुया
देकचित्तेन स्वाहाकारान्वितं बुधः॥ ततोऽन्याहुतिभिः पश्चाज्जुहुयात्तु निजा — दि
कं॥ यावल्लक्षपूर्णसंख्या लक्षं वा कोटिरेव च॥ समस्ताहुति — तिभिरेकाहुति
विस्तरार्थः॥ तावद्दिने दिने कुर्याद्विष्णुतार्चनपूर्वकं॥ तावच्च भोजनं दद्याद्यावद्धोमं समा ३३
चरेत्॥ समाप्ते दक्षिणां दद्यात्ततः प्रोक्षोदकेन च॥ एवं कृते तु ग्रामस्य राष्ट्रजन
पदस्य च॥ सर्वकोतावच्च भोजनं दद्याद्वद्धोमं समाचरेत्॥ समाप्ते दक्षिणां दद्यात्त

तः प्रोक्षोदकेन च॥ एवं कृते तु ग्रामस्य राष्ट्रजनपदस्य च॥ सर्वबाधाप्रशमनी शांतिर्भ
वति सर्वथा॥ अथ गायत्र्या अयुतहोमः॥ हेमाद्रौ मदनरत्ने च देवीपुराणे॥ षडंगलक्ष
णोपेतं वैदूर्यं कारयेद्द्विजं॥ हेमपीठं सुशोभाढ्यं चंद्रार्कौ तत्र मातरः॥ चर्चिकाद्याः
प्रकर्तव्याः पूर्वादि परिकल्पिताः॥ ग्रहाणां प्राग्वत्पूजा हि॥ लक्षहोमः प्रकर्तव्यः॥
सर्वपीडानिवारणः गायत्र्या ग्रहमंत्रैश्च कूष्मांडैर्जातवेदसे॥ इंद्रवारुणवायव्यैर्
याम्यैः सवैष्णवैः॥ होमः इति सहस्रस्तु अत्रोत्कृष्टो विधीयते॥ अत्र मंत्रवि
भागं तु बृहत्परशरोक्तं वक्ष्यामः॥ सर्वपीडाविनाशाय कोटिहोमः शुभावहः॥ य
व व्रीहि घृत क्षीर तिलाः कंगुप्रसारिका॥ पंकजोशीरबिल्वाम्रदलाः होमे प्रकीर्त्ति
होमं ताः॥ तत्रैव वज्रस्रोवा च॥ लक्षहोमं प्रवक्ष्यामि यथा प्रोक्तं तु शंभुना॥ भूमिकंपे

शां० र०
३४

दिशांदाहे ग्रहयुद्धे उपस्थिते। केतुसंदर्शने चैव आदित्यस्य च कंपने॥ — धूमे वर्षो
थवा सूर्ये तथा छिद्रसमन्विते। रक्तवृष्टिस्तथा वृष्ट्यो विपरीता भवंति च॥ भिर्गतं
गगनाद्भूमंडारिमध्ये त्रिसंस्थितिः॥ यस्य राज्ञो ग्रहाः पंचषट्सप्त च सुराधिप
॥ग्रहणं चंद्रस्य सूर्यस्य ग्रहे वाष्टमसंस्थितेः॥ सूर्यस्याभ्यर्चनं कार्यं शिवस्याशु
भनाशनं॥ लक्षहोमं महाहोमं कोटिहोमं पुरोहितं॥ गोभूहिरण्यवस्त्रान्नति
लदानं शुभावहं॥ पायसं दधि क्षीरान्नं देयं नैवेद्यमुत्तमं॥ एकलिंगं प्रकर्त्तव्य
मथो विप्रगृहेषु च॥ वृक्षादिरहि — मेकलिंगं॥ बाहुमात्रं ततः कुंडे जंघामात्र ३४
प्यथापुनः॥ होतव्यं सुरराजेंद्र नान्येषु विधिरीदृशः॥ अहं ते कथयिष्यामि ल
क्षहोमस्य यो विधिः॥ चतुर्हस्तं तथा कुंडं विस्तारं सुरसत्तम॥ षोडशांगुलवि

स्तारी दैर्घ्याद्द्विगुणविस्तरः॥ योनिः कुंडे प्रकर्त्तव्या नाधिकारस्य ते क्वचित्॥ यवव्री
हिघृतं क्षीरं तिलाः कंगुदलानि च॥ भूतस्य सुरराजेंद्र पलाशस्य समिधस्तथा॥ द
र्भाः कुशाः शमीज्येष्ठा औडुंबर्यः शुभावहाः॥ गायत्री अंबकं चापि शंभवायेत्यथा
पि च॥ जातवेदसमंत्रेण महाइंद्रेण चैव हि॥ सह — —शीर्षेण नमो हिरण्यने
त्यथापि हि॥ रुद्रमंत्रैस्तथा सौरैः पंचरात्रागमोदितैः॥ होतव्यं शतमष्टौ तु सह
स्रपरिसंख्यया॥ पंकजोत्पलबिल्वादिहोमः कर्मसु भावहं॥ कंपनं स्वेदनं गात्रे
अक्षपातार्थजल्पनं॥ देवतानां सुराध्यक्ष उत्पाताः क्षयकारकाः॥ लक्षहोमं प्र
कुर्वीत कोटिहोममथापि वा॥ गोदोहं रुद्रभवने सहस्रान्नं शुभावहं॥ अन्यथा म
रको योवो जायते राजविभ्रमः॥ ये देवास्ते ग्रहाः सर्वे ये ग्रहास्ते तु जंगमाः॥ तेषां

संपूजनान्नित्यं दीर्घायुः पुरुषो भवेत्॥ ॥इति गायत्र्यायुतादिहोमः॥ अत्र
लक्षहोमे कोटिहोमे च वक्तव्य राज्ञां रोको विशेषः॥ युग्माश्चात्रर्त्विजः कार्या ब्राह्म-
णा ये विपश्चितः॥ नियमव्रतसंपन्नाः संहिताः पार्थिवेन तु॥ नित्यं जपपरा-
श्चैव नियोज्यास्ते द्विजाः॥ कंदमूलफलाहारी दधिक्षीराशिनोपि वा॥ अग्निं
सोमं च सूर्यं च विष्णुं चैव प्रजापतिं॥ विश्वेदेवान्महेंद्रं च मित्रं स्विष्टकृतं तथा॥ द-
धिमधुघृताक्ताश्च समिधश्चैव यज्ञियाः॥ होमयेः वतसाहस्रं मंत्रैश्चैव यथाक्र-
मं॥ चतुर्विंशति गायत्र्या मानस्तोकेति षट् तथा॥ त्रिंशाद्भूहादिमंत्रैश्च चत्वारि वि-
ष्णुदैवतैः॥ कूष्मांडैर्जुहुयात्पंच किरिकं पात्तु षोडश॥ हुनेद्दशसहस्राणि जातवे-
दस इत्यृच॥ पंचैव तु सहस्राणि जुहुयाद्रिंद्रदैवतैः॥ तथा॥ कोटिहोमे च तु हस्तं ३५

चतुरस्रायतं पुनः॥ योनिवक्त्रद्वयोपेतं तद्वप्राह स्त्रिमेखलं॥ वेदी च कोटिहोमे स्याद्ध-
स्तानां हि चतुष्टयं॥ चतुरस्रा समा तद्वत्त्रिभिर्विप्रैः समावृता॥ वेदचतुष्टयस्याश्च तु-
रं द्वारपालानुदाहृ॥ अष्टौ तु होमकाः कार्या वेदवेदांगवेदिनः॥ एवं द्वादशते पूज्या
वस्त्रमाल्यानुलेपनैः॥ अन्यत्सर्वं पूर्ववत्॥ कोटिहोमे विशेषो भविष्योत्तरे॥ संवर-
णउवाच॥ भगवन्महदुत्पातसंभवे भूप्रकंपने॥ निर्घाते पांसुवर्षे च ग्रहभंगे तथै-
व च॥ जन्मनक्षत्रपीडासु अनावृष्टिभयेषु च॥ क्रूरास्तु ग्रहपीडासु भिन्ने देश-
विभ्रवे व्याधीनां संभवे जाते शरीरे चातिपीडिते॥ क्लेशे महति चोत्पन्ने किं कर्तव्यं नरो-
त्तमैः॥ स्वर्गस्य साधनं पत्र कीर्तिर्धनदं तथा॥ प्रब्रूहि मे द्विजश्रेष्ठ तथारोग्यप्र-
दं नृणां॥ सनत्कुमार उवाच॥ शृणु राजन्प्रवक्ष्यामि शांतिकर्म तथोत्तमं॥ कोटि-

होमाख्यमतुलंसर्वकामफलप्रदं॥ ब्रह्महत्यादिपापानियेननश्यंतितत्क्षणात्॥ उ
त्पातःप्रशममायातिमहत्संपद्यतेसुखं॥ विधानंतस्यवक्ष्यामिशृणुष्वेकमनाभव॥
देवागारेचभवनेतीर्थेवाशिवस — न्निधौ॥ पर्वतेवाप्रकुर्वीतयद्इच्छेत्समात्मनः
॥शुभेनलग्नयोगेचवारेसर्वगुणान्विते॥ यजमानस्यानुकूलेकोटिहोमंसमार
भेत॥ पूजयित्वाप्रयत्नेनब्राह्मणंवेदपारगं॥ वस्त्रैश्चभूषणैश्चैवगंधमाल्यानु
लेपनैः॥ प्रणम्यविधिवत्तस्मै आत्मानंविनिवेदयेत्॥ त्वंनोगतिःपितामाता
त्वंगतिस्त्वंपरायणं॥ त्वत्प्रसादेनविप्रर्षेसर्वमेस्या — — नोगतं॥ आपद्भिमोक्ष
यचमेकेरुयज्ञमनुत्तमं॥ कोटिहोमाख्यमतुलंगणंस्वयंसार्वकामिकं॥ पुरोहित ३६
स्ततःप्राज्ञःशुक्लांबरधरःशुचिः॥ ब्राह्मणैःसहितःपुष्पेःसंयुतैःसुसमाहितैः

भूमिभागेशुभेप्रागुदक्प्रवणेतथा॥ पुण्याहंवाचयेत्पुण्यंकृत्वाविप्रान्सुपूजितान्॥
ततस्तुसहितोविप्रैःस्वयंमंडपंशुभं॥ उत्तमंशतहस्तंतुतदर्धेनतुमध्यमं॥ जघ
न्यंतुतदर्धेनशक्तिकालाद्यपेक्षया॥ मध्येतुमंडपस्यापिकुंडंकुर्याद्विचक्षणः॥ चतुर्ह
स्तप्रमाणेनआयामेनतथैवच॥ मेखलात्रितयंतस्यद्वादशांगुलविस्ततं॥ तत्प्र
माणंतथायोनिंकुर्वीतसुसमाहितः॥ कुंडस्यपूर्वभागेतुवेदिंकुर्याद्विचक्षणः॥ च
तुर्हस्तांसमांचैवहस्तमात्रोच्छ्रितांनृपः॥ स्थापनंतत्रदेवानांकुर्याद्यत्नेनबुद्धिमान्
॥उपलिप्यततोभूमिमंडपस्यसमंततः॥ विन्यसेत्कलशांस्तत्रजलपूर्णांश्चतुर्दि
शं॥ अश्वत्थप्लक्षचूताद्यैःपल्लवैस्तपशोभितान्॥ वितानमुपरिष्टाच्चमंडपस्यप्र
कल्पयेत्॥ स्थापयेद्दिक्षुसर्वासुतोरणानिविचक्षणः॥ एवंसंभृतसंभारःपुरोधः

शां०२०
३१

सुसमाहितः॥ पुण्याहजयघोषेण होमकर्म समारभेत्॥ स्थापयित्वा सुरान् वेद्यां वस्त्र
माणानि रिंदम॥ ब्रह्माणं पूर्वभागे तु मध्ये देवं जनार्दनं॥ पश्चिमे तु तथा रुद्रं वसुरुत्तर
तस्तथा॥ ऐशान्यां च ग्रहान्सर्वानाग्नेय्यां महतस्तथा॥ वायुं सोम्यां तथैशान्यां लोक
पालान्क्रमेण तु॥ एवं संस्थाप्य विधिवद्यथास्थानं नृपोत्तम॥ पूजयेद्विधिवद्वस्त्र
गंधमाल्यानुलेपनैः॥ वेदोक्तमंत्रैस्तल्लिंगैः पुराणोक्तैः पृथक् पृथक्॥ आदित्या वसवो रु
द्रा मरुतो लोकपास्तथा॥ ब्रह्मा जनार्दनश्चैव शूलपाणिर्भगग्रहाः॥ अत्र सन्निहि
ताः सर्वे भवंतु मखभागिनः॥ पूजां गृह्णंतु सर्वत्र मया भक्त्योपपादितं॥ कुर्वंतु च शुभं ३१
सर्वे यज्ञकर्तुः समाहिताः॥ एवं संपूजयित्वा तान् देवान्प्रयत्नेन शुद्धधीः॥ नैवेद्यैर्वि
विधैर्भक्ष्यैः फलैर्दीपैस्तथैव च॥ ततस्तु तैर्द्विजैः सर्वैः कुंडस्य विधिपूर्वकं॥ कुर्या

संस्कारकरणं यथोक्तं वेदचिंतकैः॥ ततः प्रज्वालयेद्वह्निं नाम्नाख्यातं वनाविधं॥ नियो
जयेद्द्विजांस्तत्र शास्त्रसंख्यान्नृपोत्तम॥ अलाभे तु बहूनां च यथालाभं नियोजयेत्॥
विद्यावृद्धांश्च योवृद्धान् गृहस्थान्संयतेंद्रियान्॥ चिंतयेत्तत्र देवेशं पंचास्यं नृपपा
वकं॥ मुख्यानि तस्य चत्वारि सप्तजिह्वानि पार्थिव॥ एकजिह्वमथैकं तु तस्यास्तं सार्व
कामिकं॥ ऋ–ः पूर्वामुखे होमो यजुर्भिश्चोत्तरामुखे सामभिः पश्चिमे कार्यो पूर्व
दीदक्षिणामुखे॥ ऋ–ः ऋग्वेदिभिः प्रणवादिभिश्च तल्लिंगैः स्वाहाकारांतयोजि
तैः॥ जुहुयात्सर्वदेवानां वेद्यां ये चोपकल्पिताः॥ होमो व्याहृतिभिश्चैव सर्वस्तत्र वि
धीयते॥ पूर्णे पूर्णे सहस्रे तु दद्यात्पूर्णाहुतिं शुभां॥ पूर्णाहुत्यः समाख्याताः कोटिहो
मे नराधिप॥ सहस्राणि नवप्रोक्ताद्दशाव्यास्तु विशारदैः॥ एवं प्रकल्पयेद्यज्ञं कोटिहो

ग्रां०र० ३८

मारभ्यमुत्तमं॥ तिलाः कृष्णयवाभ्यक्ताः किंचिद्व्रीहिसमन्विताः॥ होतव्याः कोटि
होमे तु समिधस्तु पलाशजाः॥ दक्षिणा च सहस्रं धेनवः सहस्रसंख्या इत्यादि॥
सर्वेषामप्यभावे शक्तितः पलशतं वा शतं गावः॥ नवशतं सुवर्णाः॥ अथ कोटिहोम
स्य शतमुखदशमुखद्विमुखैकमुखभेदा उच्यंते॥ इमान् भविष्योत्तरे॥ संव
रण उवाच॥ बहुत्वात्कर्मणो ब्रह्मन्कोटिहोमः सुदुष्करः॥ कालेन महता चैव श
क्यः प्राप्तुं कथं च नो॥ नियमा ब्रह्मचर्याद्या दुष्करा इति मे मतिः॥ निरोधो ब्राह्म
णानां च भूम्यादि सुदुष्करः॥ कार्ये गुरुलघुस्त्व पर्वकालाद्यपेक्षया॥ कोटि ३८
होमस्य संक्षेपं वद मे ब्रह्मसंभव॥ सनत्कुमार उ०॥ शताननो दशमुखो द्विमु
खैकमुखस्तथा॥ चतुर्विधो महाराज कोटिहोमो विधीयते॥ कार्यस्य गुरुतां

ज्ञात्वा नैकय — — पर्वणः॥ पर्वग्रहणादि॥ यथा संक्षेपतः कार्यः कोटिहोमस्तथा
शृणु॥ कृत्वा कुंडशतं दिव्यं यथोक्तं हस्तसंमितं॥ एकैकस्मिंस्तथा कुंडे दश विप्रान्नि
योजयेत्॥ सद्यः पक्षे तु विप्राणां सहस्रं परिकीर्त्तितं॥ परिलक्षणदेशोस्य यः॥ एक
स्यान प्रणीतेभ्यो सर्वतः परिभाविते॥ होमं कुर्युर्द्विजाः सर्वे कुंडे कुंडे यथोदितं॥ यथा
कुंडबहुलेपि राजसूयमहाक्रतौ॥ स्यादेकाग्निबहुत्वं च न च यज्ञो विभिद्यते॥ तथा
कुंडबहुलेपि राजसूयमहाक्रतौ॥ स्यादेकाग्निबहुत्वं शतेप्यत्र घृताचिर्विनियोजि
तः॥ एक एव भवेद्यतः कोटिहोमो न संशयः॥ एवं यः क्रियते ह्यि प्रज्ञाकुलैः कार्यगौ
रवात्॥ शताननः स विज्ञेयः कोटिहोमो न संशयः॥ अत्र कुंडानां हस्तमात्रता शीघ्र
— दिघृतादिपरा॥ विलयवादौ तु लक्षैः शतांशो लक्षार्धे त्रिकरं कुंडं लक्षहोमे चतुः

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्याख्यस्मारक

ग्र०र० ३९ करं ॥ तथा ॥ अयुतेत्वथ होते च कुंडे स्यात् हस्तमात्रकं ॥ द्विगुणं लक्षहोमे च कोटिहोमे च
तुर्गुणमिति तंत्रांतरोक्तं ज्ञेयं ॥ अत्र ऋत्विगाचार्यसहितैः इत्युक्तस्याचार्यस्य विशेषानु
क्तेः ॥ सहस्रसंख्यया ऋत्विजामेव ॥ स्वल्पे रहो—ः कार्यस्याद्दर्षाकालादिकं यदा ॥ त
दा — मुखः कार्यः कोटिहोमे महामते ॥ विप्राणां दशते तत्र विभज्य विनियोजितः
॥ अत्र कोटिदशांशदश—साणेयेक कुंडे इति कुंडं पंचकरं शप्रोक्तं ॥ दशलक्षाहुतौ
क्रमादित्युक्तं पंचहस्तकुंडं त्रिप्रति कुंडं च ऋत्विजां विंशतिः सिद्धपति ॥ मंडपस्य पंचा
शत्करः पंचविंशतिकरो वा ॥ इति दशमुखः ॥ यत्र कुंडद्वयं कल्पा विभज्य च विभाव
सुं ॥ होमं कुर्युर्द्विजाभूयः संस्कृत्य विधिपूर्वकं ॥ शतं तत्र नियोज्यं च विप्राणां प्र ३९
विभज्य वै ॥ माघे वाथ वा धर्मासे वा कार्यकाले ह्युपस्थिते ॥ तदा तु द्विमुखः कार्यः

कोटिहोमो विचक्षणैः ॥ यदा तु स्वेच्छया यज्ञं यजमानः समापयेत् ॥ कालेन बहुना रा
जन्स्तदा चैकमुखो भवेत् ॥ एककुंडस्थितो वह्निरेकचित्तैः समाहितैः ॥ तत्संख्या नि
यमश्चात्र ब्राह्मणानां नरोत्तम ॥ न काल नियमश्चैव यच्छया यज्ञ उच्यते ॥ आवृत्त्या
कर्तुकामस्य चातुर्मास्यादिकर्मवत् ॥ सदा प्रसक्तः कर्तव्यो यज्ञोयं सार्वकालिकः ॥
अयमेकमुखो राजन् कालेन बहुना भवेत् ॥ यतो हि वित्तमाप्नुत्य वित्तं चैवास्थितः
सदा ॥ अतः संक्षेपतः कार्यः धर्मकार्यं प्रशस्यते ॥ अतः समाप्ते यज्ञे तु कामये सुम
होत्सवे ॥ शंखतूर्यनिनादेन ब्रह्मघोषरवेण च ॥ ततस्तु दक्षयेद्विप्रान् ऋत्विजः श्र
द्धयान्वितः ॥ निष्कैश्च कंकणैश्चैव कुंडलैर्विविधैर्नृप ॥ गोशतं चैव दातक्रमं —
नां च शतं तथा ॥ सहस्रं च सुवर्णानां सर्वेषामपि दापयेत् ॥ ग्रामे गजे रथे रथैः

ग्रा०र०
५०

पूजयेच्चपुरोहितं॥ ततश्चावभृथेस्नायांतैर्घटैः पूर्वकल्पितैः॥ लक्षहोमोक्तमंत्रे
णसदाविजयकारिणा॥ एवंसमापयेद्यस्तु कोटिहोममखं शुभं॥ तस्यारोग्यं प्रि
याः पुत्राः आयुर्वृद्धिस्तथैवच॥ अनावृष्टिभयं नैव उत्पात —यमेवच॥ दुर्भिक्षंग्र
हपीडा च प्रशमं याति॥ ॥नृतस्य चान्यत्रासंभवाच्चतुरोपि प्रकारान् राजाधि
कारिकानाहपितृचरणास्तु फलवाक्यं मनुजोक्तेरन्यस्यावहद्धनत्वेराजदत्तग्रा
मादिदाने — चाधिकारः॥ पुरोहितश्चाष्टस्तुगुरवेग्रामरत्नानां तिवराचार्येभ्युपप
न्नश्चाह॥ अत्रोक्तमंडपतहस्तं तु तदर्धेन तु मध्यमं॥ जघनं तु तदर्धेन देश
कालाद्य — पेक्षयेति॥ भविष्योत्तरोक्तो मंडपोज्ञेयः॥ तत्रशतहस्तबहिःपंचह ५०
स्तान्मध्येस्तंभचतुष्कमष्टहस्तदशहस्तं वा दत्वा मध्ये दशहस्तोपरिमध्यस्तंभे

समान्स्तंभान्स्तंभान् दृष्टपरीतिर्यक्काष्टानि दत्वा सर्वमध्यचतुष्कोपरिउच्चं कु
र्यात्॥ अस्याश्च स्त्रीपल्लवे सौकर्यार्थत्वात्॥ ततः प्रागुदक्सूत्रैर्दशधा॥ विभज्य दश
दशप्रागपरा पुण्यदंचिच सूत्राणि दद्यात्॥ तेन दशहस्ताः शतं कोष्ठका भवंति
तेषां मध्यं प्रसाध्यार्द्धहस्तकं कर्णीकानि चतुरस्राणि पद्माणि सभिन्नानि वाशतंकु
डानि कुर्यात्॥ तेन दश कुंडदशाद्धी— भवंति॥ अत्रैकादशान्यायेन देशभेदा द्रूरू
पाप्राघासिक दक्षिणोत्तरविहारवत्तद्देशस्थान्येवांगानि तद्देशस्य प्रधानस्यो प
कुर्वंति॥ भूसंस्काराद्याज्यभागांतमिध्माबर्हिस्रुक्स्रुवप्रणीताचरुस्थपणा
दिभेदेन पृथक्कुर्यात्॥ एकस्या न प्रणीतेऽग्नाविल्सुक्रे राद्यपदृष्टावाद्यकुंडेगृह्यंलौ
किकंवाग्निं निधायान्येषु प्रणयेत्॥ स्विष्टकृत्पूर्णाहुतिवसोर्धारापृथगेवसर्व

ग्र०र०
४१

तोमुखवयज्ञवत्॥ तत्राध्वर्युभेदात्कर्मभेदः अत्रतुतंत्रमितिविशेषः॥ इतिकमला
करभट्टकृतोभविष्योत्तरोक्तमुखादिकोटिहोमः॥ ॥अथप्रयोगपारिजातेबह्वृच
परिशिष्टोक्तग्रहयज्ञप्रयोगः॥ सनित्योनैमित्तिकःकाम्यश्च अयनोपप्लवागमा
दावाद्यः॥ कर्मारंभेद्वितीयः॥ फलार्थकाम्यः॥ काम्येमंडपादिनियतांनित्यनैमित्ति
कंहित्वासर्वमन्यत्समंडपमितिमात्स्योक्तेः॥ तदभावेकूटमंडपः॥ मंडपंकूटमेवेति
लैंगोक्तेः॥ आम्रजापनः रूपवर्णायुधस्थानमंडलासनवाहनात्॥ समित्कुंडोपहा
राश्चपुष्परत्नाकृतीरपि॥ गायत्रीमूलमंत्राश्चानमोमंत्रांश्चकेवलान्॥ अधिप्र ४१
त्यधिदेवानांमंत्राश्चर्ष्यादिसंयुतान्॥ तत्रमूर्तीश्चजानीयात्क्रोष्ठश्चर्चनवर्जता
न्॥ अज्ञात्वेवप्रमानिष्ट्वा तत्फलंनैवविंदति॥ यद्यपिनित्यनैमित्तिकंहोमंस्थंडि

लेवासमाचरेदिति॥ ग्रहरत्नोक्तेः काम्येकुंडंनियतंतथापिकुंडेवास्थंडिलेविवेत्याचार्यो
क्तेःस्थंडिलमपि॥ कर्त्तादेशकालौसंकीर्त्यअमुककामोग्रहानुकूल्यसिद्ध्यर्थंवाश्रीपर
मेश्वरप्रीत्यर्थंग्रहयज्ञंकरिष्येइतिसंकल्प्यगणेशपुण्याहवाचननांदीश्राद्धानिकृत्वा
चार्यंब्रह्माणंषोडशचतुरोवाऋत्विजोवृत्वार्चयेत्॥ ततआचार्यआचम्यसंकल्प्यहस्तमा
त्रमयाचतुरस्त्रंद्व्यंगुलापाद्यंगुलोच्चत्रिवप्रांवेदींतंडुलैःसकर्णिकंअष्टदलंकृत्वाग्रह
वर्णास्ततैर्ग्रहमंडलानिकृत्वोदीच्यांस्थंडिलंपञ्चसंस्कृत्य तत्रमहीद्यौरितिभूमिंस्पृष्ट्वौषध
यःसमितिपंचाशत्कलशोषधितिकुंभान्निधायइमंमेगंगेतिक्षुद्रद्वितीयमेधमनत्तिजग
तीत्यनेनजलमापूर्यवस्त्रयुग्मेनसूत्रेणवावे॥ गजाश्वरथ्यादिअष्टमृदः॥ उद्ध
तासिवराहेणेतिसित्वाभवतिभीमोरेणुःसोमोजगतीइतिवटाश्वत्थप्लक्षजंबूचू

ग्रां॰र॰ ५२

तपस्त्वत्वचः प्रवोपहृतोषितिवसिष्ठोविश्वेदेवास्त्रिष्टुप्श्शती॥ आप्यायस्वगोतमःसोमो
गायत्रीइतिक्षीरंदधिक्रास्तोवामदेवोदधिक्रावानुष्टुब्दधि॥ शुक्रमसिज्योतिरसतिघृ
तंगंधद्वारामावादृधिरनुष्टुप्श्रागोमयंगायत्र्याविश्वामित्रःसविताखायत्रीइति
गोमूत्रं॥ सहिरत्नानिदृपवाम्यः सवितागायत्रीइतिनवरत्नानि॥ याओषधीराथर्वणा
ओषधयोनुष्टुप्शतितिशतौषधीदशमूलानिहेमंवा॥ गंधद्वारामितिगंधंचाक्षित्वा
सर्वेसमुद्रा॰ गंगेचयमुने॰ इमंमेगंगेइतिआपोहिष्ठानवानांसिंधुद्वीपोगायत्रीपं
चमीवर्धमानगासप्तमीप्रतिष्ठांत्येहेनुष्टुभौ॥ नहितेक्षत्रमित्येकविंशावर्सस्प्रुनःशे ५२
पोवरुणोदशात्रिष्टुभौ यायंगायत्र्यःस्वादिष्टयेति॥ रत्नानांमधुछंदाःपंचमानसो
मोगायत्री॥ इतिकुंभमभिमंत्र्य॥ स्वस्तिवाचनपुण्याहवाचयेत॥ यथा—स्तसम

स्तव्याहृतीनांमन्त्रिभृगुभरद्वाजवृहस्पत्यश्छंदांसिग्रहावाहनेवि॰॥ ॐभूरादित्यमावाह
यामिॐभुवरा॰ मिॐस्वरा॰ मिॐभूर्भुवस्वरा॰ मि॥ आकृष्णेनहिरण्यस्तूपःसवितात्रि
ष्टुप्मंत्रांतेभगवन्नादित्यग्रहाधिपतेत्रिलोकप्रकाशकत्रिदेवतामयमूर्त्तेनसप्त
स्तेसप्तच्छारुणध्वजपताकोपशोभितेनसप्ताश्वरथवाहनेनामेरुप्रदक्षिणाकुर्वन्ना
गच्छामिरुग्भ्यांसहपद्मकर्णिकायांताम्रप्रतिमांप्राङ्मुखोवर्त्तुलोरूपोगेधितिष्ठ
पूजार्थत्वामावाहयामि॥ तक्षिणेॐभूरादित्याधिदेवमग्निमावाहयामि॥ ॐभूव
रा॰ ॐस्वरा॰ ॐभूर्भुवस्वरा॰॥ अग्निकाण्वोमेधातिथिरग्निर्गायत्रीमंत्रांतेपिंज
रुक्रमश्मश्रुकेशांपिंगाक्षत्रिनयनमरुणवर्णछागस्थंसाक्षसूत्रंसप्तार्चिषंशक्तिध
रवरदहस्तद्वयमादित्याधिदेवमग्निमावाहयामि॥ तद्वामेॐभूरादित्यप्रत्यधिदे

ग्रां०र० ४३

वंरुद्रमावाहयामि॥ ॐभुवरु० ॐस्वरु० ॐभूर्भुवस्वरु०॥त्र्यंबकमितिवसिष्ठोरुद्रोनु
ष्टुप्मंत्रांते त्रिलोचनंपंचवक्त्रंवृषारूढंकपालंमृगलखट्वांगधारिणंचंद्रमौलिंस
दाशिवमादित्यप्रत्यधिदेवरुद्रमा०॥ १॥ततआग्नेयदले॥ ॐभूःसोमंआवाहया
मिइत्यादि॥आप्यायस्वगौतमःसोमोगायत्रीमंत्रांतेभगवन्सोमद्विजाधिपते
सुधामयशरीरअत्रिगोत्रयमुनादेशेश्वरगौक्षीरधवलांगकांतेद्विभुजगदावर
दांनांकितकरशुक्लांबरमाल्यानुलेपनसर्वांगाशक्तिमौक्तिकाभरणरमणीयस
मस्तलोकाप्यायकदेवतास्वाद्यमूर्त्तेनमस्तेस्तसन्नद्धधवलध्वजपताकोपशो ४३
भितेनदशाश्वेताश्वरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छमित्रपापावसहप
आग्नेयदलमध्येस्फुटिकप्रतिमांप्रत्युअसुखीचतुरस्रपीठेधितिष्ठपूजार्थंत्वा

मावाहयामि॥ तद्दक्षिणेआपं॥ व्याहृत्यनंतरंअप्सुमेसिंधुद्वीपआपोगायत्रीमंत्रां
तेस्त्रीरूपधारिणीःश्वेतवर्णामकरवाहनाःपात्राकलशाधारिणीर्मुक्ताभरणभू
षिताःसोमाधिदेवताआपआवाहयामि॥वामेव्याहृत्यनंतरंगौरीर्मिमायदीर्घ
तमाउमाजगतीमंत्रांतेक्षसूत्रकमलदर्पणकमंडलुधारिणींत्रिदशपूजितां
सोमप्रत्यधिदेवतांगौरीमा० २॥दक्षिणेव्याहृत्यनंतरंअग्निर्मूर्द्धाविरूपोंगार
कोगायत्रीमंत्रांतेभगवन्नंगारकाम्भांकतेभारद्वाजगोत्रावंतिदेशेश्वरज्वालापुं
जोपमांगाक्षतेचतुर्भुजशक्तिशूलगदाखट्वांगधारिन्रक्तांबरमाल्यानुलेपन
प्रवालाभरणभूषितसर्वांगदुरालोकदीप्तनमस्तेसन्नद्धरक्तध्वजपताकोप
शोभितेनरक्तमेषरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छभूमिस्कंदाभ्यांस

ग्रां०र०
४४

हपद्मदक्षिणदलमध्येरक्तचंदनंप्रतिमांदक्षिणाभिमुखत्रिकोणपीठेधितिष्टपू-
जार्थंलामा०॥तद्दक्षिणेव्याहृत्यनंतरंस्योनापृथिवीतिमेधातिथिर्भूमिर्गायत्रीमंत्रांते
शुक्लवर्णांदिव्याभरणभूषितांचतुर्भुजांसौम्यवपुषांचंद्रांशुसदृशांबरांरत्नपा
त्रसस्यपात्रओषधीपात्रेत्र्ययोपेतकरांचतुर्दिक्षुपृष्ठगतामंगारकाधिदेवतां
भूमिमावा०॥वामेव्याहृत्यनंतरंकुमारश्चित्पितरंगृत्समदस्कांदत्रिष्टुप्मंत्रां
तेषण्मुखंशिखंडकविभूषणंरक्तांबरधरंमयूरवाहनंकुक्कुटघंटापताकाशा
क्त्युपेतचतुर्भुजमंगारकप्रत्यधिदेवतास्कंदमा०॥ततऐशान्यांव्याहृत्यनंत
रं॥उद्बुध्यस्वेंबुधःसौम्याबुधस्त्रिष्टुप्॥मंत्रांतेसौम्यसौम्याकृतेसर्व‾न ४४
ममात्रगोत्रमगधदेशोद्भवरक्तकुंकुमवर्णांगकृतेचतुर्भुजखड्गखेटगदावरदा

BHAU DAJI MEMORIAL

नांकितकरपीतांबरमाल्यानुलेपनमरकताभरणालंकृतसर्वांगविबुधपतेनम
स्ते॥सन्नरूपीतध्वजपताकोपशोभितेनचतुःसिंहरथवाहनेनमेरुंप्रदक्षि-
णीकुर्वन्आगच्छविष्णुपुरुषाभ्यांसहपद्मेशानदलमध्येसुवर्णप्रतिमामुदङ्मु
खीबाणाकारपीठेधितिष्टपूजार्थंला०॥तदग्रमेत्तरयोर्भूर्विष्णुमा०॥इदंविष्णुर्मे
धातिथिर्विष्णुर्गायत्री॥सहस्रशीर्षानारायणःपुरुषोनुष्टुप्मंत्रद्वयांते॥कौमोद
कीपद्मशंखचक्रोपेतचतुर्भुजौसौम्याधिदेवतांविष्णुंप्रत्यधिदेवतांपुरुषंचावा-
हयामि॥उत्तरदलेव्याहृत्यनंतरंबृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप्मंत्रांते
भगवन्बृहस्पतेसमस्तदेवताचार्यांगिरसगोत्रसिंधुदेशोद्भवरक्तसुवर्णव
र्णांगदीप्तचतुर्भुजदंडकमंडलुअक्षसूत्रवरदानांकितपीतांबरमाल्यानुलेप-

ग्रां०र० नपुष्यरागमयाभरणारमणीयसमस्तविद्याधिपत्तेनमस्तेसत्त्वरूपीतध्वजेन
४५ पीताम्बरथवाहनेनागछेस्त्रसभ्यांसहपत्रोत्तरदलमध्येसुवर्णप्रतिमामुद
ग्रखींदीर्घचतुरस्रपीठेति०॥ दक्षिणेम्माहूत्सनंतरंइंद्रज्येष्ठाग्निरुक्तमहेंद्र
स्त्रिष्टुप्मंत्रांतेचतुर्दंतगजारूढंवज्रांकुशधरंशचीपतिंनानाभरणभूषितंवृह
स्पत्यधिदेवतामिंद्रंमा०॥ वामेम्माहूत्सनंतरंब्रह्मणात्तेब्रह्मपुत्राविश्वामित्रो
ब्रह्मात्रिष्टुप्मंत्रांतेपद्मासनस्थंजटिलंचतुर्मुखमक्षमालास्रुवपुस्तककम
ण्डलुधारिणंकृष्णाजिनवाससंस्थंपार्श्वस्थितहंसंबृहस्पतिप्रत्य देवतांब्रह्मा ४५
णमा०॥ सर्वदलेषुकंतेअन्यदितिभरद्वाजमुक्तस्त्रिष्टुप्मंत्रांतेभगवन्भार्ग
वसमस्तदैत्यगुरोभार्गवगोत्रभोजकटदेशेश्वररजतोच्चलांगकांतेचतुर्भुजि

दंडकमंडलुत्वक्षसूत्रवरदानांकितशुक्लांबरमाल्यानुलेपनवस्त्राभरणभूषितसर्वांग
समस्तनीतिशास्त्रनिपुणमतेनमस्तेसत्तध्वशुक्लध्वजपताकोपशोभितेनशुक्ला
म्बरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागछ ेन्द्राणीभ्यांसहपद्मपूर्वदलमध्येरजतप्र
तिमांप्राङ्मुखांपंचकोणपीठेधितिष्ठपूजा०॥ तद्दक्षिणेम्माहूत्सनंतरंइंद्राणीष्टपा
कंपिरिंद्राणीपङ्क्तिःमंत्रांतेसंतानमंजरीवरदानधरद्विभुजांशुक्राधिदेवतामिंद्रा
णीमा०॥ म्माहूसंतेइं०अग्निर्देवतातयेमेधातिथिरिंद्रःप्रगाथोबृहती॥ मंत्रांते
चतुर्दंतगजारूढंवज्रांकुशाधरंप्राचीपतिंनानाभरणभूषितंभार्गवप्रत्यधिदेव
तामिंद्रः॥ पश्चिमदलेम्माहूसंतेशामग्निरिरिंविविःशान्तिराह्णिकमंत्रांतेभ
गवन्शनेश्वरभास्करतनयकाश्यपगोत्रसुराष्ट्रदेशेश्वरकज्जलनीलांग

ग्रां०२०
४६

कांतेचतुर्भुजचापतूणीरकृपाणाभयांकितनीलांबरमाल्यानुलेपननीलरत्नभूष
णालंकृतसर्वांगसमस्तभुवनभीषणामयमूर्त्तेनमस्तेसन्नद्धनीलध्वजपताको
पशोभितेननीलगृध्ररथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छ प्रजापतिमा०॥ वामे
व्याहृत्यंतेयमायसोमंयमोनुष्टुप॥ इन्द्राण्यां तुदंडहस्तरक्तदंष्ट्रांपाशधरंकृष्णवर्णंम
हिषारूढंसर्वाभरणभूषितंज्ञानेश्वरप्रत्यधिदेवतांयममा०॥ नैऋत्यदलेव्याहृ
त्यंतेकयानोवामदेवोरोहगायत्री॥ मंत्रांतेभगवन्नराहोरविसोममर्दनसिंहिकानं
दनपैठीनसिगोत्रबर्बरदेशेश्वरकालमेघकृतेव्याघ्रवदनचतुर्भुजखड्गचर्म
शूलवरदानांकितकृष्णांबरमाल्यानुलेपनगोमेदिकाभरणभूषितसर्वांगशौर्य ४६
निधेनमस्तेसन्नद्धकृष्णध्वज०॥ कृष्णसिंहरथगतसर्पकालाभ्यासहपत्नैस्स्र

त्यदलमध्येसीसकप्रतिमांदक्षिणाभिमुखीं शूर्पाकारपीठेधिति०मि॥ दक्षिणेव्या
हृत्यंतेआयंगोसार्पराज्ञीसर्पागायत्रीमंत्रांतेसाक्षसूत्रधराकुंडलिकाकारपु
च्छयुक्तानेकभोगांस्त्रीभोगांनभीषणान्सर्पान्राहुर्धिदेवतां०॥ राहुवामेव्या
हृत्यंतेपरंमृत्योसंकुसुकोमृत्युस्त्रिष्टुमंत्रांतेकरालवदनंनीलांगंभीषणंपाश
दंडधरंसर्पवृश्चिकरोमाणंराहुप्रत्यधिदेवतांकालमा०॥ वामव्यदलेव्याहृ
त्यंतेकेतुंमधुच्छंदः केतुर्गायत्रीमंत्रांतेभगवन्केतोकामरूपजैमिनिगोत्र
मध्यदेशाम्बरधूम्रवर्णध्वजाकृतेद्विभुजगदाधरदावरदानांकितचित्रांबर
माल्यानुलेपनवैडूर्यमयाभरणभूषितसर्वांगचित्रगात्रेनमस्तेसन्नद्धचि
त्रध्वजपताकेनचित्रकपोतरथवाहनेनमेरुंप्रदक्षिणाकुर्वन्नागच्छत्र

ग्रा०र० ४१ श्रीचित्रगुप्ताभ्यांसहपश्चिमवायव्यदलमध्येकेतोःप्रतिमांदक्षिणामुखींध्वजाकारपी
ठे॥ धृतिष्टपूजार्थेत्वामा०॥ आहस्त्यंतेब्रह्मन्यानंनकुलोब्रह्मात्रिष्टुप्॥ मंत्रांतेपद्मा
सनस्थंजटिलंचतुर्मुखमक्षमालास्रुवपुस्तककमंडलुधरंकृष्णाजिनवाससंपार्श्व
स्थितहंसंकेत्वधिदेवतांब्रह्माणमावा०॥ आहस्त्यंतेसवितुश्चित्रंभरद्वाजश्चित्रगुप्त
स्त्रिष्टुप्मंत्रांतेउदारवेषंसौम्यवपुषंलेखनीपत्रोपेतंद्विभुजंकेतुप्रत्यधिदेवतां
चित्रगुप्तमा०॥ ततःशनैर्वामभ्याहस्त्यंतेआतूनइंद्रकरावःकुसीदोविनायकोगा
यत्रीमंत्रांतेचतुर्भुजंत्रिनेत्रंगजाननंनागयज्ञोपवीतिनंचंद्रधरंदंडाक्षमालापरश
शुमोदकोपेतंविनायकमा०॥ तद्दक्षिणेआहस्त्यंतेजातवेदसंकश्यपोदुर्गात्रिष्टुप् ४१
॥ मंत्रांतेशक्तिबाणशूलखड्गचक्रचंद्रबिंबखेटकणशुकटंकोपेतसशांभु॥

जांसिंहारूढांदुर्गामदैत्यासुहारिणींदुर्गामा०॥ तद्दक्षिणेआहस्त्यंतेक्षेत्रस्यवामदेवःक्षे
त्रपालोनुष्टुप्मंत्रांतेश्यामवर्णंत्रिलोचनमूर्ध्वकेशंसुदंष्ट्रंभ्रूकुटीलाकुटिलाननंनूपु
रालंकृतांघ्रिसर्पमेखलपादुकासर्वांगमतिक्रुद्धंक्षुद्रघंटावरुग्युल्कावलंबितकरो
टिकमालाधारिणमुरगकौपीनंचंद्रमौलिंदक्षिणहस्तेशूलवेतालखड्गडमरुभीदधानं
वामहस्तैःकपालधराचर्मचापान्दधानंभीमंभीमंदिग्वाससम्मसितध्यातिक्षेत्रपा
लमा०॥ तद्दक्षिणेआहस्त्यंतेकाणानात्रीमुख्यभोवायुरुष्णिक्मंत्रांतेधावध्वराणिपृष्ठ
गतंध्वजवरदानधारिणंधूम्रवर्णंवायुमा०॥ तद्दक्षिणेआहस्त्यंतेआदित्रिक्षोतरिक्षं
गायत्री॥ नीलोत्पलाभंनीलांबरधारिणंचंद्राकोर्पेतद्विभुजषंडमाकाशमा०॥ तद्दक्षि
णेआहस्त्यंतेअश्विनावर्त्तिर्गोतमोअश्विनावुष्णिक्॥ प्रत्येकमोषधीपुस्तकोपेतदक्षिण

ग्रा॰र॰ ४८ वामहस्तावन्योन्यसंयुक्तदेहावेकस्यदक्षिणपार्श्वेपरस्परवामपार्श्वेर्त्तभांडकरश्रु
क्तांबरधरनारीयुग्मोपेतौदेवभिषजावश्विनामा॰॥ ततोदक्षाग्नेदिंद्रादीन्॥ व्याहृ
त्यंतेइंद्रंकामधुच्छंदःइंद्रोगायत्रीरक्तवर्णसहस्राक्षंवज्रपाणिंप्राचीप्रियमिंद्रमा॰॥ व्या
हृत्यंतेअग्निमीळेमधुच्छंदाअग्निर्गायत्रीस्वर्णवर्णंसप्तार्चिषंसप्तहस्तंशक्तिस्रुक्
स्रुवतोमरभंजनघृतपात्राणिदधानंस्वाहाप्रियंमेषवाहनमग्निं॰॥ व्याहृत्यंतेमो
षुणोघोरःकण्वोनिरृतिर्गायत्रीनीलवर्णंखड्गचर्मधरमूर्ध्वकेशंनरवाहनंकालि
काप्रियंनिरृतिं॰॥ व्याहृत्यंतंउदुत्तमंमुमुग्धिशुनःशेपोवरुणोगायत्रीरक्तभूषणं ४८
नागपाशधरंमकरवाहनंपद्मिनीप्रियंवरुणमा॰॥ व्याहृत्यंतेतववायोवसिष्ठोवायु
र्गायत्री॥ श्यामवर्णंहेमदंडधरंकृष्णमृगवाहनंजगत्प्राणरूपंमोहिनीप्रियंवायु

मा॰॥ व्याहृत्यंतेत्वंनःसोमविश्वतोगोतमःसोमोगायत्रीस्वर्णवर्णंनिधीश्वरंकुंतपाणि
मश्ववाहनंचित्रिणीप्रियंकुबेरमा॰॥ व्याहृत्यंतेकद्रुद्रायकण्वोरुद्रोगायत्रीशुद्धस्फु
टिकवर्णंवरदाभयशूलाक्षसूत्रधरंवृषभवाहनंगौरीप्रियमीशानमा॰॥ कुंभेवरुणंपूर्व
वदावाह्यस्वस्वर्णवस्त्रगंधधूपैःपुष्पांतंसंपूज्याग्निप्रतिष्ठादिचक्षुष्यंतेसूर्यमग्निंरु
द्रंवायुंचक्तसं॰ स्वार्कसमिच्चवाज्यैःसोममयांगौरींचपलाशसमिच्चवाज्यैःरंकारकं
भूमिस्कंदंखदिरसमिच्चवाज्यैर्बुधंविष्णुरूपमपामार्गसमिच्चवाज्यैर्बृहस्पतिंब्रह्माण
मिंद्रंचाश्वत्थसमिच्चवाज्यैःशुक्रंमिंद्राणीमिंद्रमौदुंबरसमिच्चवाज्यैःशनिंप्रजापति
यमंशमीसमिच्चवाज्यैराहुंसर्पंकालंदूर्वासमिच्चवाज्यैःकेतुंब्रह्माणंचित्रगुप्तंकुशा
चवाज्यैर्विनायकंदुर्गाक्षेत्रपालंवायुमाकाशमश्विनोइंद्रादींश्चप्रधानविंशांशेनप

ग्रां०२० ४५

लाज्ञासमिच्चर्वाज्यैरग्निवायुसूर्यप्रजापतीनमुकसंख्ययातिलव्रीहिभिःसूर्यंत्रयो
दशावारमाज्येनाग्निंचतुस्त्रिंशद्वारंरुद्रंद्वात्रिंशद्वारंशेषेणस्विष्टकृतमित्यादिनिर्वा
पादिनाचरुंहंकृत्वाचतुर्थ्यंतेहोमः॥लोकसिद्धएवचरुरितितन्त्रेवतदग्न्यावधिमित्या
भिघार्योद्वास्यबर्हिष्यासाद्यप्रत्यभिघारणंसंस्कारः॥सूर्यादिभ्यःप्रागुक्तैर्मंत्रैर्होम
:मध्यमानामिकांगुष्ठैर्मध्वाज्येदधिक्षीरान्यतराक्तसमिद्धोमः हस्तेनग्रासमात्रं
चरुहोमः॥आज्यंस्रुवेणाश्वत्थपर्णेनवा॥व्यस्तसमस्तव्याहृतिभिस्तिलव्रीहिहो
मः॥ततोमंत्रैराज्यहोमः॥यथा॥सूर्योनइतिपंचानांचक्षुःसूर्योगायत्री॥उदुत्यंप्र ४५
स्कण्वःसूर्योगायत्री॥नमोमित्रस्याभितपाःसूर्यो जगती॥चित्रंदेवानांकुत्सःस्त्रि
ष्टुप्॥उद्वेतिसुभगःपंचानांवसिष्ठःसूर्यस्त्रिष्टुप्त्वमग्नेप्रथमइत्यष्टादशानांहिर

ण्यस्तूपोग्निर्जगती॥कद्रुद्रायेतिषण्णांघोरःकाण्वोरुद्रोगायत्री॥इमारुद्रायतव
सइत्येकादशानांकुत्सोरुद्रोजगतीत्रिष्टुभौ॥आस्तेपितरितिपंचदशानांगृत्स
मदोरुद्रस्त्रिष्टुप्॥ततोगृहादीनांधूपदीपनैवेद्यादिपूजांकृत्वास्विष्टकृदादिप्रा
यश्चित्तहोमांतेसमुद्रादितिरित्यादेःपूर्णाहुतिंहुत्वापूर्णपात्रविमोकादिसमाप्यैशा
न्यांपंचरंगस्वस्तिकपीठेकुशोपरियजमानंसहेमकुशौदुंबरीशाखयाकुंभोदकै
रभिषिंचेयुः॥आपोहिष्ठेतिनवभिः प्रसंम्राज्ञेइत्यष्टानामभिःवरुणस्त्रिष्टुप्
त्वादिष्टयादशानांमधुच्छंदाःपवमानसोमोगायत्रीअग्नइन्द्राग्नीपंचदशानांवासि
ष्ठोविश्वेदेवास्त्रिष्टुप्॥पवित्रंतेविततपंचानांपवित्रःपवमानसोमोजगती॥ग्र
सर्वेग्रहाणामादित्योलोकरक्षणकारकः॥विषमस्थानसंभूतांपीडांदहतुतेरविः

ग्रं०२० ४५० रोहिणीशःसुधामूर्त्तिःसुधागात्रःसुधाशनःविषमस्थानसंभूतांपीडांदहतुत्तेविधुः

॥भूमिपुत्रोमहातेजाजगतांभयकृत्सदा॥वृष्टिकृद्वृष्टिहर्त्ताचपीडांदहतुत्तेकुजः॥

उत्पातरूपोजगतांचंद्रपुत्रोमहाद्युतिः॥सूर्यप्रियकरोविद्वान्पीडांदहतुत्तेबुधः

देवमंत्रीगुरुस्तेषांप्रणादश्चमहीमतिः॥प्रभुस्ताराग्रहाणांचपीडांदहतुत्तेभृगुः

॥सूर्यपुत्रोदीर्घदेहोविशालाक्षःशिवप्रियः॥मंदचारःप्रसन्नात्मापीडांदहतुत्तेशनिः

॥महाशिरामहावक्त्रोदीर्घजंघोमहाबलः॥अतनु — र्ध्वकेशश्चपीडांदहतुत्ते

तमः॥अनेकरूपवर्णैश्चशतशोथसहस्रशः॥उत्पातरूपेजगतःपीडांदहतुत्ते

शिखी॥ततोहिरण्यवर्णामितिश्रीसूक्तेनेमाआपइतित्रिभिर्देवस्यत्वेत्यंतेभू

र्भुवस्वरितिचाभिषिक्तोयजमानोदिक्पालग्रहादिभ्योमाषभक्तबलींदत्वा।   ५०

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारक

ग्रहाणामुत्तरपूजांतेत्याहुतिभिरुद्वास्याचार्यादिभ्योजपहोमफलंगृहीत्वाधेनुंशं

खंरक्तवृषंहेमपीतवस्त्रंश्वेताश्वंकृष्णांगां — हंगजंछागंवासर्वाभावेहिरण्यंवादक्षि

णांदत्वाकांस्यपात्रेआज्येरूपंरूपमितिप्रतिबिंबंविलोक्यआज्यंतेजःसमुद्दिष्टमा।

ज्यंपापहरंस्मृतं॥आज्येसुराणामाहारआज्येदेवाःप्रतिष्ठिताःइतिसदक्षिणं

त्वदत्वा॥हुतोत्रांतेसहस्त्रेवैकंयथाशक्तिवाविप्रान्संभोज्याशिषोगृहीत्वापूर्णत्तां

वाचयित्वाकर्मेश्वरार्पणंकृत्वाभुंजीत॥अयंबह्वृचपरिशिष्टोक्तेबह्वृचानांनियतः

॥एवमन्येस्वशाखोक्तश्चेत्सएववाकार्यः॥अन्यैःशाखांतरस्थःस्मार्त्तोवा॥अयं

सूत्रेऽनुक्तत्वात्लौकिकाग्नौकार्योनगृह्याग्नौयेषांगृह्येउक्तस्तदभावेवासर्वोर्थगृह्यो

त्पत्तिस्तैःकातीयादिभिर्गृह्येएवेतिदिक्॥ ॥इतिश्रीमन्नारायणभट्टसूनुमहोपा

ध्यायरामकृष्णभट्टात्मजकमलाकरभट्टकृते शांतिरत्ने कृच्छ्रग्रहयज्ञः ॥ ॥ ॥
अथ प्रसवशांतयः ॥ तत्र बहुप्रसवेषक्तत्वा ऊर्ध्वमुखप्रसव उच्यते ॥ गर्गः ॥ प्राणि
मत्स्यरविवं हस्ते प्रायश्चित्तमनुस्मरन् ॥ सर्वारिष्टविनाशाय पंकजं ज्योतिरार्णवे ॥ १
पित्रारिष्टे सुतारिष्टे मात्रारिष्टे तथैव च ॥ यन्नक्षत्रोत्पत्तौ पित्राद्यरिष्टं तत्रेदं कुर्या १
दित्यर्थः ॥ प्रायश्चित्तं तदा कुर्यात्तत्तद्दोषस्य शांतये ॥ पूषाश्विनो गुरोः सर्पमैत्र्या १
चित्रेंद्रमूलभं ॥ एषु नक्षत्रेषु जातस्य कुर्याच्छांतिं जनकं तथा ॥ तथा शब्दः समुच्चया
र्थः तेन पित्रारिष्टादौ तत्तन्नक्षत्रशांतिं कृत्वा एतच्च कुर्यादित्यर्थः ॥ पित्रारिष्टे इ ५१
त्यनेनैव मूलादावपि प्राप्ते पुनर्मूलादिग्रहणं यत्र मूलादेश्चतुर्थपादादौ तद
भावस्तत्रापि प्राप्त्यर्थं ॥ जन्मर्क्षे च त्रिजन्मे शुभवारे शुभे दिने ॥ कृत्वाभ्यंगादि

कं सवर्ग हालंकारपूर्वकं ॥ गोमयेनोपलिप्याथ गृहस्येशानभागके ॥ पंकजं क १
र्णिकायुक्तं रजोभिः श्वेतवर्णकैः ॥ व्रीहीँस्तत्र विनिक्षिप्य यथावित्तानुसारतः ॥ न
वसूत्रं च तन्मध्ये रक्तवस्त्रं प्रसारयेत् ॥ स्थापयित्वा शिशुं तत्र पुनः सूत्रेण वेष्टये
त् ॥ प्राङ्मुखं तमाकल्प्यानंतिलगर्भगतं शिशुं ॥ गोमुखं दर्शयित्वाथ पुनर्जातं
तु गोमुखात् ॥ विष्णुर्योनिमिति सूक्तेन गमेन स्नपयेच्छिशुं ॥ गवामंगेषु मंत्रे १
ण गवामंगेषु संस्पर्शयेत् ॥ विष्णोः श्रेष्ठेन मंत्रेण गोप्रसूतं तु बालकं ॥ आचार्यस्तु स
माद्राय पश्चा — त्रे प्रदीपयेत् ॥ वस्त्रे के स्थाप्य तु पिता पुत्रस्य मुखमीक्षयेत् ॥ गोमूत्रं
गोमयं क्षीरं दधिसर्पिश्च संयुतं ॥ आपो हि ष्ठादिभिर्मंत्रैरभिषिंचेत्ततः शिशुं ॥ मूर्ध्नि
चामाय तं पुत्रं तन्मंत्रेण तदा पिता ॥ अंगादंगात्संभवसि हृदयादधिजायसे ॥ ओ १

ग्रां०र० ५२ त्वा वै पुत्रनामासि स जीव शरदः शतं॥ मूर्ध्नि त्रिरवघ्राय तं शिशुं स्थापयेत्ततः॥ पुण्या
हं वाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः॥ दक्षिणामथ विप्राय तां गामभ्यर्च्य दापयेत्॥ गोव
स्त्रस्वर्णधान्यानि दद्यादर्कादितः क्रमात्॥ यथाशक्ति धनं दद्याद्ब्राह्मणेभ्यस्तु दा
पिता ततो होमं प्रकुर्वीत स्वस्वशाखोक्तमार्गतः उल्लेखनादिकं कृत्वा चाज्यभागां
तमाचरेत्॥ होमस्येशानदिग्भागे धान्योपरि शुभं घटं पंचगव्यं घटे स्थाप्य तिलां
स्तत्र विनिक्षिपेत्॥ क्षीरिद्रुमकषायांश्च पंचरत्नानि निक्षिपेत्॥ कषायो निर्यासः
वस्त्रयुग्मेन संस्थाप्य गंधादिभिरथार्चयेत् विष्णुं वरुणमभ्यर्च्य प्रतिमास्व विधान ५२
तः॥ यत इंद्रादिभिर्मंत्रैः कुंभस्पृष्ट्वाभिमंत्रयेत्॥ यत इंद्रेतिष— चसूक्तशेषं॥
दधिमध्वाज्ययुक्तेन होमं कुर्यात्प्रयत्नतः॥ युक्तेनेति भावे क्तः योगेनेत्यर्थः॥

आपो हि ष्ठेति तिसृभिरप्सुमे सोम इत्यथ॥ तद्विष्णोः परमं पदमग्नीभ्यां नेति सूक्ततः
अग्निराभिः प्रत्यृचं चाष्टाविंशतिसंख्यया॥ शतानामष्टसंख्यं वा दधिमध्वाज्यसं
युतं आदित्यादिग्रहाणां च होमं कुर्यात्समंत्रकं॥ ग्रहाणां च दध्यादियुतं होमं
कुर्यादित्यर्थः॥ अन्यथा पुनर्दध्यादिग्रहणस्य वैयर्थ्यापत्तेः॥ अथ प्रयोगः॥
कर्त्तास्य बालस्यामुकनक्षत्रोत्पत्तिसूचितारिष्टशांत्यर्थं गोमुखप्रसवं करिष्य इ
ति संकल्प्य गणेशं संपूज्याचार्यं वृणुयात्॥ आचार्यः श्वेतचूर्णैः पद्मं कृत्वा तत्र व्री
हिपुंजे रक्तवस्त्रे तिलान्वा कीर्य सूर्पे प्राङ्मुखं शिशुं निधाय सूत्रेण सूर्पं यित्वा शिशु
समीपे गोमुखमानीय प्रसवविभागविष्णुर्योनिमिति सूक्तेन पंचगव्येन शिशुं स्न
पयित्वा गवामंगेषु इति मंत्रेण गां स्पर्शयेत्॥ ततो शिशुं स्नपयित्वा गवामंगे चेति २

शां०र०
५३

मंत्रेणगांस्पृशेत्॥ ततोविष्णोश्रेष्ठेनेतिशिशुमादायमात्रेदद्यात्॥ मातापित्रे॥ ततः
पितामात्रेदत्वापुत्रमुखमीक्षेत्॥ ततआचार्यःशिशुंपंचगव्येनापोहिष्ठेतितिसृ—
भिरभिषिंचेत्॥ ततःपिताअंगादंगादितिशिशुंमूर्ध्नित्रिरवघ्रायास्यगोमुखप्रस
वस्यपुण्याहंभवंतोब्रुवंतु॥ एवंस्वस्तिश्रीः॥ कल्याणमितित्रिस्त्रिर्वाचयित्वाचा
र्यपतांगांदत्वाग्रहप्रीत्यर्थंगोवस्त्रस्वर्णधान्यानियथाशक्तिभूयसींचदद्यात्॥ त
तआचार्योग्निंग्रहांश्चप्रतिष्ठाप्यान्वाधानेचक्षुषीआज्येनेत्यंतमुक्त्वात्रप्रधानंअ
पश्चतुर्वारंदधिमध्वाज्येनविष्णुंसकृत्पत्नग्रहणंअक्षीभ्यामितिसूक्तेनप्रत्यृचम ५३
ष्टाविंशतिसंख्ययाअष्टसंख्ययावाग्रहानेकैकयाहुत्याशेषेणस्विष्टकृतमित्यादि
आज्यभागांतेस्थंडिलेशान्यांकुंभंसंस्थाप्यतत्रपंचगव्यंतिलान्क्षीरिद्रुमकषायांश्च

क्षिप्त्वावस्त्रयुग्मेनावेष्ट्यपूर्णपात्रेतद्विष्णोरितिविष्णुंतत्वायामितिवरुणंचावाह्यसंपूज्य
कुंभंस्पृष्ट्वाजपेत्॥ यत्तेइंद्रेतिषण्णांकण्वपुत्रःप्रगाथइंद्रोबार्हतंप्रागाथछंदः एताने
जप्त्वायजमानेनत्यागेकृतेमिलितैर्दधिमध्वाज्यैःप्रत्यृचमष्टाविंशतिसंख्ययाष्ट
संख्ययावाकुर्यात्॥ आपोहिष्ठेतितिसृणांसिंधुद्वीपोगायत्र्यापः॥ अप्सुमेधातिथि
रापोनुष्टुप्तद्विष्णोर्मेधातिथिर्विष्णुर्गायत्री अक्षीभ्यामितिषण्णांविवृहायक्ष्मघ्ना
नुष्टुप्॥ एतैर्ग्रहमंत्रैश्चदधिमध्वाज्यहुत्वास्विष्टकृदादिशेषंसमाप्यब्राह्मणान्
भोजयेत्॥ ॥इतिगोमुखप्रसवप्रयोगः॥ ॥अथतिथिनक्षत्रयोगक्रमेण
प्रसवशांतयउच्यंते॥ तत्रादौगंडांतःसविधिः॥ तिथिलग्ननक्षत्रभेदात् गंडां
तोनामसंधिघटिकाःस्मृतोज्योतिर्निबंधे॥ पूर्णानंदाख्ययोस्तिथ्योःसंधिनाडी

द्वयंतथा॥ गंडांतंमत्युदंजन्मयात्रोद्वाहव्रतादिषु॥ कुलीरसिंहयोःकीटचापयोर्मी
नमेषयोर्गंडांतमंतरालंस्या—कार्धमृत्तिप्रदं॥ सार्पेंद्रपौष्णभेषुंत्यघटोडुशां
ग्राभसंधयः॥ तदग्रभेष्वाद्यभागाभानांगंडांतसंज्ञकाः॥ रत्नमालायांतुनक्षत्रेषु
न्यथोक्तं॥ पौष्णाश्विन्योःसार्पपित्र्यर्क्षयोश्चयच्चज्येष्ठामूलयोरंतरालं तद्गंडांतं
स्याच्चतुर्नाडिकंहियात्राजन्मोद्वाहकालेष्वनिष्टं॥ अत्रदोषस्तीरतम्यंज्ञेयं रत्नसं
ग्रहे॥ सर्वेषांगंडजातानांपरि—गोविधीयते॥ वर्जयेद्दर्शनंयावत्तच्चषाण्मासि
कंभवेत्॥ तिथ्यर्क्षगंडेपितमातनाशोलग्नेतुसंध्येत्तनयस्यनाशः॥ सर्वेषुनो
हंतिजीवतिहंतिनघ्नन्जीवन्पुनःस्याद्बहुवारणाश्च॥ प्रयोगपारिजातेगर्गः
अश्विनीमघमूलादित्रिषट्चनवनाडिका॥ रेवतीसार्पशाक्रांतेमासाश्चक्रतु

सार्पकाः॥ अश्विनीमघमूलादौनाडिकाद्वितयंतथा॥ रेवतीसार्पशाक्रांतेनाडिकाद्व
यमेवहि॥ अश्विनीमघमूलानांपूर्वार्धेबाध्यतेपिता॥ पूषाहिशाक्रपश्चार्धेजन
नीबाध्यतेशिशोः॥ पितृघ्नश्चादिवाजातोरात्रिजातस्तुमातृहा॥ दिवसगंडांत
नात्तस्यार्थः॥ आत्मघ्नसंध्ययोर्जातोनास्तिगंडेनिरामयः॥ सर्वेषांगंडजातानांपरि
त्यागोविधीयते॥ वर्जयेद्दर्शनंयावत्तच्चषाण्मासिकंभवेत्॥ तस्यशांतिंप्रवक्ष्या
मिसोमंमंत्रेणभक्तिमान्॥ कांस्यपात्रंप्रकुर्वीतपलैःषोडशभिर्नवं॥ अष्टाभिश्च
नं चतुर्भिर्वाद्वाभ्यांवाशोभवेत्तथा॥ तन्मध्येपायसेशंखेनवनीतेनपूरिते॥ राजतं
चंद्रमचेंत्सितपुष्पसहस्रकैः॥ देवज्ञःक्षौमवासास्तुशुक्लमाल्यावराचितः॥
सोमोहमितिसंचिंत्यपूजांकुर्यादतंद्रितः॥ जपेत्सहस्रकंमंत्रश्चद्द्र्यनःसमा

हितः॥ आर्घ्यस्तेति मंत्रेण पूजां कुर्यात्समाहितः॥ दद्याद्वेदविदे द्विपां मिष्टां गंडदो
षप्रशांतये॥ शुक्लं वासोद्वयं चैव ताम्रपात्रसमन्वितं॥ गंडदोषोपशांत्यर्थं दद्या
द्वेदविदे शुचिः॥ ज्योतिर्विदे धेनुमेतद्दद्यादधिकमुत्तमं॥ कुंकुमं चंदनं कुष्टं गोरोच
नमथापि वा॥ घृतपूर्णेषु कुंभेषु चतुर्षु प्रक्षिपेत्क्रमात्॥ सहस्राक्षेण मंत्रेण पा
बालकं स्नापयेन्नरः॥ पितृभुक्तं दिवाजातं मातृभुक्तं तु रात्रिजं॥ स्नापयेत्पित
मातृभ्यां संध्ययोरुभयोरपि॥ कांस्यपात्रं घृतपूर्णं गंडदोषोपशांतये॥ सक्षी
रमौक्तिकं शंखं श्वेतवस्त्रयुगं शुभं॥ यजुर्वेदविदे दद्यात्तद्गंडदोषापनुत्तये॥
दद्याद्धेनुं हिरण्यं च ग्रहांश्चापि प्रपूजयेत्॥ आयुर्वृद्धिकरं जप्त्वा कुर्याद्ब्राह्मण
तर्पणं॥ अत्र गोमुखप्रसवो ग्रहशांतिश्च कार्या॥ अन्यत्स्पष्टमिति प्रयोगो

तोच्यते॥ इति गर्गोक्तनक्षत्रगंडांतशांतिः॥ अथ तिथिलग्नगंडांतशांतिरत्नो
गार्ग्यः॥ अभुक्ते तरजातस्य सूतकांत्यदिने पवा॥ शांतिं शुभेऽह्नि वा कुर्यात्ताव
त्पुत्रं न लोकयेत्॥ तिथिगंडे त्वनड्वाहं नक्षत्रे धेनुरुच्यते॥ कांचनं लग्नगंडे तु गं
डदोषो विनश्यति॥ आद्यभागे पितुर्गंडं त्रपाणां माभिषेचनं॥ मातापित्रोस्त्रि
सृणामित्यर्थः॥ उत्तरात्तिष्यचित्रासु पूर्वाषाढोद्भवस्य च कुर्याच्छांतिं प्रयत्नेन न
क्षत्राकरजां बुधः तामेवाह॥ सुवर्णेन तदर्धेन यथा वित्तानुसारतः॥ नक्षत्राधिप
ते रूपं कृत्वा वस्त्रद्वयान्वितं॥ वरुणस्यार्चनं कार्यं स्वस्तिवाचनपूर्वकं॥ कुंभे वरु
णं नक्षत्राधिपतिं च पूजयेदित्यर्थः॥ शतौषधानि रत्नानि मृत्पंकपल्लवसंयु
तां॥ पूजांते समिदाज्यैर्होमं तिलयवैस्तथा॥ ततः पूर्णाहुतिं हुत्वा वेदाध्या

शां०र० ५६

यिकुटुंबिनो ॥ उत्तराप्रथमेपादेतिलपात्रंतथैव ॥ तिष्येतुगांसवत्सांचसुवर्णीलांचपयस्वि
नीं ॥ अजांचित्रासुवैदद्यात्पूर्वाषाढेतुकांचनं ॥ यवाश्चव्रीहिमाषांश्चतिजमुक्तान्प्रदा
पयेत् ॥ यथावित्तानुसारेणकुर्याद्ब्राह्मणभोजनं ॥ पितृरापुष्पवृक्षार्थंशांतिरत्नंविधी
यते एवंयःकुरुतेसम्यक्शांतिकर्मसमाहितः ॥ आयुरारोग्यमैश्वर्यंसंप्राप्नोतिदि
नेदिने ॥ इतितिथिलग्नगंडांतशांति ॥ अथदिनक्षयादिशांतिः ॥ उक्तंगार्ग्यः ॥
अथातःसंप्रवक्ष्यामिजन्मकालेविशेषतः ॥ गंडांतानांचनामानिमहादोषकराणि
च ॥ दिनक्षयेव्यतीपातेव्याघातेविष्टिवैधृतौ ॥ शूलेगंडेऽतिगंडेचपरिघेयमघंटके ५६
॥ कालगंडेमृत्युयोगेदग्धयोगेसुदारुणे तस्मिन्नाद्यदिनेप्राप्तेप्रसूतिर्यदिजा
यते ॥ अतिदोषकरीप्रोक्तातत्रपापयुतेसति ॥ दिनक्षयादौगंडांतंशांतिगोणः ॥ य

DR. BHAU DAJI

जनंदेवतानांचग्रहाणांचैवपूजनं दीपंशिवालयेभक्त्याघृतेनपरिदीपयेत् अभि
षेकंशंकरामअश्वत्थस्यप्रदक्षिणं आयुर्वृद्धिकरंजप्यंसर्वारिष्टविनाशनं मृत्युंजय
मंत्रस्यआयुर्विनाशनइत्यादेश्चजपमित्यर्थः गुरुदेवतविप्राणांपूजनंगोत्रवर्धनं स
र्वारिष्टहरार्थायग्रहयज्ञंसमाचरेत् शिवायविधिवद्भक्त्या प्रदानंकरोतियः अखं
डंगोघृतेनैवसर्वैमृत्युंजयेन्नरः विष्णुमूर्तिर्महापुण्यमश्वत्थंमालीकरंसदा प्रदक्षि
णंनरोजाप्यंकल्याममृत्युंजयीभवेत् मूलेवासार्पगेज्येवाकुर्याद्देनानियत्नतः आयु
र्वृद्धिकरार्थायगंडदोषप्रशांतये एषामूलादिशांत्यासमुच्चयः शतिगंडांतशां
ति अथविषयशांतिस्तत्रश्चाहज्योतिर्निबंधेवृद्धगार्ग्यः तिथिषुनागाद्रिगिरी
शाबारिधिगजाद्रिदिक्पावकदिक्भास्कराः मुनीभ १५।५।८७।११।४।८।७।१०।३॥

१०।१२।७।८। संख्या प्रथमातिथेः क्रमात्परं विषाख्यं घटिकाचतुष्टयं ॥८ विंशच्चतुर्दशश्चा
दिक्शैलावाणीश्च तत्त्वानि यथाक्रमेण ।२०।४।१२।१०।५।२।२५। सूर्यादिवारेषु भवत्य
नंतरनाड्यो विषाख्यं घटिकाचतुष्टयं ॥ नक्षत्रेष्वाह नारदः खमार्गणाः ५० वेदपक्षा २४ ख
रामा ३० व्योमसागरा ४० ॥ वार्धिचंद्रा १४ रूपदस्रा २१ खरामा ३० व्योमबाहवः २० ॥ द्विरा
मा ३२ ॥ खाग्नयः ३० शून्यदस्रा २० कुंजरभूमयः १८ रूपपक्षा २१ व्योमदस्रा २० वेदचं
द्र १४ श्चतुर्दश ॥ शून्यचंद्रा १० वेदचंद्राः १४ श्चतुर्दश १४ शून्यचंद्रा १० वेदचंद्रा १४ ष
ड्दस्रा २ वेदबाहवः २४ शून्यदस्रा २० शून्यचंद्राः १० पूर्णचंद्रा १० गजेंदवः १८ तर्कचंद्रा ५७
१६ वेदपक्षाः २४ खरामा ३० श्वाश्विभात्क्रमात् ॥ अभ्यः परमस्युर्घटिकाश्चतस्रो वि
षसंज्ञिताः ॥ शांतिमाह वरूगर्गः ॥ विषनाडीषु संजातः सर्वारिष्टभयप्रदः ॥ पित्त

मातुलमात्मा वंधा तयेनात्र संशयः ॥ मातुश्च विषज्ञास्त्वाद्यैस्त्रैः क्रूरे लग्नेंत्रगोपि वा त
दोषपरिहाराय च्छांतिकर्म समाचरेत् ॥ रुद्रो यमोग्निर्मृत्युश्च देवताः परिकीर्तिताः ॥
सुवर्णेन यथाशक्त्या तत्तल्लक्षणलक्षिताः प्रतिमाः कारयित्वा तु आढकव्रीहिभिः स्थ
ले स्थंडिलं परिकल्प्य घकुंभमोषधिसंयुतं ॥ जलैः संपूर्य संस्थाप्य मृदादि प्रक्षिपेत्ततः
॥ वस्त्रद्वयेन संवेष्ट्य पंचरत्नानि निक्षिपेत् ॥ कुंभोपरि तु संस्था --- स्तः प्रतिमा
स्तथा ॥ संस्थाप्य तत्र मंत्रैश्च क्रमादर्चेत् हुनेत्तथा ॥ समिच्चरुघृतद्रव्यैः प्रत्येकं च य
थाक्रमात् ॥ रुद्रलिंगैश्च सहाचार्यो हुनेदष्टसहस्रकं ॥ अष्टोत्तरशतं चाथ अष्टावि
शतिमेव वा ॥ ततस्तिलैर्हुनेद्देवांस्तत्तन्मंत्रैश्च कसवित् ॥ ततोभिषेचयेद्दानं मंत्रै
पौराणिकैः क्रमात् ॥ प्रीयतां भगवानीशः पिनाकी सर्वतोमुखः ॥ तवमूर्त्तिप्रसा

शां०र० नेनमपापंविनाशय॥दंष्ट्राकरालवदनोनीलांजनसमाकृतिः॥रक्ताक्षोलिंगदापा
५८ णिर्मह्युमर्पातुसर्वदा॥दानमेवंविधेमंत्रैर्यथाविधिसमाहितः॥गोभूहिरण्यवस्त्रै
श्चआचार्यंतजपेत्सुधीः॥एवंकुर्याद्विधानेनविषदोषःप्रशाम्यतिः॥ ॥इतिवि
षघटीशांति ॥अथतिथिप्रसवशांतिः॥ तत्रकृष्णेचतुर्दशीशांतिः॥प्रयोगपा
रिजातेउक्तस्गर्गः॥ कृष्णपक्षेचतुर्दश्यांप्रसूतेःषड्विधंफलं॥चतुर्दशींचषड्भागं
कुर्यादादौशुभंस्मृतं॥द्वितीयेपितरंहंतितृतीयेमातरंतथा॥चतुर्थमातुलंहंति
पंचमेवंशनाशनं॥षष्ठेचधनहानिःस्यादात्मनोवंशनाशनं॥तस्मात्सर्वप्रयत्ने
नशांतिकुर्याद्विधानतः॥आचार्यमृत्विजोवृत्वास्वस्तिवाचनपूर्वकं॥रुद्रादिदैवतां ५८
तस्याःकर्षमात्रसुवर्णतः॥तदर्धार्धेनवाकुर्याद्वित्तशाठ्यविवर्जितः॥प्रतिमांका

रयेच्छंभोःसर्वलक्षणसंयुतां॥वृषभेचसमासीनंवरदाभयपाणितं॥शुद्धस्फटिकसंका
शांश्वेतमाल्यांबराम्बितां॥त्र्यंबकेनमंत्रेणपूजांकुर्याद्विधानतः॥स्थापयेच्चरःकुं
भांश्चतुर्दिक्षुयथाविधि॥आग्नेयीमारभ्यविदिक्ष्वित्यर्थः॥आग्नेयकुंभमारभ्येत्यग्रेद
र्शनात्॥पुण्यतीर्थजलोपेतोधान्यस्योपरिविन्यसेत्॥तन्मध्येस्थापयेत्कुंभंशात
च्छिद्रसमन्वितं॥पंचधान्यंसुवर्णस्यतत्तन्मंत्रैर्विनिक्षिपेत्॥शतौषधानिनिक्षि
प्यश्वेतवस्त्रैश्चवेष्टयेत्॥सुरभाणिचपुष्पाणिश्वेतानिपरिवेष्टयेत्॥सर्वेसमुद्राः
सरितस्तीर्थानिजलदानदाः॥आयांतुयजमानस्यदुरितक्षयकारकाः॥आवाह्य
वारुणेमंत्रैरनेनचविधानतः॥इमंमेवरुणेत्यनयातत्वायामीतिवातथा॥त्वंनो
अग्नइत्यनयासत्वंन्नइतिमंत्रतः॥आग्नेयकुंभमारभ्यपूजांकुर्याद्विधानतः॥

शां०र०
५९

ग्रहस्येशानदिग्भागेकुंडंकुर्याद्विधानतः॥ विस्तरायाममखातंचअरत्निकमसंमितं
॥कुंडकंठपरित्यज्यसमंताद्व्यंगुलक्रमात्॥ मेखलोछ्रायविस्तारोचतुस्त्रिद्व्यंगुलैः
:क्रमात्॥ पश्चिमेमध्यभागेतुयोनिंकुर्याद्विधानतः॥ योनिःषडंगुलांतिर्यग्वादशां
गुलदैर्घ्यकं॥ अश्वत्थदलसंकाशांकिंचिन्निम्नायतांशुभां॥ कुर्यादाधारपर्यंतंस्वग
ह्योक्तविधानतः॥ समिदाज्यचरुश्चैवतिलमाषाश्चसर्षपैः॥ सर्षपैःसहिताति
माषाइत्यर्थः॥ अश्वत्थप्लक्षपालाशासमिद्भिःखादिरैःशुभैः॥ अष्टोत्तरसहस्रंवा
अष्टोत्तरशतंतुवा॥ अष्टाविंशतिमेतैश्चहोमंकुर्यात्पृथक्पृथक्॥ त्र्यंबकेनमं ५९
त्रेणहोतव्यंहोमतिलान्याहुतिभिःक्रमात्॥ ग्रहाएवंचहोतव्याअस्यउक्तवि
धानतः॥ एवंक्रमेणहोतव्यंहोमशेषंसमापयेत्॥ सर्वालंकारयुक्तानांत्रयाणा

मभिषेचनं॥ त्रयोमातापितृव्याघ्रांस्ततोभिःकलशैरद्भिः॥ वहलकुंभसमन्वितं॥ वहलकुंभः
शतछिद्रः॥ नैनांबराणिधृत्वाथकुर्यादाज्यावलोकनं॥ पूर्णाहुतिंचजुहुयाद्यजमानः
समाहितः॥ तत्सर्वंपरयाभक्त्याईश्वरायनिवेदयेत्॥ सर्वालंकारसंयुक्तांसवत्सांगां
पयस्विनीं॥ प्रतिमांवस्त्रयुग्मंचआचार्यायनिवेदयेत्॥ ईश्वरार्पणंकृत्वाभुंजीतेति
॥इतिकमलाकरभट्टकृतेकृष्णचतुर्दशीशांतिप्रयोगः॥ ॥अथसिनीवाली
कुहूशांतिः॥ प्रयोगपारिजातेउत्तरगार्ग्यः॥ सिनीवाल्यांप्रसूतौस्याद्दासीभार्यापि
शुस्तथा॥ गजाश्वमहिषीचैवशक्रस्यापिश्रियंहरेत्॥ कुहूप्रसूतिरत्यर्थंसर्वदो
षकरीस्मृता॥ यस्यप्रसूतिरेषांस्या --- धननाशनं॥ सर्वगंडसमस्तत्रदोष
स्तुप्रबलोभवेत्॥ शांतिंविनाविशेषेणपरित्यागोविधीयते॥ परित्यागात्ततः

शां०र०
६०

शांतिंकुर्याद्धीमान्विचक्षणः॥ शांतौकृतायामपित्यागःकार्यएव॥ शांतिंविनानसु
तरांत्यागइत्यर्थः॥ तत्फलंतत्क्षणाक्षेनिस्त्रिंशोरिवानुपालने॥ शांत्यभावेबालत्या
गेचेत्यर्थः॥ नत्यजेत्त्यंदितोमोहाद्यदिज्ञानतोपिवा॥ शांतिंविनायदिबालंनत्यजे
दित्यर्थः॥ तद्योगान्नाशयेत्किंचित्कुलंवावानाशमश्नुते॥ बालयोगादित्यर्थः॥ कल्पो
क्तशांतिःकर्त्तव्याशीघ्रंदोषापनुत्तये॥ रुद्रःशक्रश्चपितरःपूज्याःस्युर्देवताःक्र
मात्॥ कर्षमात्रसुवर्णेनतदर्धार्धेनवापुनः॥ अथवाशक्तितःकुर्याद्वित्तशाठ्यवि
वर्जितः॥ प्रतिमांकारयेच्छंभोश्चतुर्भुजसमन्वितं॥ त्रिशूलखड्गवरदाभयहस्तंय
थाक्रमात्॥ श्वेतवर्णांश्वेतपुष्पांश्वेतांबरधरस्थितां॥ त्र्यंबकेनमंत्रेणपूजांकु
र्याद्यथाविधि॥ इंद्रश्चतुर्भुजोवज्रांकुशाजापःससार्पकः॥ रक्तवर्णोगजारूढो ६०

पतइंद्रेतिमंत्रतः॥ पितरःकृष्णवर्णाश्चचतुर्हस्ताविमानगाः॥ बद्धाञ्जसत्रकमंडल्व
भयस्येवधारिणः॥ येचेहइतिमंत्रेणपूजांकुर्यादनंतरं॥ आग्नेयींदिशमारभ्यकुंभान्को
णेषुविन्यसेत्॥ तन्मध्येस्थापयेत्कुंभंशोतद्विरसमन्वितं॥ तेषुवपंचगव्यादिस्तत्तन्मं
त्रैश्चनिक्षिपेत्॥ आदिशाष्टेनपंचमस्यंचरत्नादीनिचतुर्दशीशांन्युक्तानिविकल्पो
क्तशांतिंकर्त्तव्याकुर्याच्छीघ्रंस्वशक्तितः॥ शांतिंपठेदित्यर्थः॥ गोदानंवस्त्रदानंचसुवर्णं
चोर्वरांशुभां॥ स्नादानानिचोक्तानिक्षीरमाज्यंगुडस्तथा॥ गोदानादेर्दशदानांतर्गते
र्द्विरनुष्ठानआज्यवेक्षणमेतानितत्तन्मंत्रैश्चकारयेत्॥ समिदाज्यचरोहोमंतिलमा
षैश्चसर्षपैः॥ इतरेतरयोगद्वंद्वात्तिलमाषमिलितंद्रव्यं॥ अश्वत्थप्लक्षपालाशास
मिद्भिःखदिरैःशुभैः अष्टोत्तरशतंसंख्यंप्रत्येकंजुहुयाद्द्विजः॥ त्र्यंबकेनमंत्रेण

शां०र०
६१

त्तिजानन्माहुतिभिःपुनः॥ चतुर्भिःकलशैर्युक्तंवहत्कुंभसमन्वितं। शांतिवस्तकलं
कार्यमभिषेकंचकारयेत्॥ चतुर्दशीवदित्यर्थः॥ पितृमातृशिशूनांचअभिषिंचे
त्तुवारुणैः॥ शिशूनामभिषेकमित्यभ्यः॥ शंकरस्याभिषेकंचकुर्याद्ब्राह्मणभोजनं
॥ अन्येषांचैवसर्वेषांब्राह्मणानांचतर्पणं॥ यथाशक्त्यानुसारेणाद्विजवाचनपू
र्वकं॥ द्विजवाचनंस्वस्तिवाचनं॥ तत्पूर्वकंसर्वंकुर्यादित्यर्थः॥ इतिसिनीवा
लीकुहूशांतिः॥ अथप्रयोगः॥ कर्त्तास्यबालस्यसिनीवालीकुहूजननसूचि
तसर्वारिष्टशांतिद्वाराश्रीपरमेश्वरप्रीत्यर्थंसिनीवालीजननशां तिंकरिष्येति ६१
संकल्प्यगणेशपूजापुण्याहवाचननांदीश्राद्धाचार्यऋत्विग्वरणानिकुर्यात्॥ त
तआचार्यःसर्षपान्विकीर्यभूमिंप्रोक्ष्यआग्नेयीमारभ्यविदिक्षुचतुरःकुंभान्स

ध्यैशतच्छिद्रंसंस्थाप्यचतुर्षुपंचगव्यंपंचमत्स्यंचपल्लवपंचरत्नपंचत्वक्पंचधान्यसु
वर्णानिनिक्षिप्यशतच्छिद्रेणपूर्णपात्रोपरिकर्षतद्धर्धर्ककल्पितांरुद्रप्रतिमांसंपूज्य
तद्दक्षिणतोयतइंद्रोत्तिनेमइंद्रोनुष्टुप्॥ इतिमंत्रेणेंद्रमुत्तरतस्त्र्यंबकंयजामहेशंखपितर
स्त्रिष्टुप्इतिमंत्रेणपितःप्रतिमांसंपूज्यचतुर्षुकुंभेषुवरुणंसंपूज्यापोहिष्ठाभ्याम्
अग्नेसहस्रशीर्षाकिप्रजापतेतिसर्वशारवोक्ताश्चशांतीःपठित्वाग्निंप्रतिष्ठाप्यग्रहा
नावाह्यनाध्यात्॥ चतुर्षुपाआज्येनेत्यंततेऽत्रप्रधानंरुद्रमश्वत्थप्लक्षपलाशख
दिरसमिदाज्यचरुतिलमिश्रमाषैःप्रत्येकमष्टोत्तरशतसंख्ययाइंद्रंपि स्वाए
तैर्द्रव्यैरष्टाविंशत्यष्टांज्यतरसंख्यया॥ प्रजापतिंलेवाद्धृतिभिरष्टाविंशतिसं
ख्ययाशेषेणस्विष्टकृतमित्यादिसागेकृतेहोतावलिदानांतेमृत्यर्थनामित्तिपृ

शां०र०
६२

र्णाहुतिंहुत्वाशांतविंद्रुणसर्वकुंभोदकैस्तत्वायामीत्यादिमंत्रैरभिषिक्त आचार्यादि
भ्योयजमानोदानानिदद्यात॥ गवामंगेषुतिष्ठंतिगां॥ शरण्यंसर्वलोकानांलज्जायार
क्षणंपरं॥ सुवेषधारिवस्त्रत्वमतःशांतिंप्रयच्छमे॥ इतिवस्त्रं॥ हिरण्यगर्भेतिहिरण्यं
॥ सर्वभूताश्रयाभूमिर्वराहेणसमुद्धृता॥ अनंतसस्यफलदाअतःशांतिंप्रयच्छमे
इतिभूमिं॥ क्षीरजातास्तथाशंखाःक्षीरादमृतसंभवं॥ क्षीरात्क्षीरोत्क्षरोक्षीत्ति
क्षीरेप्राणस्यसंभवः॥ तस्मात्क्षीरप्रदानेनअतःशांतिंप्रयच्छमे॥ इतिक्षीरं॥
कामधेनुषुसंभूतंसर्वक्रतुषुसंस्थितं॥ देवानामाज्यमाहारमतःशांतिंप्रयच्छमे इ
त्याज्यं॥ यथादेवेषुविश्वात्माप्रणवश्चजनार्दनः॥ सामवेदस्तुवेदानांमहादेव
स्तुयोगिनां॥ प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा॥ — थारसानांप्रवरः ६२

DR. BHAU DAJI

सदैवेक्षुरसोमतः॥ ममतस्मात्परांलक्ष्मींददस्वगुडसर्वदा॥ इतिगुडं ततःकांस्यपात्रं
रूपमितिमंत्रेणसकुटुंबःस्वप्रतिरूपंवीक्ष्यआज्यंतेजःसमुद्दिष्टमाज्यंपापह
रंस्मृतं॥ आज्यंसुराणामाहारआज्येदेवाःप्रतिष्ठिताः॥ इत्याज्यपात्रं॥ अथदशा
दानानिदद्यात्॥ तानिच॥ गोभूतिलहिरण्याज्यवासोधान्यगुडानिचरौप्यंलवण
मित्याहुर्दशदानानिपंडिताइतिमहार्णवेउक्तानि॥ तेषुषण्णांमंत्राउक्ताः॥ महर्षे
र्गोत्रसंभूताःकाश्यपस्यतिलाःस्मृताः॥ तस्मादेषांप्रदानेनममपापंव्यपोहति
इतितिलान्॥ सर्वदेवमयंधान्यंसर्वोत्पत्तिकरंमहत्॥ प्राणिनांजीवतोपायमः
तःशांतिंप्रयच्छमेइतिधान्यं॥ प्रीतिर्यतःपितॄणांचविष्णुशंकरयोःसदा॥ शि
वनेत्रोद्भवंरूप्यमतःशांति॰ इतिरूप्यं॥ यस्मादन्नरसाःसर्वेनोत्कृष्टालवणंविना

शां०र० ६३ शांभोः प्रीतिकरं नित्यमतः शांति० इति लवणं ॥ एतानि दक्षिणांते देयानि ॥ अथ
क्रमेण पाठक्रमस्य बाधात् ॥ अत एवांते दक्षिणानुक्तिः ॥ केचिद्दक्षिणामपि या
पाठक्रमान्मध्ये कुर्वंति ततो रुद्रस्योत्तरपूजां कृत्वा विसर्ज्याचार्यहस्ते दत्वाग्निं वि
सर्ज्य संपूज्य संपूर्णतां वाचयित्वा विप्रान्भोजयेत् ॥ सिनीवालीकुह्वोर्दर्शशांत्या
समुच्चयः ॥ अन्यथा प्रत्यवायादिति केचित् ॥ तत्वं तु सिनीवाल्यामेवेयं शांतिः ॥ कुह्वां
तु दोषमात्रमुक्तं ॥ दर्शः सूर्येंदुसंगम इति कुह्वा एव दर्शत्वात्तत्र दर्शशांतिरेवेति ॥
कश्चित्तु दर्शे — विषाते पथिकृद्भ्यो नरीवत्कुह्वांद्वयोः समुच्चयमाहुः ॥ नात्र गोमु ६३
खप्रसवः ॥ इति नारायणभट्टसुतरामकृष्णभट्टसुतकमलाकरभट्टकृते सि
नीवालीकुहूशांतिः ॥ अथ दर्शशांति० ॥ नारद० ॥ अथातो दर्शजातानां माता

पित्रोर्दरिद्रता तद्दोषपरिहारार्थं शांतिं वक्ष्यामि तत्सदा ॥ पुण्याहं वाचयित्वादौ कुर्यात्तु संक
ल्पपूर्वकं ॥ कुंडं वा मंडपं कुर्यात्तद्देशे स्थापयेद्धटं ॥ मंडलं सर्वतोभद्रं तत्कुंभे निक्षिपेद्द्र
व्यं दधिक्षीरघृतादिकं ॥ आदित्राष्टाजो मूत्रगोमयं न्यग्रोधोदुंबराश्वत्थः सचूता निंब
कास्तथा ॥ एतेषां वृक्षमूलानां त्वगादीन्पल्लवांस्तथा ॥ एवं रत्नानि निक्षिप्य वस्त्रयुग्मे
न वेष्टयेत् ॥ सर्वे समुद्राः सरितः स्तीर्थानि जलदा नदाः ॥ आयांतु यजमानस्य दुरितक्ष
यकारकाः ॥ आपोहिष्ठा त्र्यृचेन तथा कयान इत्यृचा ॥ यत्किंचिदमृता वाचेत्स मृ
ज्येष्ठ इत्यृचा ॥ अभिमंत्र्योदकं पश्चाद्दक्षिणे पूर्वप्रदेशके ॥ उदकमभिमंत्र्य पश्चाद्दर्शदे
वतां स्थापयेदित्यन्वयः ॥ मंडलं कुर्यादिति यदुक्तं तदाह ॥ हारिद्रं रक्तकं चैव क— श्वे
तं च नीलकं ॥ एतेषां तंडुलैश्चैव सर्वतोभद्रमुद्धरेत् ॥ दर्शस्य देवतायाश्च सोमसूर्य

शां०र०
६४

स्वरूपकं॥ प्रतिमां स्वर्णजां नित्यं राजतीं ताम्रजां तथा दर्शदेवतायाश्च सोमस्य सर्पस्वरू
पं प्रतिमां स्थापयेद्दिव्ये देवान्वयः। कुंभानपि तत्र ह्लत्रापीदं। सर्वतोभद्रमध्ये च स्था
पयेद्दर्शदेवतां॥ ग्रहवर्णवस्त्रयुग्मं तद्रूपं वस्त्रं गंधपुष्पकं॥ आप्यायस्वेति मंत्रेण स
वित्ता पश्चात्तथैव च उपचारैः समाराध्य ततो होमं समाचरेत्॥ कलावह्निं प्रतिष्ठाप्य
क्रतुसंकल्पमीदृशं॥ आयुरारोग्यसिध्यर्थं सर्वारिष्टप्रशांतये॥ पुत्रस्य दर्शजनन
दोषनिर्हरणाय च॥ मातापित्रोः कुमारस्य सर्वानिष्टप्रशांतये॥ तेषामायुःश्रियै चै
व शांतिहोमं करोम्यहं॥ समिधश्च चरुं द्रव्यं क्रमेण जुहुयाद्बुधः॥ हुनेत्सवितृमंत्रेण ६४
सोमो धेनुं च मंत्रतः॥ एतैर्मंत्रैश्च प्रत्येकं हुनेदष्टोत्तरं शतं॥ एतैरितिबहुवचनात्पि
तृदैवत्यहोमोप्यष्टोत्तरशतं॥ दर्शस्य देवताहोम अष्टाविंशतिसंख्ययाहोममेवं॥

तु कृत्वा यविदध्याच्चाभिषेचनं॥ श्रीसूक्तमायुष्यसूक्तं समुद्रज्येष्ठ इत्यृचा एतैरभिषेकं मा
तापित्रोः शिशोस्तथा॥ ततः स्विष्टकृदा—स्याहोमशेषं समापयेत्॥ हिरण्यं रजतं चैव
कृष्णां धेनुं सदक्षिणां॥ अन्येभ्योपि यथाशक्ति दातव्या दक्षिणा तथा॥ ब्राह्मणान्भोजये
त्तत्र कारयेत्स्वस्तिवाचनं॥ इति नारदोक्तदर्शशांतिः॥ अथ प्रयोगः॥ देशकालौ संकी
र्त्य स्य बालस्य दर्शजननसूचितारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं दर्शजनन
शांतिं करिष्ये इति संकल्प्य॥ गणेशपूजापुण्याहवाचनं नांदीश्राद्धाचार्यऋत्विग्व
रणानि कुर्यात्॥ तत आचार्यः कुंडस्य ड्डिजाद्या पूर्वकुंभं संस्थाप्य॥ तत्र पंचगव्यं न्य
ग्रोधोदुंबराश्वत्थचूतविंबवल्लमूलानां त्वचः पल्लवांश्च पंचरत्नानि निक्षिप्य वस्त्रयुग्मे
नावेष्ट्य सर्वे समुद्राः सरितस्तीर्थानि जलदा — नदाः॥ आयांतु यजमानस्य दुरि

तत्क्षयकारकः॥इतिमंत्रेणआपोहिष्ठेतितृचेनकयानश्चित्रपत्किंचदा॥समुद्रज्ये-
ष्ठाशांतिवाभिमंत्र्यपूर्णपात्रेआप्यायस्वेतिसोमंसवितापश्चादितिसूर्यंचावाह्यग्र-
हवर्णैर्गंधपुष्पैःपूजयेत्॥केचिन्मध्येदक्षिणोत्तरयोश्चसोमसूर्यावपिपूजयंति॥
तत्रमृजंचित्सं॥ततोग्निंग्रहांश्चप्रतिष्ठाप्यान्वाधानात्॥अत्रप्रधानेग्रहान्सो-
मंसूर्यंचाष्टोत्तरशताष्टाविंशत्यन्यतमसंख्ययाशमिद्वर्वाहुतिभिःशेषेणास्विप
कृतमित्याज्यभागांतेआपुराराम्येतिमंत्राभ्यांहोमसंकल्पंकृत्वाचतुर्दशीविधि-
नाहिरण्यवर्णामितिसूक्तेनआयुष्यंवर्चस्यमितिसूक्तेनसमुद्रज्येष्ठाइत्यनया
चमामातापितरौशिशून्अभिषिंच्यस्विष्टकृदादिबलिदानांतेपूर्णाहुतिंहुत्वाशेषंसमा-
प्याचार्यायशक्तिरजतंहिरण्यंकृष्णांधेनुंचसदक्षिणांदत्वाऽऽत्विग्भ्यःयथाश- ६५

क्तिदत्वोत्तरपूजांविधायविसृज्याचार्यायप्रतिमांवादद्यात्अग्निंविसृज्यब्राह्मणान्भो-
जयित्वाशांतिपाठयित्वास्वस्तिवाचनंकुर्यादिति॥ ॥इतिश्रीकमलाकरभट्टकृतेदर्श-
शांतिप्रयोगः ॥इतितिथिशांतिः ॥अथनक्षत्रशांतयः॥ तत्रादौज्येष्ठाशांति
:॥तदुक्तंशौनकेब्रह्मयामले॥ज्येष्ठादौजननीमाताद्वितीयेजननीपिता॥तृतीये
जननीभ्रातास्वयंमाताचतुर्थके॥आत्मानंपंचमेहंतिषष्ठेगोत्रक्षयोभवेत्॥सप्त-
मेचोभयकुलंज्येष्ठभ्रातरमष्टमे॥नवमेश्वशुरंहंतिसर्वंहंतिदशांशकः॥वसिष्ठः
सुरेशताराजनिताधवाग्रजंद्विदैवताराजनितातुदेवरं॥पुरंदरर्क्षेजनितःसुतस्त-
था॥स्वसाग्रजंहंतिनपुत्रिकायदि॥विशेषोनिर्णयसिंधौज्ञेयः॥प्रयोगपारिजाते
वृद्धगार्ग्यः॥सुखासीनंमुनिश्रेष्ठंगर्गंमुनिगणान्वितं॥कृतांजलिपुटोभूत्वाय-

शां० र०
६६

— — प्रब्रवीति शौनकः॥ ज्येष्ठानक्षत्रसंभूतं गंडदोषविनिर्णयं॥ तस्य शांतिविधानं च य
याज्ञवल्क्यमतं स्मृतं॥ घटिकैका च मूलांते ज्येष्ठादौ घटिकाद्वयं॥ तयोः संधिरिति ज्ञे
यं त्रिषु गंडसमीरितं॥ प्रथमे च द्वितीये च ज्येष्ठर्क्षे च तृतीयके॥ पादत्रये जातन
रो ज्येष्ठाप्यत्र प्रजायते॥ ज्येष्ठाद्यपादजातस्तु पितुः स्वस्य विनाशनः॥ जायते
नात्र संदेहः दशाहाभ्यंतरे तथा॥ ज्येष्ठर्क्षेथ पुमान् जातः अग्रजस्य विनाशनः
॥ तृतीये कन्यका जाता हंति शीघ्रं धवाग्रजं॥ तच्छांतिं तस्य वक्ष्यामि गंडदोषप्र
शांतये॥ सुदिने वाथ नक्षत्रे चंद्रताराबलान्विते॥ सूतकांते तदा कुर्यात् ज्येष्ठा
शांतिं विधानतः॥ वज्रांकुशधरं देवमैरावतगजान्वितं॥ कुर्यात् शचीपतिं रम्यं ६६
देवेंद्रं सुरनायकं॥ कर्षमात्रसुवर्णेन कर्षार्धेनाथ पादतः॥ तद्विधानं प्रकुर्व-

ति वित्तशाठ्यं न कारयेत्॥ शालितंडुलसंपूर्णकुंभस्योपरि पूजयेत्॥ इंद्रायेंद्रो मरुत्व
त इति मंत्रेण वाग्यतः॥ गंधपुष्पैर्धूपदीपैर्नानाभक्ष्यनिवेदनैः॥ पूजयेद्विधिना
विप्रो लोकपालगणान्वितं॥ रक्तवस्त्रद्वयोपेतं पूजयेत्सुरनायकं॥ तत्र संस्थापयेत्कुं
भान् चतुर्दिक्षु विशेषतः॥ तन्मध्ये स्थापयेत्कुंभं शतच्छिद्रं समन्वितं॥ पुण्योदक-
समायुक्तान् वस्त्रयुग्मेन वेष्टितान्॥ कुंभेषु विन्यसेद्धीमान् पंचगव्यं समंत्रकं॥ पंचा
मृतं पंचरत्नं मृत्तिकाः पंचसंख्यकाः॥ पंचवल्ककषायांश्च पंचपल्लवकांस्तथा॥
सुवर्णं कुशदूर्वाश्च शतौषधिविनिक्षिपेत्॥ पूजयेद्वारुणैर्मंत्रैः कुंभान् तत्र प्रय
त्नतः॥ त्वं नो अग्ने जपेदादौ स त्वं नो द्वितीयकं॥ समुद्रज्येष्ठा इति च इमं मे गं
गे च तुर्यकं॥ पूजयेद्वस्त्रयुग्मैश्चतुरः कलशानपि॥ कलशस्थान् वरु

प्यानपीत्यर्थः॥जपंकुर्युःप्रयत्नेनमंत्रैरेभिर्द्विजोत्तमाः॥आनोभद्राजपंकुर्यात्तभद्राअ
ग्नेअत्रेषतः॥इंद्रसूक्तंरुद्रजाप्यंजपंमृत्युजयंततः॥इंद्रंसंपूज्यदेवेंद्रंवरुणंकुंभसं
स्थितं॥सुसंकल्पविधानेनहोमकर्मततश्चरेत्॥समिद्भिर्ब्रह्मवृक्षस्यशतमष्टोत्त
रंतथा॥सर्पिषावरुणाचैवमूलमंत्रेणवाग्यतः॥ भेज्याभ्येचतेनैवयतइंद्रभ
येतिच॥तिलान्व्याहृतिभिर्हुत्वाशतमष्टोत्तरंपृथक्॥भार्यापुत्रसमोपेतंयज
मानंविशेषतः॥अभिषेकंप्रकुर्वंतिसूक्तैर्वारुणसंज्ञितैः॥समुद्रज्येष्ठाभिर्मंत्रै
रिमंमेवरुणस्तथा॥द्यौःशांतेत्यादिभिर्मंत्रैरभिषेकंसमाचरेत्॥अभिषेकनि
वृत्तौतुयजमानःसमन्वितः॥शुक्लांबराणिधृत्वाथकुर्याद्आज्यावलोकनं॥रूपं
रूपेमंत्रेणचित्रंतच्चक्षुरेवच॥देवतापुरतस्थित्वाधूपदीपनिवेदनं॥तद्यास्वा

चमनंसम्यक्॥तांबूलार्घंतथैवच॥नमस्तेसुरनाथायनमस्तुभ्यंशचीपते॥गृहाणा
र्घ्यमयादत्तंगंडदोषप्रशांतये॥कार्यंयत्पूजकादीनांशुभंलाभासमर्पयेत्॥शुभमष्ट
मलिगम्यःश्रेयःसंपादनकदैशायसमर्पयेत्॥आचार्यायचगांदद्यात्सुशीलांचपय
स्विनीं॥रक्तवर्णवस्त्रयुतांसर्वालंकारभूषितां॥वस्त्रयुग्मापिधनंचयथाविभवसार
तः॥यक्षगंधर्वसिद्धैश्चपूजितोसिशचीपते॥दानेनानेनदेवेशगंडदोषंविनाशय
॥अष्टोत्तरशतंसंख्याकुर्याद्ब्राह्मणभोजनं॥ततोपिदक्षिणांदत्वाप्रणिपत्यक्षमा
पयेत्॥इमांकृत्वाज्येष्ठाशांतिंयथाविध्युक्तमार्गतः॥गंडदोषंविनिर्जित्यआयुष्मान्
जायतेनरः॥इत्युक्तंवृद्धगार्ग्येणशौनकायविशेषतः॥ज्येष्ठानक्षत्रसंभूतंगंडदोष
प्रशांतये॥अज्ञानाद्यथवाज्ञानाद्देकेस्याद्वाधनस्यच॥यत्तन्यूनमनमतिरिक्तं

शां०र०
६९

वात्सर्वंशांतुमर्हसि ॥ इति ॥ अथप्रयोगः ॥ गोमुखप्रसवंकृत्वादेशकालौसंकीर्त्य
अस्यशिशोर्ज्येष्ठानक्षत्रजननसूचितसकलारिष्टशांत्यर्थंज्येष्ठाजननशांतिकंरि
ष्येतिसंकल्प्यगणेशपूजापुण्याहवाचनंनांदीश्राद्धाचार्यर्त्विग्वरणानिकुर्यात् ॥ त
तआचार्यमहीद्यौरितिभूमिंस्पृष्ट्वाओषधयःसमितिव्रीहीन्निक्षिप्यआकलशेष्विति
कलशंसंस्थाप्यगंधेनाभ्यर्च्यशन्नातितंडुलैःकलशंपूरयित्वापूर्णादर्वीतिपूर्णपात्रं
निधायतदुपरिकर्षतदर्धार्धकृतामिंद्रायेंद्रोमरुत्वतेइतींद्रंलोकपालांश्चावाह्यसं
पूजयेत् ॥ ततःपूर्वादिदिक्षुचतुरःकुंभान्मध्येचशतच्छिद्रंसंस्थाप्यादिकुंभेषुपं
चगव्यंपंचामृतंपंचरत्नंपंचमृत्तिकापंचपल्लवसुवर्णकुशदूर्वाशतौषधमश्चलि
— वस्त्रयुग्मे — — — यित्वावरुणमावाह्यपूजयेत् ॥ ततःपूर्वादिदिक्षुकलशान्

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

६९

त्वंनोअग्नेसत्वंनोअग्नेसमुद्रज्येष्ठाइमंमेगंगेइत्यभिमंत्र्यतेषुअतोमध्यस्थकुंभमग्न
आग्नेरितिसूक्तंरुद्रंत्र्यंबकंचजप्त्वाइंद्रायेंद्रोमरुत्वतइंद्रंभयामहइतिचाष्टाविंशति
मष्टौवाजपेयुः ॥ ततोग्निंग्रहांश्चप्रतिष्ठाप्यान्वादध्यात् ॥ अत्रप्रधानइंद्रंपला
शसमिदाज्यचरुद्रव्यैरष्टोत्तरशतसंख्ययाइंद्रायेंद्रोमरुत्वतइतिमंत्रेणप्रजा
पतिंतिलद्रव्येणाष्टशतंव्याहृतिभिःशेषेणस्विष्टकृतमित्यादिबल्यंतेपूर्णाहु
तिंपूर्णपात्रंविमोचकंचकृत्वानहितेक्षत्रमित्यादिवारुणसूक्तैः ॥ समुद्रज्येष्ठे
तिचतुर्भिरिमंमेवरुणोत्यनयाद्यौःशांतेतिचाभिषिंचेत् ॥ ततोयजमानोरू
पंरूपमितिमंत्रेणाज्यमवलोक्यतत्पात्रंसदक्षिणंब्राह्मणायदत्वेंद्रंसंपूज्य
॥ नमस्तेसुरनाथायनमस्तुभ्यंशचीपतेग्रहाणार्घंमयादत्तंगंडदोषप्रशांत

शां० र० येऽत्यर्घ्यं दत्वा आचार्यादिभ्यो होमादिजन्यं श्रेयो गृहीत्वा नदिं ज्ञाय समर्प्याचा

६९ र्याय रक्तवर्णवस्त्रद्वयमुत्तमं सवसांगोपस्करं गंधर्वसिद्धैश्च पूजितो सिशचीपते ॥

दानेनानेन देवेश गंडदोषविनाशय इति मंत्रेण दद्यात् ॥ ततस्तेभ्योऽन्येभ्यश्च द

क्षिणां दत्वा उत्तरपूजां विधाय विसृज्य — ज्ञाना — ततो वापि संकल्पाद्याधन

स्य च ॥ यन्न्यूनमतिरिक्तं वा तत्सर्वं क्षंतुमर्हसीति समाप्याचार्याय दत्वाग्निं संपू

ज्य विभूतिं धृत्वा विसृज्याष्टशतं विप्रान् सदक्षिणान् संभोज्याशिषः गृहीत्वा भुंजी

तेति ॥ ॥ इति श्रीकमलाकरभट्टकृते ज्येष्ठाशांतिः ॥ ॥ तत्रादौ तदुत्पत्तिदोषः ६९

मल्लारः ॥ अभुक्तमूलसंभवं परित्यजेत्तु बालकं ॥ समाष्टकं पिता वाथ तन्मु

खं न विलोकयेत् ॥ तदाद्यपादके पिता विपद्यत्तेन जन्यथ ॥ तृतीयके धनक्ष

यश्चतुर्थकः शुभावहः ॥ प्रतीपमंत्यपादतः फलं तदेव सार्पभे ॥ अभुक्तमूलमाह वृद्धव

सिष्ठः ज्येष्ठांते घटिका चैका मूलादौ घटिकाद्वयं ॥ अभुक्तमूलमित्याहुर्जातं तत्र विव

र्जयेत् ॥ बृहस्पतिस्तु ज्येष्ठांते घटिकार्धं तु मूलादौ घटिकार्धके ॥ तयोरंतर्गता ना

डी अभुक्तं मूलमुच्यते ॥ बृहन्नारदस्तु ॥ अभुक्तमूलगंडांतं घटिकानां चतुष्टयं ॥

तत्र जातस्य घटी द्वय मूलाद्यं द्वयमेव चेत्याह ॥ काश्यपसंहितायां त्वन्यथा मूलफल

मुक्तं ॥ मूलाद्यपादजो हंति पितरं तु द्वितीयजः ॥ मातरं स्वतृतीयोर्थान् सुहृदं तु तु

रीयजः ॥ फलं तदेव सार्पर्क्षे प्रतीपं तत्पादतः ॥ परित्रिष्टेकाल्याय नोपि ॥ प्रथ

मे तु पितुर्नेष्टो द्वितीये मातरं तथा ॥ तृतीये धनधान्यस्य चतुर्थे कुलवर्णकावहः

॥ स्वयं पुण्यभागी स्यादिति वसिष्ठः ॥ तौरीयजः शुभकरः फलमेतद्देववैलोम

शां०र० तोभुजगाधि— भवस्यसर्वपित्रादेःस्वस्यचशुभकरइतिज्ञेयः ॥ नस्यार्णवे ॥ मूलस्तं
१० भस्त्वचाशाखापत्रंपुष्पंफलंशिखा ॥ वेदाग्न्यृतुनयपक्षवेदिग्नाग्रवसवस्तथा ॥ नं
दाबाणारसारुद्रामूलभेदःप्रकीर्तितः ॥ मूलेमूलविनाशायस्तंभेहानिर्धनक्षयः
त्वचिभ्रातृविनाशायशाखामातृविनाशकृत् ॥ पत्रेसपरिवारःस्यात्पुष्पेपुन्नृप
वल्लभः ॥ फलेषुलभतेराज्यंशिखायामल्पजीविनः ॥ अन्यत्रलन्यथोक्तं ॥ मूले
स्तम्भघटीषुमूलहननंस्तंभेसुखक्षयंत्वग्दिग्बंधुविनाशनंचविटपेरुद्रैर्हतो
मातुलः ॥ पत्रैःकैःमुकृतीतुबाणाकुसुमेमंत्रीफलेसागरैःराजावह्निशिखा १०
ल्पमायुरितिसन्मूलांघ्रिपस्यात्फलं ॥ पात्रादिघटिकानांवृषालिसिंहेषुच
मूलंदिविस्थितंयुग्मतुलांगनांत्ये ॥ पाजागंमेषधनुःकुलीरे ॥ नक्रेषुमत्येष्वि

त्तिसंस्मरंति ॥ एतत्तुलग्नफलं ॥ स्वर्गमूलेभवेद्राज्यंपातालेचधनागमं ॥ मर्त्युलोकेय
दामूलंतदाशून्यंसमादिशेत् ॥ वसिष्ठः ॥ नैर्ऋत्यभोद्भूतसुतःसुतावापित्रादवश्यंमच
सुरंनिहंति ॥ तदंत्यपादेजनितोनहंतितस्योक्रमेणाद्विभवेकलत्रं ॥ विशेषोमलू
तेनिर्णयसिंधौज्ञेयः ॥ वसिष्ठः ॥ व्यतीपातेंगहानिःस्यात्परिघेमृत्युमादिशेत् ॥ वै
धृतौपितृहानिःस्यात्त्रष्टेदावंधुतांव्रजेत् मूलेसमूलनाशःस्यात्कुलनाशोधृतौभवे
त् ॥ विकृतांगेचहीनेचसंध्ययोरुभयोरपि ॥ पर्वण्यपिप्रसूतौचसर्वारिष्टभयप्रद
ः ॥ तद्वसंदंतजातश्चपादजातस्तथैवच ॥ तस्माच्छांतिंप्रसूतौकुर्वीतग्रहाणांक्रू
रचेतसामिति ॥ व्यतीपातादौशांतिग्रहमखयो ॥ समुच्चयनअत्रयत्प्रकरणेग्र
हमखयद्विधानंतदतारभ्याधानस्यसाप्तवत्रयस्यमित्रनिंदाप्रकरणास्थेनवोप

संहारादितरेषु शांतिकेषु ग्रहमखानावश्यकत्वार्थं ॥ अथ शांतिः ॥ शौनकः ॥
अथातः संप्रवक्ष्यामि मूलजातहिताय च ॥ मातापित्रोर्धनस्यापि कुलस्य शांतिहिता
य च ॥ त्यागो वा मूलजातस्य स्यादष्टाब्दमदर्शनं ॥ अभुक्तमूलजातानां परित्या
गो विधीयते ॥ अदर्शनाद्वापि पितुः स तु तिष्ठेत्समाष्टकं ॥ एवं च दुहितुर्ज्ञेयं मूल
जातफलं बुधैः ॥ मुख्यकालं प्रवक्ष्यामि शांतिहोमस्य यत्नतः ॥ जातस्य द्वादशा
हे तु जन्मर्क्षे वा शुभे दिने ॥ समाष्टके द्वादशाहे कुर्याद्वा शांतिमादरात् ॥ अष्टवर्षो
त्तरं वा द्वादशाहाद्द्वादशाह इत्यर्थः ॥ सप्तमे पुण्यदेशे तु मंडपं कारयेद्बुधः ॥ पुण्यस्मि
न्निर्मलैस्तोयैः प्रोक्षितायां क्षितौ ततः ॥ ऋत्विजस्तु कृतप्रयेनोक्ताः ॥ ब्राह्मणाः
श्रोत्रियाश्चाष्टौ द्वादशा त्वथ षोडशेति ॥ तत्रोदकुंभं सुदृढमक्षीणं व्रणवर्जि

तं ॥ अकच्छमूलं निर्णिक्तं पूरयेन्निर्मलांभसा ॥ निर्णिक्तं धौतं वस्त्रावगुंठितं कुर्या
त्पूरयेत्तीर्थवारिणा ॥ कूर्चहेमसमायुक्तं चूतपल्लवसंयुतं ॥ स्वस्तिकोपरि विन्य
स्य क्षीरिद्रुमसपल्लवैः ॥ द्रोणव्रीहीश्च निक्षिप्य ईशान्यां च निपातयेत् ॥ पंचरत्ना
नि निक्षिप्य सर्वौषधिसमन्वितं ॥ अर्चितं गंधपुष्पाद्यैः श्रीरुद्रं च सूक्तान् जपेत् ॥
षडंगसहितं सम्यक् शतं पे रुद्रसंख्यया ॥ बहृचो रुद्रसूक्ते वा छंदो रुद्रसमागमे
ः ॥ एकादशात्रित्यैकसंख्यया शक्तितो जपेत् ॥ इयं च संख्या रुद्रतत्सूक्तसाम
सु ॥ तत्र प्रतिरथं सूक्तं शतरुद्रानुवाककं ॥ शतरुद्रानुवाकत्वमग्ने रुद्र इति ॥ र
क्षामंत्रं तथा पुण्यं राक्षोघ्नं च सूक्तान् जपेत् ॥ एतेषां मध्ये कादशादिसंख्यया ज
पः त्र्यंबकं जपेत् सम्यगष्टोत्तरसहस्रकं ॥ एकवारं तथा जापी पावमानाः सूक्ता

न्न्जपेत्॥ जपस्यपंचकुंभास्तद्वयं वा तद्लाभतः॥ रुद्रकुंभोनिर्ऋतिकुंभश्चमित्रः
एवंसप्तकुंभाः॥ रुद्रकुंभोनिर्ऋतिमध्येईशानादिकोणचतुष्केचत्वारइतिपंचवा
कश्यपसंहितायांतुमध्येशांतलिंगः कोणेषुचत्वारः॥ एवंपंचकुंभाः ईशानादिच
तुष्कोणेषुवरुणान्नजजपस्मरित्॥ पूर्वोक्तद्रव्यसंयुक्तान्स्थापयेद्रक्तवर्णकान्॥ शांत
लिंगंवहत्कुंभंस्थापयेत्तंडुलोपरि॥ तत्रपूर्वादितः सूक्तजपस्तेनैवोक्तः॥ रुद्रेणाक्र
मश्रोभद्रा अग्नेसूक्तेनभक्तितः॥ आनोभद्रा अनेनैवपुरुषसूक्तेनचार्चयेत्॥ मो
चनीमूलजामित्यष्टौवाक्यान्येककोजपेत्॥ कुंभद्वयपक्षेचतुः॥ प्रस्रवणमुक्तं॥ का   १२
त्यायनेनक्षितीयोद्वकुंभंकृत्वाचतुः प्रस्रवणकुंभसंयुक्तंततोवरुणमुपरिष्टा
न्मूलानिधारयेद्वंशपात्रेकृत्वावस्त्रेवध्वेति॥ पंचकुंभपक्षेपिमध्येशांतमूलानि॥

कुंभद्वयमहस्रीरुद्रस्येकुंकुंभस्थसर्वसूक्तानितत्ररुद्र॥ तथान्यंचसुभंकुंभंपूर्वोक्तेल
क्षणेर्युतं॥ चतुःप्रस्रवणंकुर्यात्पंचवक्त्रंतथैवच॥ वस्त्रावगुंठितंकुर्यात्पूरयेत्ती
र्थवारिणा॥ पंचरत्नसमायुक्तमाम्रपल्लवसंयुतं॥ गजाश्वरथ्यावल्मीकसंगमाह्रद
गोकुलात्॥ राजद्वारेप्रदेशाच्चमृदमानीयनिक्षिपेत्॥ कुंभस्यनैऋते देशेहोमस्थानं
प्रकल्पयेत्॥ गोमयेनोपलिप्येतेकुर्यात्स्थंडिलमुत्तमं॥ कल्पयेत्॥ मंडपंचतुरस्रंचतु
र्हस्तप्रमाणत॥ चतुर्द्वारसमायुक्तं॥ तोरणाद्यैरलंकृतं॥ पूर्वोक्तलक्षणोपेतंकुंडमी
शानतोवहिः॥ इत्युक्तं॥ कृत्वाग्निमुखपर्यंतमुद्धेरवादिस्वशाखतः॥ पूर्णपात्रनिधनां
तंकृत्वापूजासमारभेत्॥ नक्षत्रदेवतारूपंसुवर्णेनप्रयत्नतः॥ निष्कमानेनतत्त्वार्धेन
पादेनाद्यस्वशक्तितः॥ प्रतिमांलक्षणेनैकांकारयित्वाविचक्षणः॥ यद्वामूर्त्यंसुव

ग्रां०र० ७३

र्णस्यस्थापयित्वाप्रपूजयेत् ॥ संस्मरेन्निरृतिंश्यामंसमुखंनरवाहनं ॥ रक्षोत्वयंखड्ग
हस्तंदिव्याभरणभूषितं ॥ ज्योतिर्निबंधेमूलरूपंविधानतस्यस्थितंकुणपवाहनं ॥ ख
ड्गखेटधरंचोग्रंद्विभुजंचवक्राननमित्युक्तं ॥ प्रतिमापूजनार्थायवस्त्रयुग्मंप्रकल्प
येत् ॥ पंकजंकारयेद्भूमौरक्तव्रीहितंडुलैः ॥ चतुर्विंशद्दलोपेतंशुक्लवर्णकर्णिका
न्वितं ॥ तस्योपरि प—— न्य — त्यान्नंस्वर्णंवारोप्यमन्मयं ॥ शुद्धवस्त्रेणसंछाद्यतत्
त्रमूलानिनिक्षिपेत् ॥ मूलानिशतमूलानि ॥ विष्णुक्रांतासहदेवीतुशतावरी ॥ मू
लानिमान्यप्यलीयाछ्रतालाभेविशेषतः ॥ स्थापयेत्कर्णिकामध्येवस्त्रगंधाद्यलं ७३
कृतं ॥ कृत्वहेमजलोपेतंकुंभमौषधिसंयुतं ॥ कूर्चोदर्भस्तंबः ॥ एवंविधंकुंभंन्यसे
दित्यर्थः ॥ कुंभोपरिन्यसेद्दिव्यामूलनक्षत्रदेवतां ॥ अधिप्रत्यधिदेवौचदक्षिणो

त्तरयोः क्रमात् ॥ अधिदेवंयजेद्दाक्षोज्येष्ठनक्षत्रदेवतां ॥ तथाप्रत्यधिष्ठांचपूजयेद्दे
वतांशुभां ॥ उत्तराषाढनक्षत्राद्या अनुराधांतमर्चयेत् ॥ भूमिस्थचतुर्विंशतिदलेषु
उत्तराषाढाद्यानिचतुर्विंशतिदेवतानक्षत्राणिपूर्वादितःस्थाप्यानीत्यर्थः ॥ ऐंद्रा
दीशानपर्यंतंपूजयेत्स्वस्वनामतः ॥ स्वलिंगोक्तैस्वतन्मंत्रैः प्रधानादीन्प्रपूजये
॥ कृत्वयपेनसुवर्णेनप्रमाणेनततःदश्याद्धेनवापुनः ॥ यथावित्तानुसारेणप्रतिमां
निक्षितेसुधीः ॥ उडुंबरवटाश्वत्थप्लक्षाम्रत्वक्सपल्लवं ॥ शतौषधीसमूलंशंख
नवरत्नानिमृत्तिकाः ॥ पंचामृतंतुसद्बीजकुंकुमंरोचनंफलं ॥ कुष्ठंमांसीहरिद्रे
द्वमुराशैलेयचंदनं ॥ वचाकचोरकंमुस्तासर्वौषध्योदशास्मृताः ॥ गजाश्वरथ्या
वल्मीकसंगमस्थानसंभवाः ॥ ह्रदगोराजनगरक्षीरतस्थाप्यमृत्तिकाः ॥ तिलमा

ग्रां० २० ७४ बव्रीहियवगोधूमाणुप्रियंगवः॥ चाणकः सहिताश्चाष्टौ सद्बीजारव्यनिसर्वदा॥
दधिमध्वक्तैः कुंभान्वस्त्रैस्तल्लिंगमंत्रकैः॥ मा षूणश्चेतिमंत्रेणनिस्रंतिंअर्च
येत्ततइत्सूक्तं॥ पंचामृतंनसंस्नाप्यआवाह्याथसमर्चयेत्तदुपचारैः षोडशा॥ अ
र्घ्याद्यपंचोपचारकैः॥ रक्तचंदनगंधाद्यैः पुष्पैः कृष्णसितादिभिः॥ मेषशृंगादि
— पेश्चघृतदीपैस्तथैवच॥ सुरापोलिकमांसाद्यैर्नैवेद्यैर्भोजनादिभिः म
त्स्यमांससुरादीनिब्राह्मणानांविवर्जयेत्॥ सुरास्थानेप्रदातव्यंक्षीरसैंध
वमिश्रितं॥ पायसंलवणोपेतंमांसस्थानेप्रकल्पयेत्॥ उक्तमद्याद्यलाभेतु ७४
यथालाभंसमर्चयेत्॥ पुष्पांतंतुसमभ्यर्च्यहोमंकुर्याद्यथोदितं॥ निर्वाप
प्रोक्षणादीनिचरोः कुर्याद्यथाविधि॥ हविर्गृहीत्वाविधिवद्वह्नौस्रस्तंचक्रमा

ज्जुहुनेत्॥ पायसंघृतसंमिश्रंहुनेदष्टोत्तरंशतं॥ समिदाज्यचरून्पश्चाच्छक्तितः सं
ख्ययाहुनेत्॥ आग्निदेवतयोश्चवजुहुयात्स्वस्वमंत्रतः॥ चतुर्थ्यंतेनमोतैश्चस्वाहां
तैश्चस्वमंत्रकैः॥ नक्षत्रदेवताभ्यश्चपायसेनतुहोमयेत्॥ स्वमंत्रकैः नाममंत्रैः॥
कृणुष्वेतिपंचदशऋग्भिर्जुहुयात्क्रमांततः॥ गायत्र्याजातवेदसत्र्यैव्यंबकमितिक्रमा
त्॥ सीरायुंजंतितामग्निवर्णास्तोष्यतामग्निमेवच॥ तामग्निवर्णांतपसाज्वलंतींवैरोच
नींकर्मफलेषुजुष्टां॥ दुर्गांदेवींशरणमहंप्रपद्येसुतरसितरसेनमःइत्यस्यपत्निना
रायणाग्निंइतंनयेवच॥ श्रीसूक्तेनतथाविद्वान्समिदाज्यचरून्क्रमात्॥ अष्टो
त्तरशतैर्वाथअष्टाविंशतिभिः क्रमात्॥ अष्टाष्टसंख्ययावापिजुहुयाच्छक्तितोबुध
ः॥ त्वंनसोमेनपायसंजुहुयात्त्रयोदश॥ चतुर्गृहीतमाज्यंचयास्तेरुद्रेतिमंत्रतः

DR. BHAU DAJI MEMORIAL

स्रुवेणजुहुयादाज्यंसहव्याहृतिभिःक्रमात्॥हुत्वास्विष्टकृतंपश्चात्प्रायश्चित्ताहुती
हुनेत्॥केचत्पेनतुऽग्रग्नेय्यहविर्घेशाल्लोकपालांश्चपूजयेत्॥प्रजापतयेस्वाहे
तिमुखांतेजुहुयाद्यमं॥मृत्यायस्वाहा॥प्रजापतयेस्वाहेत्युपहोमैः॥पलाशसमि
दाज्येनहुत्वैताष्टसहस्रकं॥अथवाष्टोत्तरशतंप्रत्येकंजुहुयात्ततः॥मूलंप्रजामि
त्यष्टभिर्वाक्यैर्मंत्ररूपेणच॥सावित्रसौम्यनैरृत्यमंत्रैरन्वक्षतंभवेः समिद्भिश्चतिल
व्रीहीन्हुत्वाव्याहृतिभिस्ततः॥आचार्योयजमानेवाअग्नौपूर्णाहुतिंहुनेत्॥समुद्रा
द्रमिस्तुक्रनप्राजापत्यास्ऋचातथा॥पूर्णादर्वीसमत्तेतिमंत्रैःपूर्णाहुतिंहुनेत्॥होम
मशेषंसमाप्याथवह्निमारोपयेत्बुधः॥ग्रहमखविकृतिच्छास्मात्तग्निप्रज्ञेत्रव
ह्निसमारोपः॥कुंभाभिमंत्रणंकुर्याद्दाक्षिणेनाभिमर्शयेत्॥मत्स्यपुराणमनाभृय

जपेच्छैयंबकंशातंरुद्रकुंभोक्तमार्गेणरुद्राध्यायंजपेत्सुधीः॥रुद्रकुंभस्यदक्षिणतोभिम
र्शनंकृत्वायजुर्षवऋचसामगादिः॥पूर्वोक्तंस्वपंयजेत्इत्यर्थः॥एकादशाष्टत्रिधे
कसंख्ययारुद्रसूक्तंसामगाजपेत्सदित्यर्थः॥धूपदीपनैवेद्यंकुंभयुग्मेनिवेदयेत्
॥रुद्रकुंभेनिऋतिकुंभेचेत्यर्थः॥प्रसादयेत्ततोदेवतमभिषेकार्थमादरात्॥निक्षि
तिरुद्रच॥तस्मिन्कालेग्रहातिथ्यंकर्त्तव्यंभूत्तिमिच्छता॥पथ्यकप्रशस्तः॥तेनैवनक्ष
त्रेष्ठासहैवच॥तेनैवहेतुनाग्रहयज्ञपथकप्रशास्तशांत्यासहचेत्यर्थः॥अभि
षेकविधिंवक्ष्येसर्वैराचार्येरुदीरितं॥भद्रासनोपविष्टस्ययजमानस्यऋत्विजः॥दा
रपुत्रसमेतस्यकुर्युः॥सर्वेभिषेचनं॥आपोहिष्ठामितिसूक्तेनपावमानीभिरेवच
आपोहिष्ठेतिनवभिरापइद्वाहृदयेनच॥सहस्राक्षेणचेनापिदेवस्यत्वेतिमंत्रकैः

शिवसंकल्पमंत्रेण वक्ष्यमाणेश्च मंत्रकैः वक्ष्यमाणैः श्लोकैः ॥ तेच प्रयोगे दर्शिते ॥ त
च्छंपोः ॥ अभिषेकं तु सर्वदोषेष्वशांतिदं ॥ सर्वकामप्रदं दिव्यं मंगलानां च मंगलं ॥ व
स्त्रांतरितकुंभाभ्यां पश्चात्तु स्नापयेद्बुधः ॥ ततः शुक्लांबरधरः शुक्लमाल्यानुले
पनः ॥ यजमानो दक्षिणाभिस्तोषयेदृत्विगादिकान् ॥ धेनुं पयस्विनीं दद्यादाचा
र्याय सवत्सकां ॥ निरृतिप्रतिमां वस्त्रं कुंभं हेमं च दापयेत् ॥ ग्रहार्थवस्त्रप्रतिमा
स्तत्तद्दक्ष दक्षिणा ॥ श्रीरुद्रजापिने देयः कृष्णोनड्वान्यत्नतः ॥ तत्कुंभवस्त्रप्रति
मां तस्मै दद्यात्प्रयत्नतः ॥ इतरेभ्योपि विप्रेभ्यः शक्त्या दद्याच्च दक्षिणां ॥ उक्तालाभे
ततो दद्यादाचार्यो ब्रह्मऋत्विजां ॥ तत्तन्मूल्यं प्रदातव्यं शक्त्या वार्थं प्रदापयेत् ॥ १
आचार्याय च यद्दत्तं तदर्धं ब्रह्मणो भवेत् ॥ सदस्याश्च ब्राह्मणोऽर्धमृत्विग्भ्यस्तत्त

७६

दर्धकं ॥ ज्योतिर्विंदेत्तत्र सर्वमूलहोमोप्युक्तः ॥ प्रच्छादनोर्णवस्त्रादि दद्याद्वसुं च कां
चनं ॥ स्नानांते होमयेद्विप्रः सर्वमूलानि तत्र वै इति ॥ देवताश्च मूलं गृह्णीयाद्राशिमं
तेभ्यः प्रणम्याथ क्षमापयेत् ॥ दद्याद्दन्नपायसादि ब्राह्मणान् भोजयेत्ततां ॥ आला
भे सति पंचाशद्दशाकं तदलाभतः ॥ सर्वशांतेश्च पवनं ज्ञात्वा लेशाविषस्तथा ॥ गृही
क्षमापयेद्विद्वान् निरृतिः प्रीयतामिति ॥ विधानेच रितस्मिंस्तु स्तततः शांतिर्भवि
ध्रुवं ॥ गंडांतेष्वेवमेव स्यात्पुष्पाद्येधिनुमसर्वेष्वेवं शांतिः कार्येत्यर्थः ॥ ससाष्टके
द्वादशाहे कुर्याच्छांतिमादरात् ॥ इत्युक्तं मनुना सम्यङ्मूलजातहिताय च ॥ मा
तापित्रोर्धनस्यापि नृपदोषोपशांतये ॥ इति शौनकोक्तमूलशांतिः ॥ शांतमूलानि
देवज्ञमनोहरे पुराणे समुच्चये ॥ बर्हिःशिखा हरिक्रांता सहदेवी पुनर्नवा ॥ श

रपुंरवा ५ वराहीच ६ काकजंघा ७ मुलस्मणा ८ तुंबिका ९ चैवककंधु १० कपूरी
११ काउचक्रिका १२ कर्कोटिकाच १३ चक्रांका १४ श्वेताकों १५ व्याघ्रपत्निका १६
रुदंती १७ चाश्वगंधाच १८ मुशली १९ गिरिकर्णिका २० इंद्रवारु २१ अपामार्ग २२
शंखपुष्पी २३ कुमारिका २४ शाल्मकी २५ चाश्वगंधारी २६ निर्गुंडी २७ देवदारुका २८
वटः २९ शमी ३० तथाप्लक्षा ३१ पलाशो ३२ ग्वच्छ एवच ३ चतश्चोडुंबरोजंबू —
वृक्षोयचेतसः पुंनागोयाजृनः शोकोवकुलोश्मतकस्तथा ॥ शातस्तालस्तमाल
श्चपाबलाशातपत्रिका ॥ मधूकश्चशिरावस्व — श्चाश्वहती हुपं ॥ बलावातिब
लाचेवपाटनागबलास्तथा ॥ जातीचबकुलश्चेवकेतकी कदलीतथा ॥ मातु
लिंगीजयंतीच पलानीमुद्रिकातथा ॥ ओपिपुष्पीतथाकुंभी श्रीपर्णीदमन

स्तथा ॥ चंपकंपद्मकंचैवतथाकांचनपुष्पिका ॥ सिद्धेश्वरी — वदरावृक्षोयवस्त
था ॥ कुंदश्च मुचुकुंदश्चगोजिका हरकंजूका ॥ दाडिमीबीजपूरीचआम्राचामल
कीतथा ॥ भृंगराजअधोपुष्पी मत्स्याक्षीचाटरूषकः ॥ तरंगिणीगुडूचीच निशा
कात्रातमूलिका ॥ वाकुचीकाकजंघाचवर्वरातुलसीतथा ॥ कुशः काशः श्चेक्षु
मूलंतथा सर्षपमूलका ॥ १०० अलाभेचोक्तवृक्षाणांसदृशाणांसमाहरेत् ॥ अ
थैतेषांमध्येदेशमध्येदेशभाषानामानि ॥ मपूरशिखाविष्णुक्रांतासहदेवीश
दहपुनर्नसरयोका ॥ वराहीकंदामसीलक्ष्मणा ॥ लोकीनेरि १० कपूरीकरेवुख
खसा ॥ चकवडी ॥ श्वेताकीहेंसि ॥ रुदंतीअसगंधा ॥ मूसलीकोरैया ॥ २० ॥ इंदारुनि
विदविरा ॥ शंखपुष्पी ॥ पिलकुकारिसालो ॥ गंधमसादनी ॥ मेरुडी ॥ देवदाली

ग्रां० र०
७८

बट ग्रामी ३० पाकरीपरापीपरआं ‾ गरिजामुनिधन बहेरा चेतसनागकेस
राकोहा ४० अशोका बोलसरी पाषाणभेद- शाल तमाल पाडरी सेंवती
मठवासिरिसि ५० वेलक टाही नडीक टाइ वरिमार ककही पाटि गुरस
करी चवती वकुल केवराद्दवेरा चिरंझर जैति अजवानि पुंडिका गूमा
जलकुंभी कनीरि रोना चंपापद्मकाष्ट पाटकसेरैया मुइचंपा वडिवेरवि
रोंजी धव- कुंद मुचुकुंद गोमी मुंजी ८० अनार अम्लवेतस ब्राह्मी औरग
नगंरिया अधहुली गंडिनी अरुसससे तारां गुरुचि ८१ हरद सतावरो च ७८
कुरी कोवाडोडी भ्रमरीस्यष्टमन्यत मदनरत्नेहेमाद्रौ चगर्गस्त्वन्यथाप्याह
स्वयमुत्पाटयेत्माज्ञा मूलानां वाज्ञातं पिता लक्ष्मणाज्ञातमूलाचशिरीषो

चेनसस्तथा सहकाश्वेतमूलाचविष्णुक्रांताथशंखिनी सर्पाक्षीमीननेत्राच पु
त्रपाराकृतांजलिः पलाशो बिल्वकश्चैवरोचनाचंदनंक्षयं कृष्णामांसीमुरोशीरं
बालकंचामला तथा गोजिकातुलसी जसी कृष्णाज्ञातपुष्पास जांगली ब्रह्मदं
डीज्ञोणपुष्पाप्रियंगुःसितसर्षपत्र पिप्पलीकाकजंघाचत्रायमाणहहुस्तथा
ज्योतिष्मतीचगांधारीतिनगंधः पूर्णकोशिका भगहमासुभद्राचगुडूचीसेंद्रवारु
णी अलंवुकारुदंतीचकदलीकेतकी तथा गोक्षुरश्चातपर्वाचअरिष्टापराजिता
छिन्नरुहाश्वेतपत्राचवृकिंभाचसुवर्चला अश्वगंधाहस्तिणी हरिद्रादितयंत
था ‾ द्रवोमधुकारश्चअश्वत्थोवहलस्तथा सर्जराचापमार्गंचमंदारश्चातिमु
क्तकः मालतीस्वर्गपुष्पाचश्रीपर्णश्रीफलं तथा दर्भमूलं करवीरंमदयंतिवि

शां०र० ७९

कंकता॥ पाटलासुरदारुश्च अर्धसू—रकस्तथा॥ फलंमन्मथवृक्षस्यपलाशस्यचप
द्रवः॥ रास्नानदीवृक्षमूलंसुरदारुविदारिका॥ श्वेतवीर्याश्वेतपाकानीलोत्पलंतथै
वच॥ नागकेसरंचासिंदूरीकुमारीचैवनिक्षिपेत्॥ शतमूलाशतावरीसहाकासह
देवी॥ श्वेतमूलापुनर्नवा॥ मीननेत्रामत्स्याक्षीपुत्रिणीपुत्रजीवाकृतांजली॥ अंज
लिनिहाथाजोडीवेतिप्रसिद्धा॥ पलाशंकटफलंचंदनंद्वयंश्वेतंपीतंच॥ उशीरंवी
रणं॥ आमलाभूम्यामलकागोजिह्वागलकुंभीतिप्रसिद्धाब्रह्मदंडा॥ अधःपुष्पा
श्रोणपुष्पाकंबुकःकाकजंघाएकांगीज्योतिष्मतीमालकांगुणी॥ गांधारीपूर्णा
कौशिकाकोशातकीभंगाहेमात्रिगन्धा॥ सुभद्रासारिवा॥ अलंबुकाजंबीरःशतपर्वाव
च॥ अरिष्टिकानागबलाछिन्नारुहापिंडगूडूची॥ शतपर्णाकमलिनीकुंभादं ७९

तिभेदः॥ सुवर्चलासूर्यभक्तिकाहस्तिकर्णपरंडः॥ उरुवकःपीलुःमधुकारोमधुकः॥ स
र्जराबीजकः॥ अतिमुक्तकामधवीजातीस्वर्णपुष्पिकाकुशाली॥ मदयंतीयूथिका
॥ अधस्तदतिकापर्लंकोमन्मथवृक्षः॥ आम्रवृक्षः सुदारुदेवदारुः॥ विदारकाभू
कूष्मांडी॥ श्वेतवीर्यागिरिकर्णाश्वेतपाकागुंजा॥ स्पष्टमन्यत् सर्वौषध्यस्तु॥ सु
रामांसीवचाकुष्ठंशैलेयंरजनीद्वयंसठीचंपकमुस्ताचसर्वौषधिगणःस्मृतः॥ सु
मुराएकांगी॥ जटामांसी॥ शैलेयंमनसिला॥ सटीकचोरा॥ स्पष्टमन्यत्कात्यायन
ः ॥ मूलेनसत्रेमूलविधानंकुर्यात्सर्वौषध्यासर्वगंधैश्चसंयुक्तं॥ तत्रोदकुं
भंकृत्वासवस्त्रगंधपुष्पारक्तसिद्धार्थकुसुमयुक्तंकुर्यात्तस्मिन्रुद्रान्जपित्वाप्र
तिरथंरक्षोघ्नंचद्वितीयोदकुंभेकृत्वाचतुःप्रस्रवणसंयुक्तंउपरिष्टान्मूलानिधा

शां०र०
८०

रयेद्वंशपात्रेकृत्वावस्त्रेणबध्वातस्मिन्नधान्यानिमूलानिवृक्षास्त्वष्टादशमाषहिर
ण्मयमूलसप्तधान्यानिकार्पासहदेव्यपराजिताकरवीराशंखपुष्पीपृ
श्नीमधुयष्टिकाचक्रांकितामयूरशिखाकाकजंघाकुमारिकाद्वयंजीवंत्यपामार्ग
भृंगराजलक्ष्मणासुलक्ष्मणाज्योतीव्याघ्रपदीचक्रमर्दकसिंहीस्वराम्बचौडुंब
रपाश्वप्लक्षवटार्कदूर्वारोहितकशातावरीजटामांस्यादिमूलकंतत्पूरयित्वातस्मि
न्निषिद्धानिमूलानिवृक्षानिविल्वधवनिं— कर्दबराजवृक्षशोजुप्रियासुरचि
कपित्थातस्मिन्निषिद्धानिमूलानिवृक्षानिविल्वधवनिंबकदंबराजवृक्षाशोलु
प्रियालुदधिकपित्थकोविदारश्लेष्मांतकविभीतकशाल्मलिसरलसर्वकंटकि
वर्जेत्तत्राभिषेकंकुर्यात्पितुःशिशोर्जनन्याद्देवस्यत्वेत्यौडुंबर्यासंदीमुदगग्रा ८०

मास्तृणानितत्रासीनानमं—तेनाभिषिंचेत्शिरसोध्यनुज्योमंत्रीरोमेश्रीर्यशाइति
यथालिंगंअंगानिसंस्पृशातिस्तनादूर्ध्वंनैर्ऋत्यांपायसंश्रपयित्वाश्मर्यमयंस्रुकु
सुवंप्रतिपाद्यसंमज्याग्वारघ्यआघारावाज्यभागौहुत्वाअसुन्वंतमितिचतस्त्रः
स्थालीपाकेनजुहुयात्मानस्तोकइतिद्वाभ्यांयात्तेरुद्रशिवातनूरितिषड्भिरर
क्षांसिसेधतिशुक्रशोचिरमर्त्यः॥शुचिःपावकईड्यइतिवंसोमविश्वतोरक्षाभ्रा
जन्नघायतः॥ततस्विष्टकृदादिप्राशनांतंकृत्वागोकृच्छ्राम्व
स्तिलहेमपद्ममूलसप्तधान्यसंयुक्तमाचार्यायदद्यात्कृष्णोनडुहान्ब्राह्मणेभ्योद
द्यात्सत्रसूचकेभ्योवासोदद्यादन्येभ्योब्राह्मणेभ्यःसुवर्णंदद्यात्कृष्णगोपा
पसेनब्राह्मणान्भोजयेत्प्रार्थयेत्॥सापदैवतेगंडजातएषविधिः॥कात्या

Dr. BHAU DAJI
डाक्टर भाऊदाजी इत्यस्य

शां०र०
८१

यनेनोक्तः कृते शांतिर्भवतीति॥ अष्टादशमाषमितसुवर्णकृतं मूलं॥ केचित्तु अ
ष्टदशमाषमितिपठंति॥ मूलनामानि तु कारमयाकिंभारिबात्ताजउरोरे॥ अधःपु
ष्पी अधम्नुहीमधुयष्टिकाज्येष्ठामधुचक्रांकितातिबलाकाकजंघाकोबाटोदी॥
धिउकुंवारिवडीधिरुकुंआरिघोंटांजीवंतिचिडूचिराभंगरसालुलक्ष्मणापुत्तली
सहदेवीजातीवबेलीव्याघ्रपत्रीहोसिसिउम्बरा जैतिरोहितसुगंत्तणां एतानि
अन्यानि तत्तच्छास्त्रसिद्धानि सहदेवरूपकानि अन्यानि शतमूलांतर्गतानि श्राद्या
णि तदभावे कानि विद प्रतिषिद्धानि॥ यानि विहित्त निषिद्धानि॥ तेषु विकल्पः॥
॥ अथ विकशौनकोक्तमूलशांतिप्रयोगः॥ ॥ अक्ककालेगोमुखप्रसवं कृत्वा ८१
देशकालौ संकीर्त्य मम अस्य कुमारस्य वा मूलप्रथमचरणादिजन्मसूचित पित्रादि

शारिष्टसांतिद्वारा श्री परमेश्वर प्रीत्यर्थं शौनकोक्तविधिना सनक्षत्रहोमसहितां मूलजनन
शांतिं करिष्य इति संकल्प्य गणेशपूजनपुण्याहवाचनमातृपूजानांदीश्राद्धानि कृ
त्वाचार्यं ब्राह्मणान् सदस्यमृत्विजश्चाष्टौ चतुरो वाकल्प्य मधुपर्कवस्त्रालंकारादि
भिर्यथाविभवमर्चयेत॥ ततआचार्यः॥ प्राणानायम्यास्मिन्कर्मण्याचार्यकर्मकरि
ष्येति संकल्प्य यदत्र संस्थितमिति सर्षपान्विकीर्यापोहिष्ठादिमंत्रैः कर्मभूमिंप्रो
क्ष्य सलक्षणमंडपपक्ष्येमंडप देवता पूज्यादिकुर्यात्॥ ततस्तत्रेशानदेशे वर्णके
: स्वस्तिकं विरच्य तत्र महीद्यौरितिभूमिस्पृष्ट्वा ओषधयः समिति शोण प्रमाणा
न्व्रीहिन्प्रक्षिप्य तत्र कलशो पिति रुद्र कुंभं निधायेमंमेगंगेति तीर्थकारिणापू
र्यगंधद्वारामिति गंधं या ओषधीरित्योषधि ओषधयः समिति यवान्काडांको

शां०र०
८२

ड्रादित्तिदूर्वाः अम्बुच्छेवइत्तिपंचपल्लवांश्च स्योनापृथिवीतिसप्तमृदः याः फलि
नीरितिफलंसहिरत्नानीतिपंचरत्नान्यापोहिष्ठेतितत्त्चेनपंचगव्यंहिरण्य
रूपइतिसुवर्णंचप्रक्षिप्ययुवासुवासाइत्तिसूत्रमावेष्ट्य पूर्णादर्वीतिपूर्ण
पात्रनिधानंकुर्यात् ॥ तत्रप्रतीकग्रहणंमंत्रावृत्तिः ॥ ततःपूर्णपात्रोपरिस्थवस्त्रे
सुवर्णनिर्मितांरुद्रप्रतिमांत्र्यंबकमितिमंत्रेणावाह्यतेनैवषोडशोपचारैःपू
जयेत् ॥ अत्रोभयत्रशक्तितएकादशाष्टद्वित्रिप्येकसंख्यावाऽऽवाहाःकेचित्तु रु
द्रः ॥ सर्वसाधारणेबह्वृचछंदोगयोस्तुसूक्तसाम्नोरुद्रेणसहविकल्पइत्याहु ८२
ः ॥ तत्ररुद्रत्वासंघर्षाद्युग्येवच्छूनोरुद्रसक्तानांनुकद्रुद्रायेतिनवर्चस्यघोरःक
ण्वोरुद्रोगायत्रीजपेविं० ॥ इमारुद्रायतवसइत्येकादशर्चस्यकुत्सऋषिः रुद्रो

देवताआद्यानवजगत्योंत्येत्रिष्टुभौजपे० आतेपितरितिपंचदशर्चस्यगृत्समदये
रुद्रादोरुद्रयास्थिरेवलनइतिचतसृणांवसिष्ठोरुद्रस्त्वोजगत्योंत्यात्रिष्टुप्जपेवि
० ॥ आवोराजानमित्रिष्टुप् इनमित्स्येकादशानाएकारुद्रसाम्नांवामदेवऋषिःरुद्रोदेवता
आद्यस्यसाम्नात्रिष्टुप्ततश्चतुर्णांगायत्रीततस्त्रयाणांत्रिष्टुप्ततस्त्रयाणामु
क्तिछंदः जपेविं० ॥ ततपूर्वैश्चलिकूमध्यकुंभेत्र्यंबकमितिमंत्रमष्टोत्तरसहस्रं
जपेत् ॥ अंत्येउक्तक्रमेणचत्वारिसूक्तानिजपेतानि ॥ आयुःशीघ्रोनइतित्रयोद
शर्चस्यसूक्तस्यइंद्रोप्रतिरथऋषिःइंद्रोदेवताचतुर्थ्याबृहस्पतिःत्रिष्टुप्छंदः
अंत्यानुष्टुप्जपे० ॥ त्वमग्नेरुद्रइत्यनुवाकस्यहव्यवाऋषिःआत्मारुद्रोजगती
जपे० ॥ त्वमग्नइतिरक्षामंत्रवामदेवो त्रिष्टुप्जपे० ॥ रक्षोहणमितिपंचविंश ति

शां०र०
८३

चस्यमत्कस्यांगिरसः॥ पायुरग्निस्त्रिष्टुप्चतस्त्रोंत्यानुष्टुप्जपे०॥ अत्रसंख्या पू
र्वोक्ताशक्त्याग्राह्या॥ चतुर्थोपिवमानमप्येकवारंजपेत्॥ यद्वाएतेषामपिरुद्रकुं
भएवजपः॥ चतुर्षुतुशांतिजपइति॥ एवंपंचकुंभासंभवेकुंभसंस्थाप्य॥ अस्मि
न्येवेरुद्रकुंभेपूर्वोक्तरुद्रादिसर्वजपः॥ अन्यकुंभेतुवरुणमावाह्यशांतिरुद्रजपं
कुर्यात्॥ अथवापंचकुंभस्थानेकएवचतुःप्रस्थपूर्णः॥ तत्रमध्यकुंभेकार्याणिम
ध्यमुखे॥ कुंभचतुष्टयकार्याणितुचतुर्षप्रस्थपूर्णेष्वितिविवेकः॥ ततः पूर्वस्था
पितकुंभोत्तरस्यचतुर्विंशद्दलंपंकजंपंचवर्णैः शुक्लतंडुलपिष्टेनवाकृत्वातत्र
कर्णिकायांमहिद्यौरित्यादिनाकुंभंसंस्थाप्यतत्रेमंमेगंगइतिजलमापूर्यगंध ८३
द्वारामितिगंधंक्षिप्त्वातत्रश्चात्तमूलानिक्षिपेत्॥ तद्दलाभेविष्णुक्रांतासहदे

वीतुलसीशतावरी॥ प्रक्षिप्यकुशान्कुंकुमंतत्रप्रक्षिप्ययाभ्यंषधरित्यादिपूर्ण
पात्रनिधानांतंकृत्वोपरिवस्त्रेष्टदलंकृत्वा॥ कर्णिकायांमोषुणइतिनिष्कतद्ध
तदर्धनिर्मितांनिर्ऋतिप्रतिमांपंचामृतस्नापितांसंस्थाप्यात्तदक्षिणतःइंद्रवो
मधुच्छंदाइंद्रोगायत्रीअनेनेंद्रं॥ तदुत्तरतश्चअश्रुमेधातिथिरापोनुष्टुपइत्ययं
स्थापयेत्॥ ततःप्रागादितश्चतुर्विंशतिषुभूमिस्थदलेषुउत्तराषाढासहितानूरा
धांतानिनक्षत्राणितद्देवतावास्थापयेत्॥ देवताश्चविश्वेदेवताःविष्णुः॥ व
सवः वरुणः॥ अजैकपात्॥ अहिर्बुध्न्यः॥ पूषा॥ अश्विनौयमः अग्निः॥ प्र
जापतिःसोमः रुद्रः॥ अदितिः॥ बृहस्पतिः॥ सर्पाः॥ पितरः॥ अर्यमा सविता
त्वष्टा॥ वायुः॥ इंद्राग्नी मित्रइति ततोलोकपालानावाहयेत्॥ ततोनैरृत्यां

शां०र०
८५

तमग्निस्थापनंकृत्वातदीशान्येनवग्रहांस्तत्तन्मंत्रैरावाह्यान्वाधानंकुर्यात्॥तद्य
था॥समिद्व्यमाद्यायचरुर्षीआज्येनेत्यंतमुक्त्वानवग्रहान्अमुकसंख्याभिःसमि
त्तिलाज्याहुतिभिःअधिदेवताःप्रत्यधिदेवताःलोकपालान्॥विनायकादींश्च
प्रत्येकममुकसंख्याभिस्समिच्चर्वाज्याहुतिभिःनिर्ऋतिप्रतिरूपमष्टोत्तरशतसं
ख्याभिर्घृतसंमिश्रपायससमिधाज्यचर्वाहुतिराज्यपक्तिभिः॥इन्द्रमश्चप्रतिरूप
मष्टाविंशतिसंख्याभिर्घृतसंमिश्रपायससमिधाज्यचर्वाहुतिभिःविश्वेदेवाद्याश्च
तुर्विंशतिदेवताअष्टाष्टसंख्याभिःपायसाहुतिभिःरक्षोहणंशृणुषोतिपंचदशा ८५
र्भिःप्रत्यचमष्टसंख्याभिकृसराहुतिभिःसवितारंदुर्गांत्र्यंबकंस्वस्तिकृत्तुतिदु
र्गांवास्तोष्पतिंअग्निंक्षेत्राधिपतिं—मित्रावरुणौअग्निंएताःअष्टासंख्याभिःकृ

सराहुतिभिःश्रियंहिरण्यवर्णामितिपंचदशार्ग्भिःप्रतिमंत्रमष्टाष्टसंख्याभिःसमिदाज्य
चर्वाहुतिःसोमंत्रयोदशावारपायसाहुतिभिःरुद्रंचतुर्गृहीतेनाज्येनअग्निंवायुंप्रजा
पतिंचाज्येनशेषेणस्विष्टकृतमित्यादिपूर्णपात्रनिधानांतंकृत्वास्वमंत्रैर्निर्ऋत्यादि
पूजांकुर्यात्॥तत्रवस्त्रंवस्त्रयुग्मंरक्तचंदनंगंधःकृष्णासुरभीपुष्पाणिधूपोमेषशृं
गस्य॥आज्यस्यदीपः॥पुरुषाहाराख्यंपोलिकान्नाख्यमाषसुरास्यानेसैंधवमिश्रि
तंक्षीरं॥मांसस्थानेलवणयुक्तंपायसं॥छन्नियादीतुसतिसंभवेमुख्यमेव॥एताव
नैवेद्यं॥आचमनादिपुष्पांजल्यंतांपूजांकृत्वामुष्मैत्वेत्यादिआन्वाधानक्रमेणपा
यसकृसराचरून्श्रपयित्वाज्यभागांतंकुर्यात्॥ततोयजमानोदक्षिणतःसर्वा
देवताउद्दिश्यत्यागंकुर्यात्ततोऽस्त्विक्सहितआचार्योजुहुयात्॥तद्यथा नवग्र

हाधिदेवता प्रत्यधिदेवता विनायकादीनां तत्तन्मंत्रैः समिदाज्यचरून्पूर्वोक्तसंख्या हुत्वा निर्ऋतेरिंद्रस्य पांचमंत्रैःक्रमेण त्र्यचतुष्टयं हुत्वाऽभ्यग्निर्जुहुयात्॥ कृणुष्वेति पंचदशार्चस्य गोतमो वामदेवो रक्षोहाग्निः॥ कृशरं होमे वि० प्रत्येकं अष्टसंख्यया जुहुयात्। गायत्र्याष्टसंख्यया सवितृ कृसरा हुतीर्हुत्वा जातवेदसे कश्यपो दुर्गा त्रिष्टुप् कृसरं। सीरायुंजंतीत्यस्य बुधः सोमपऋषिः क्षेत्रकृत्तिर्देवता गायत्री छंदः कृसरं॥ तामग्निवर्णामिति भरिर्दुर्गा त्रिष्टुप् कृसरं॥ वास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् कृसरं॥ अग्निं कण्वो मेध्यातिथिर्गायत्री कृसरं॥ क्षेत्रस्य वामदेवः क्षेत्रपालोऽनुष्टुप् कृसरं। त्वणीनाजमदग्निर्मित्रावरुणौ गायत्री कृसरं॥ अग्निर्दूतं पुरोदधे इत्यस्य आंगिरसो विरूपोऽग्निर्गायत्री कृसरं। हिरण्यवर्णामिति पंच

दशार्चस्य सूक्तस्य आनंदकर्दमचिक्लीतेंदिरासुता ऋषयः श्रीर्देवता आद्यास्तिस्रोऽनुष्टुभः चतुर्थी प्रस्तारपंक्तिः॥ पंचमस्य सूक्तस्य आनंदकर्दमचिक्लीतेंदिरासुता ऋषयः श्रीर्देवता। षष्ठ्याद्यास्त्रिष्टुभो अंततोऽष्टावनुष्टुभः अंत्याः प्रस्तारपंक्तिः होमे वि० प्रत्येकं समिदाज्यचरून्ष्टाविंशत्यष्टोत्तरशतसंख्यया जुहुयात्। त्वं नः सोमं विश्वतस्त्यस्य गोतमः सोमस्त्रिष्टुप् पायसहोमे वि०॥ त्वं नः सोमं विश्वतो गोपा इति वा मंत्रः त्वं नः सोमं सुक्रतुरिति वा॥ अनयोर्वैरूपो विमदः सोमः प्रस्तारः पंक्तिः॥ तत्त्वं स्तुतर्गृहीतमाज्यं गृहीला यात्ते रुद्र ज्योति कश्यपो रुद्रः स्वराडनुष्टुप्॥ अनेन जुहुयात्। ततः स्रुवेण समस्त समस्त माहुतिभिराज्यं हुत्वा स्विष्टकृदादि प्रायश्चित्त होमांतं कुर्यात्॥ ततो दिक्पालेभ्यो नवग्रहेभ्यो विनायकादिभ्यो निर्ऋतये रंगाय —

८५

ग्रां०र०
८६

द्यारुह्यायचेत्रपालायचसदीपमाषभक्तबलीन् दद्यात्॥ ततआचार्योयजमानो
वाचूतनगृही तेनक्वादचागृही तेनावास्तुचंपूरयित्वा॥ तत्रफलादिकमवृक्षमपू
र्णाहुतिंजुहुयात्॥ तत्रमंत्रः समुद्रादू॰ मिरित्येकादशर्चस्यसूक्तस्यगोतमोवा
मदेवोग्नि॰ त्रिष्टुप् अंत्याजगतीपूर्णाहुतिहोमेवि०॥ प्रजापतेहिरण्यगर्भ
ः प्रजापतिस्त्रिष्टुप् पूर्णाः पूर्णाद्विति॰ विश्वेदेवाः शतक्रतुरनुष्टुप् पूर्णा०
सप्ततेअग्नेसप्तवानग्निर्जगतीपूर्णा०॥ पूर्णाहुतिंहुत्वाप्रणीतानिनयनादिक
र्मशेषंसमाप्यजातारएषग्रहशांतिकरणप्रक्षेप्यिलासमारोप्यशांत्यासहनव
ग्रहमखाकरणेइदानींतस्मिन्नेवाग्नौपृथकूर्चग्रहमखः कार्यः॥ ततश्चतुःकुंभ
मध्यवर्तिनंकुंभदक्षिणतःस्पृष्ट्वात्र्यंबकमितिमंत्रशातवारंजपेत्॥ याजुष ८६

Dr BHAU DAJI

श्चेद्यजमानस्तदारुद्रैकादशिनीमपिजपेत्॥ बह्वृचश्चेद्रुद्रसूक्तानिमागमश्चेद्रु
द्रसमानि॥ आथर्वणश्चेत्र्यंबकमात्रं॥ अथवाएकादशीं छत्रिध्येकसंख्यासर्वत्र
ग्राह्या॥ ततःस्थापितदेवताःसंपूज्यत्र्यंबकंमोषुणइत्युपस्था॰ सर्वकजशोदकं
पात्रांतरेगृहीत्वासत्विग्याचार्योयजेमानंसर्वौषधीभिरनुलिप्तांगंधृतनववस्त्रं
तद्वासतोधृतनववस्त्रांसपुत्रांपत्नीमुपवेश्यवक्ष्यमाणेमंत्रैरभिषिंचेत्॥ पित्तम
हेनकश्चसर्पेनचधारयित्वावहत्कुंभंशातच्छिद्रंसमाहितइत्युक्तंतेच॥ अग्नीभ्याम
भिषण्णांकाश्यपोविदहात्यस्मनाशनोनुष्टुप् अ॰ः त्रिभिषेंदेवेतिसप्तानांवसि
ष्ठऋषिः आद्यांतात्रपाणामग्निर्देवता श्चतुर्णांविश्वेदेवाः॥ आद्यगायत्रीद्वि
तीयानुष्टभतत्रस्त्रिस्रोगायत्र्यो त्येहेअनुष्टुभौपंचमीवर्धमानासप्तमीप्रति

शां०र० शा अभि॥ आपइंद्रोत्ति कयोः संपूर्णयो विश्वेदेवाः आनुष्टुभ॥ सहस्राक्षेति प्रजाप
८१ त्योपस्थ नाराणो पस्तमहात्रिष्टुभ॥ देवस्यत्वेत्यापस्तंब शाखागते खिभिर्मंत्रैः॥ १
प्रजाप्रतरस्तिषणां प्रजाप ति मनिस्त्रिष्टुप्॥ ततः॥ योसौ वज्रधरोदेवो महें
द्रो गजवाहनः॥ मूलजातशिशोर्दोषं मातापित्रो व्यपोहतु॥ योसौ शक्तिधरो
देवो निहतभुग्मेषवाहनः॥ सप्तजिव्हश्च देवोग्नि मूलदोषं व्यपोहतु॥ योसौ ख
ड्गधरोदेवो निरृतिराक्षसाधिपः॥ प्रशामयतु मूलोत्थं दोषं व्यपोहतु गंडांतसंभ
वं॥ योसौ पाशधरोदेवो वरुणश्च जलेश्वरः॥ नक्रवाहः प्रचेता नो मूलोत्थान्सं व्य ८१
पोहतु॥ योसौ देवो जगत्प्राणो मारुतो मृगवाहनः॥ प्रणामयतु मूलोत्थं दोषं बा
लस्यशांतिदः॥ योसौ निधिपतिर्देवः खड्गभृद्वाजिवाहनः॥ मातापित्रोः शिशो

श्चैव मूलदोषं व्यपोहतु॥ विघ्नेशा क्षेत्रपो दुर्गा लोकपाला नवग्रहाः॥ सर्वे दोषा प्रश
मनं सर्वे कुर्वंतु शांतिदाः॥ ततः सुरास्त्वामभिषिंचंतीत्यादि मंत्रैरभिषिंचेत खं
योरांपु विश्वेदेवाः शाक्वरा आभिः॥ ततो रुद्रान्निर्ऋतिशांतिकलशोदकेनान्येन च
शांतच्छिद्रमंतधर्मया अभिषिक्तो यजमानो धौतेवाससी पसी परिधाय तिलकं कृ
त्वा विभूतिं कृत्वा संकल्पपूर्वकमाचार्यादीन्पूजयित्वा ततो दक्षिणां दद्यात् १
॥ तत्राचार्याय सवत्सां दोग्ध्रीं धेनुं दक्षिणां दद्यात्॥ कश्यपेन तु आचार्याय वृष
लोहं पिंडं दद्यात् स्त्र दक्षिणामित्युक्तं ब्राह्मणेभ्यः रुद्रजापिने कृष्णमनड्वाहं ऋत्विग्भ्य
श्च यथाशक्ति दक्षिणां दत्वा भूयसीं दत्वा निरृत्यादीनामुत्तरपूजां विधाय॥
उत्तिष्ठ० यांतु देवइति विसृज्याचार्ये हस्ते प्रतिपाद्याग्निं संपूज्य गच्छेति वि

शां० र०
८८

सज्याशांत्यर्थंशतंतदर्धंतदर्धंविप्रान्संभोज्यशांतिसूक्तजपंकारयित्वायस्यस्य
तेतिजपित्वाकर्मेश्वरार्पणंकृत्वाभुंजीत॥ ॥इतिकमलाकरभट्टकृतेमूल
शांतिप्रयोगः॥ ॥अथआश्लेषाशांतिः॥ ॥तत्रपादफलंप्रागुक्तं॥जयार्णवेमू
र्धास्यनेत्रगलकांसयुगंचबाहुहृज्जानुगुह्यपदमित्यहिदेहभागाः॥बाणाग्नि
षट्हुतभुक्कृतिनागरुद्रषण्नंदपंचविरसःक्रमशास्तुनाड्यः॥राज्यंपितृत्याग
योषात्वनाशःकामक्रियारतिः॥पितृभक्तोबलीस्वघ्नस्त्यागीभोगीधनीक्रमा
त्॥विशेषस्तुनिर्णयसिंधौज्ञेयः॥शांतिमाहशौनकः॥आश्लेषायांतुजाता
नांशांतिंवक्ष्याम्यतःपरं॥जातस्यद्वादशाहेचशांतिहोमंसमाचरेत्॥अ
संभवेतुजन्मर्क्षेअन्यस्मिन्वाशुभेदिने॥स्नातोभ्यंगादिभिस्तत्रऋत्विग्वरयेत्द्वि

८८

जोत्तमान्॥विभवेपंचकुंभास्तुद्वयंवातदलाभतः॥देवतास्थापनंचैकमेकंरुद्रा
भिमंत्रणे॥मूलर्क्षोक्तप्रकारेणकुंभौनिक्षिप्यपूजयेत्॥गोमयोलेपितेदेशेधान्य
राशौपरिशोभिते॥पंकजंकारयेत्तत्रचतुर्विंशद्दलान्वितं॥तंडुलैःकारयेद्धीमा
रक्तपीतसितासितैः॥कर्णिकायांन्यसेद्धीमान्स्थापयेत्तेषुकुंभकौ॥आकलशे
ष्वित्यनयाकलशस्थापनंमतं॥इमंमेगंगमंत्रेणपूरयेत्तीर्थवारिणा॥कुंभंचगं
धवस्त्राद्यैस्तत्तन्मंत्रैःप्रपूजयेत्॥याःफलिनीरित्यनयाक्षिपेत्फलौषधादिकान्
॥कुंभोपरिस्थपात्रेतुआश्लेषाप्रतिमांयजेत्॥निष्कर्धपादपादैर्वाकारयित्वा
स्वशक्तितः॥तत्पूर्वोत्तरनक्षत्रेदक्षिणोत्तरयोर्यजेत्॥ऐंद्र्यादीशानपर्यंतंमि
तरक्षाणिपूजयेत्॥मूलोक्तेनविधानेनकुंभयोरभिमंत्रणं॥रुद्राचारुप्र

ग्रां०र० ८७

कुंभे तु पूर्ववच्छेषमाचरेत् नमो अस्तु सर्पेभ्यः पूजामंत्रस्तथेरितः ॥ सर्पो रक्तस्त्रिने
त्रश्च द्विभुजः पीतवस्त्रकः ॥ फलकासिधरस्तीक्ष्णो दिव्याभरणभूषितः ॥ एवं ध्या
त्वा ततोभ्यर्च्य होमकर्म समाचरेत् ॥ कर्तृश्रेण स्वोक्तमार्गेण आचार्यस्याथवाचरे
त् ॥ मुखांतां कर्म निर्माय हविराज्यमंत्रास्त्रतः ॥ इदं सर्पेभ्यो जुहुयात्राधिप्रत्य
धि देवता ॥ अष्टोत्तरशतं वाथ अष्टाविंशति वा ॥ मूलनक्षत्रवच्छेषं होमकर्म
समाचरेत् ॥ पूर्णाहुत्यंतकर्माणि कृत्वा संपातयेत्तथा ॥ संपातआज्यहोमेषु ॥
कुंभजलेषु प्रक्षिप्य अभिषेकमथाचरेत् ॥ दारपुत्रसमेतस्य यजमानस्य पूर्वव ८७
त् ॥ अभिषिंचेत्तथाचार्यो ऋत्विजः सहितस्तथा अभिमंत्र्य तकुंभाद्भिरभिषेचन
माचरेत् ॥ तथा पौराणमंत्रैश्च पल्लवैरभिषेचयेत् ॥ आश्लेषाऋक्षजातस्य

मातापित्रोर्धनस्य च ॥ भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु ॥ योसौ वागीश्वरो
नाम अधिदेवो बृहस्पतिः ॥ मातापित्रोः शिशोश्चैव गंडांतं च व्यपोहतु ॥ पितरः स
र्वभूतानां रक्षंतु पितरः सदा ॥ सर्पेन सक्षजातस्य वित्तं च ज्ञातिबांधवान् ॥ एवं कृ
तेभिषेके तु सर्वशांतिर्भवेद्ध्रुवं ॥ ततः शुक्लांबरधरो यजमानः सुभूषितः ॥ दक्षिणा
भिस्ततो विप्रान् मूलवच्च प्रतोषयेत् ॥ इत्युक्तेन विधानेन सर्वारिष्टं व्यपोहतु ॥ स
र्वकामश्च सिध्यंति वै दीर्घायुर्भविष्यति ॥ अर्घ्यमंत्रमाह ॥ सर्पाधीश नमस्तुभ्यं ना
गाणां च गणाधिप गृहाणार्घ्यं मया दत्तं सर्वारिष्टप्रशांतये ॥ मूलनक्षत्रवत्कुर्यात्
सार्पगंडे स्वनामतः ॥ अभिषेके आश्लेषामूलगंडांतमिति ॥ मूलदोषमित्यत्र सा
र्पदोषं ॥ मूलोच्छायमिति सार्पोच्छाय इति ऊहः कार्यः ॥ इत्युक्तेन विधानेन सर्वारि

शां०र०
९०

रूव्यपोहति॥ सर्वेकामस्सिध्यंतिवेदोक्तायुर्भविष्यति॥ ॥इतिशौनकीयेआ
श्लेषाशांति॥ ॥अथमदनरत्नेपितामहसंहितोक्तामूलाश्लेषाशांति॥ मूलादौ
चद्विघटिकामूज्येष्ठांतिचतथैवच॥ अभुक्तमूलंतत्प्रोक्तंतत्रजातंशिशुंत्यजेत॥ मू
लस्यादौपितृगंडंमातृगंडंद्वितीयकं॥ तृतीयेधनधान्यस्यअंत्यपादःशुभावहः
॥विपरीतंफलंसर्दमाश्लेषास्वपिमूलवत॥ शूलोव्याघातवज्रेचव्यतीपातश्च
वैधृति॥ परिघंवारदोषश्चविष्टिश्चाविषनाडिका॥ अवयोगादिकेयुक्तेमूलेदोषा
धिकोभवेत॥ अथातःसंप्रवक्ष्यामिशांतिकर्मविधिंशुभं॥ निष्केणवाथवानष्टा ९०
सुवर्णेनचनिष्कृति॥ सर्पभेर्यादिगंडंचकुर्याच्छर्पाकृतिंबुधः॥ कुंडंकुर्याद्धस्तमा
त्रंआयामेचतथैवच॥ मेखलात्रयसंयुक्तंयोन्याचैवसमन्वितं॥ मंडपंकारये

त्तत्रयथाविभवसारतः॥ पुण्याहंवाचयित्वातुसंकल्प्ययथाविधि॥ अलंकृतांश्चतुः
संख्यानृत्विजोवरयेद्बुधः॥ आचार्यंवरयेत्तस्मात्संहितं —भिरलंकृतं॥ आनीयचतुरः
कुंभान्कृष्णवर्णसुशोभनान॥ शतछिद्रसमायुक्तंवहकुंभंसुशोभनं॥ सूत्रेणवेष्टितं
मध्येधान्यस्योपरिविन्यसेत॥ शतमूलानिपुण्यानिरत्नानिनवसंख्यया॥ मृत्ति
कादशसंख्याकास्तथापल्लवपंचकं॥ पंचवल्कषायाणिपंचगव्यंतथैवच॥ पं
चसौगंधिकंचैवपुष्पंलोहत्रयंतथा॥ धान्यानिसर्वाणितथाकुशान्दूर्वांतथैव
च॥ तीर्थोदकानिसर्वाणिसर्वकुंभेषुविन्यसेत॥ मूलानिनामतोवक्ष्येशतसंख्या
नियानिच॥ सहदेवीशिखापुंखाविष्णुक्रांतापुनर्नवा॥ चंद्रवल्लीसिकासिकागुं
जाडुविकाचतथानला॥ काकबंधुपर्णदूर्वाकाकमाचीशतावरी॥ केकर्रसुरमं

शां०र०
८१

ब्राह्मीनिर्गुंडीमुसलीवचा॥ वर्षाभूः शंखिनी पाठा समंगा बृहतीद्वयं॥ अपामार्गः कु
शा भंगा काशखं — करूषकाः॥ श्रीवल्लेंद्रय — — — — ब्रह्मवल्लीथवाम्लकः॥ अ
पामार्गः कुशा भंगा काशखं दूकरूषकाः॥ जंबूबिल्वौ मुरामांसी निवारिष्टनिशाद्वयं
॥ कदलीकेतकीतालश्रीपर्णीसिक्तिकी तथा॥ पाटलालोध्रकौ शीरं कोशातकय
ग्निमंथकः॥ जीवंती दाडिमी शालस्तमालं बीजपूरकं॥ पुन्नागो बकुलः कुंदो मधु
रो मुचकुंदकः॥ मुद्गमाषब्रलायैचैव नंद्यावर्त्तः कुरंटकः॥ चंपकः कुमुला की
तथा॥ प्रियंगुश्चंदनं दाली देवदारुशिरीषकं॥ मुद्गली हेममाली च शाताकातामा
ली तथा॥ उशीरं वालखदिरं करंजं च तथैव च॥ बदरोश्वत्थ दलस्य करा कृष्ण
ग्धिपर्णिका॥ रास्ना च शंखिनी चैव नागाक्रायो तकी तथा॥ कमलं कुमुदं को ८१

शोनीलोत्पलं वहद्द्वयं॥ एतानि शतमूलानि सर्वारिष्टहराणि च॥ अभावे शतमूला
नां॥ सर्वौषध्यो विनिक्षिपेत्॥ सर्वौषधीनां चाभावे दशौषध्यो विनिक्षिपेत्॥ अ
भावे दशमूलानां हेममात्रं विनिक्षिपेत्॥ देवदारुनिशायुग्मं पद्मं नीलोत्पलं तथा
॥ कुष्ठं रोध्रं प्रियंगु चेतरं रंमूलमेव च॥ धात्रीफलं च वाकुचि सर्षपा नागरं तथा॥
॥ मुरामांसी तथा चंडी उशीरं वालकं तथा शैलजं गंधपर्णी च श्रीखंडं तालकं त
था॥ सिद्धिवृद्धि समायुक्ताः सर्वौषध्यः प्रकीर्त्तिताः॥ कुष्ठं मांसी हरिद्रे द्वे मुरा शैले
य चंदनं॥ वचा कचूरमुस्तं च सर्वौषिध्यो दशास्मृताः॥ या ओषधीति मंत्रेण पल्ल
वानि विनिक्षिपेत्॥ स्योहिरत्नानि मंत्रेण नवरत्नानि निक्षिपेत्॥ उद्धृतासीति मंत्रे
ण सप्तमृदा प्रविन्यसेत्॥ प्रवोयज्ञेति मंत्रेण पल्लवान् विनिक्षिपेत्॥ रूपतीति

ग्रां०र०
८२

मंत्रेणत्वक्पंचकंविनिक्षिपेत्॥गायत्र्याद्यैः पंचगव्यं॥कांडात्कांडात्‌ दूर्वां॥मधुवातेतिच
मधुस्वादुः पवस्वेतिशर्करा॥कलशस्यमुखेब्रह्मामध्येरुद्रोह्यधोहरिः॥सर्वेसमुद्रा
: सरितः सरांसिचनदा॥स्तिचआयांतुयजमानस्यदुरितक्षयकारकाः॥इमंमेवरु
णेत्याद्यं॥तत्वायामिद्वितीयकं॥त्वंनोअग्नेतृतीयंचसत्वंनोअग्नेततः परं आ
चार्योमूलमंत्रेणवृहत्कुंभेप्रपूजयेत्॥मूलंप्रजामितिमंत्रेणसार्पंदंसार्षइत्यपि
॥शांतछिद्रस्यपुरतोदेवंतत्रैवपूजयेत्॥निर्ऋतिसर्पनाम्नंचवस्त्रयुग्मेनवेष्टये
त्॥इंद्रादिलोकपालांश्चस्वेनमंत्रेणपूजयेत्॥एवंपूजांविनिर्वर्त्यहोमकर्मततः
स्मरेत्॥समिदाज्येनचरुणातिलैःसम्यक्चहोमयेत्॥इंद्रादिलोकपालांश्चस्वे
नमंत्रेणपूजयेत्॥अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा॥मूलंप्रजामित्यष्टो

होमवाक्यंयथाक्रमं॥अनुहोमंततः कुर्यादाज्येनचरुणासह॥प्रजापतयेस्वाहा॥
मूलायस्वाहा॥प्रजायैस्वाहा॥इदंसर्पेभ्यः इतिचवाक्यानष्टोत्तु सार्पभ॥सर्पेभ्यः स्वा
हा॥आश्लेषाभ्यः स्वाहा इंद्रमुकेभ्यः स्वाहेतितिलैर्व्याहृतिभिर्होमंचकारयेत्तुसमाहि
तः॥पूर्णाहुतिंचजुहुयाद्‌ अभिषेकंचकारयेत्॥दक्षिणचशांतिछिद्रंधारयेच्छिरसोप
रिशांतछिद्रेक्षिपेयुस्तेमंत्रैर्वारुणसंभवैः॥समुद्रज्येष्ठादिभिर्मंत्रैर्देवस्यत्वा तथैवच
॥शिरोमेश्रीरितिमंत्रेणापोहिष्ठादिभिस्त्रिभिः॥पुनंतुमादेवजनाः मंत्रैस्त्राता रमेव
च॥द्यौःशांतेत्यादिभिर्मंत्रैर्मानस्तोकेपिमंत्रकैः॥आर्द्रवासांसिसंत्यज्यआचा
र्यायनिवेदयेत्॥आज्यावलोकनंकृत्वासद्धिमायप्रदापयेत्॥आचार्यायवत्संद
द्यादयः पिंडंतथैवच॥सर्वालंकारसंयुक्तांगांसवत्सांसदक्षिणां॥तदर्धंब्राह्मणे

DR. BHAU DAJI MEMORIAL
८२

शां०र० ९३

दद्याद्विप्रोपितदर्शतः ।। ब्राह्मणान्तोषयेत्पश्चाद्यथाशक्त्यनुसारतः ।। अनेन
विधिना शांतिं यः कुर्यात्प्रीतिमान्नरः ।। आयुरारोग्यमैश्वर्यं तस्य शांतिर्भवेद्ध्रुवं ।।
इति कमलाकरभट्टकृतौ मूलाश्लेषाशांतिः ।। अथ प्रयोगः ।। उक्तकाले कर्त्ता
गोमुखप्रसवं कृत्वा देशकालौ स्मृत्वास्य कुमारस्य मूलजन्मसूचितपित्राद्य-
रिष्टशांतिद्वारा श्रीपरमेश्वरप्रीत्यर्थं सनवग्रहमखां मूलशांतिं करिष्ये
इति संकल्प्य गणेशपूजापुण्याहवाचनमातृपूजानांदीश्राद्धानि कृत्वाचार्यं
ऋत्विजश्च वृणुयात् ।। तत आचार्योऽस्मिन्कर्मण्याचार्यः कर्म करिष्य इति संक-
ल्प्य यदत्र संस्थितमिति सर्षपान्विकीर्य आपो हिष्ठेति भूमिं प्रोक्ष्येशानदेशे पं-
चवर्णैः स्वस्तिकं कृत्वा महीद्यौरिति भूमिं स्पृष्ट्वौषधयः समिति द्रोणप्रमाण- ९३

व्रीहीन्राशीकृत्वा आकलशेष्विति कुंभं निधायेमं मे गंग इति यवान्कांडात्कांडादिति दूर्वा अ-
श्वत्थ इति पंचपल्लवान् स्योनेति मृदः फलिनीरिति फलं सहिरत्नानीति पंचर-
त्नानि आपो हिष्ठेति तत्त्वेन पंचगव्यं हिरण्यरूप इति हिरण्यं प्रक्षिप्य युवा सु-
वासाः इत्यावेष्ट्य पूर्णा दर्वीति पूर्णपात्रं निदध्यात् ।। ततः पूर्णपात्रोपरिस्थवस्त्रे सौ-
वर्णरुद्रप्रतिमां त्र्यंबकमिति मंत्रेण संपूजयेत् ।। अस्य वसिष्ठो रुद्रोऽनुष्टुप् । त-
त एकस्मिन्कुंभान्तरस्य पूर्णरुद्रैकादशिनीं जपेत् ।। यदि जुषो यजमानः ।। बहु-
चश्चेच्चत्वारि रुद्रसूक्तानि छंदोगश्चेद्रुद्रसामानि सूक्तं साम्नोरेकादश ऋत्विग्भिः कु-
र्यात्संख्याः स्युः ।। केचित्तु रुद्रास्तेर्वसाधारणो बह्वृचच्छंदोगयोस्तु सूक्तसाम्नो रुद्र-
रूपसहायकल्पेत्याहुः ।। इदमेव शिष्टाः कुर्वंति ।। तत्र रुद्रन्यासमादि श्रीगुरुनिर्मि-

शां॰र॰
९४

तरुद्रपङ्क्तौ द्रष्टस्यं ॥ रुद्रसूक्तानुकद्रुद्रायेति प्रस्कण्वो रुद्रो गायत्री ॥ इमा रुद्रा
य तवसे इत्येकादशर्चस्य कुत्सो रुद्र आद्या नव जगत्यो त्ये नुष्टुभौ ॥ आ ते पितरि
ति पंचदशर्चस्य गृत्समदो रुद्रस्त्रिष्टुप् ॥ इमा रुद्राय स्थिरधन्वन इति च तस्र्णां
वसिष्ठस्तिस्रो जगत्यो त्या त्रिष्टुभः ॥ आ वो राजेति वामदेवो रुद्रस्त्रिष्टुप् ॥ त्वमु
ष्ट हिभो मो त्रिरुद्रस्त्रिष्टुभः ॥ भुवनस्य पितरं इति श्वा रुद्रस्त्रिष्टुप् ॥ त्र्यंबकं वसि
ष्ठो रुद्रोनुष्टुप् रु — षट्सु पादितु द्वा पुरुषपङ्क्ती नष्टमा ततस्त्र्यंबकमिति
मंत्रेरष्टोत्तरसहस्रं पावमानी श्च मध्यमकुंभे जपेत् ॥ ततः प्राक्कुंभे आशुः ९४
शिशानः इति द्वयोदशर्चस्य सूक्तस्य इंद्रो प्रातिरथ ऋषिः इंद्रो देवता त्रिष्टुप् छं
दो त्या नुष्टु दक्षिणकुंभे त्वमग्ने रुद्र इत्यनुवाकस्य हव्यवाट् ऋषिः अग्ना त्मा

रुद्रो देवता जगती छंदः पश्चिमकुंभे रक्षिणो ऽस्य स्य वामदेवो ऽग्निस्त्रिष्टुप् ॥ उत्तरकुं
भे रक्षोहणमिति पंचविंशर्चस्य आंगिरसः पायुरग्निस्त्रिष्टुभः अंत्याश्चतस्रोनुष्टु
भः जपेदि० ॥ अत्रापि पूर्वोक्ता संख्या शक्त्या ग्राह्या पंचकुंभासंभवे चतुःप्रस्थव
र्णं पंचवर्णं कुंभं स्थापयित्वा सवस्त्रे वं कुर्यात् ॥ ततः कुंभस्योत्तरतश्चतुर्विंशद्दलं
पंकजं पंचवर्णैः कृत्वा कर्णिकायां पूर्ववत् ॥ कलशं स्थापयेत् ॥ तत्र व्रीहि नि
यमः ॥ पाः फलिनीरिति रत्नौषधीः प्रक्षिपेत् ॥ ततः कुंभोपरिस्थपूर्णपात्रोप
रि सर्पाख्यां मा ध्येवा प्रतिमां नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु ये अंतरिक्षे
दिवि तेभ्यः सर्पेभ्यो नमः इति मंत्रेण वाहयेत् ॥ ततः सर्पो रक्तास्त्रिनेत्रश्च द्विभु
नः पीतवस्त्रकः ॥ फलकासिधरस्तीक्ष्णे दिव्याभरणभूषितः इति सर्पं ध्यात्वा

ग्रं०र०
९५

लात्तद्दक्षिणतो बृहस्पतेर्ग्रहसमदो बृहस्पतिरति ऋषे इति मंत्रेण प्रतिमां स्थापि
त्वा — प्राग्गादितश्चतुर्विंशतिपंकजदलेषु पूर्वमारभ्य पुनर्वसुपर्यंतं नक्ष
त्राणि नक्षत्रदेवता वा आवाहयेत्॥ यथा भगः ओर्यमा॥ सविता॥ त्वष्टा॥ वायुः॥
इंद्राग्नी मित्रः इंद्रः॥ निर्ऋतिः॥ आपः॥ विश्वेदेवाः॥ विष्णुः वसवः वरुणः॥ अजैक
पत्॥ अहिर्बुध्न्यः॥ पूषा॥ अश्विनौ यमः॥ अग्निः प्रजापतिः॥ सोमः रुद्रः॥ अदिति
रिति॥ ततो लोकपालानावाह्य पदार्थानुसमयेन कांडानुसमयेन वा पूजयेत्॥
ततआचार्योऽग्निं प्रतिष्ठाप्याऽन्वादध्यात्॥ अत्र प्रधानं नवग्रहाणां प्रत्येकं ९५
अमुकसंख्याभिः समिच्चर्वाज्याहुतिभिरधिदेवताः प्रत्यधिदेवम् अमुकसंख्याभिः
समिच्चर्वा — हुतिभिः विनायकादीन् लोकपालांश्च प्रत्येकं अमुकसंख्याभिः

समिच्चर्वाज्याहुतिभिः प्रधानदेवतां सपत्नीं प्रतिद्रव्यमष्टोत्तरशतसंख्याभिः घृतसंमि
श्रपायसस्य — दाज्यं चर्वाहुतिभिः बृहस्पतिपितृंश्च प्रतिद्रव्यमष्टाविंशतिसंख्याभिः
घृतसंमिश्रपायससमिस्त्भगादि चतुर्विंशतिदेवताः प्रत्येकमष्टाविंशतिसंख्याभिर्घृ
तपायसाहुतिभिः रक्षोहणं कृणुष्वेति पंचदशाग्निं प्रत्यृचमष्टसंख्याभिः कृसराहुति
भिः स — — रंडुगां त्र्यंबकं कल्किकृत्स्तुतिं॥ उग्रं वास्तोष्पतिं अग्निं क्षेत्राधिपतिं मि
त्रावरुणौ अग्निं एताः अष्टाष्टसंख्याभिः कृसराहुतिभिः श्रियं हिरण्यवर्णामिति पं
चदशाभिः प्रतिमंत्रमष्टसंख्याभिः समिदाज्यचर्वाहुतिभिः सोमं त्रयोदशसंख्या
भिः पायसाहुतिभिः रुद्रं चतुर्गृहीतेनाज्येन अग्निं वायुं सूर्यं प्रजापतिं चाज्येन अ
ग्निं वायुं सूर्यं प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्यादि पूर्णपात्रनिधानांतं

कृत्वा पायसं कृसरं चरुं च श्रपयित्वाज्यभागांतं कुर्यात्॥ ततो यजमानो दक्षिणा तः
सवादिवत्ता — हिरण्यत्यागं कुर्यात्॥ ततोऽन्वित्विक् सहित आचार्यो होमं कुर्यात्॥ तत्र
था नवग्रहान् अधिदेवताः प्रत्यधिदेवता विनायकाद्याः लोकपालांश्च तत्तन्मंत्रैर् हु
त्वा सर्पेभ्यो नमोऽस्तु सर्पेभ्य इति मंत्रेण वहस्पतये पित्तभ्यश्च तत्तन्मंत्रैर् दूर्वास्वस्य चेतु
श्चत्वंतत्तत्संख्यया हुत्वा भगादिचतुर्विंशतिदेवेभ्यो नाम मंत्रेणाष्टाष्टसंख्यया जुहु
यात्॥ ततः कृणुष्वेति पंचदशर्चस्य गोतमो वामदेवो रक्षोहा त्रिष्टुबाकसरहोमे
मे वि०॥ गायत्र्यास्सवितारं जातवेदसे कश्यपो दुर्गा त्रिष्टुप् कृसरं॥ त्र्यंबकं वसिष्ठो
रुद्रोऽनुष्टुबाकसरं॥ सीरायुंजंतीत्यस्य बुधः सौम्य ऋषिः ऋत्विक् स्तुतिर्देवता गा
यत्री छंदः कृसरं॥ तामग्निवर्णां सोभरिर् दुर्गा त्रिष्टुप् कृसरं वास्तोष्पते वसिष्ठो वा

स्तोष्पतिस् त्रिष्टुबाकसरं॥ अग्निं कण्वो मेधातिथिर् अग्निर् गायत्री कृसरं॥ क्षेत्रस्य वामदेवः
क्षेत्रपालोऽनुष्टुप् कृसरं॥ गणानां जमदग्निर् मित्रावरुणौ गायत्री कृसरं॥ अग्निं दूतं पुरो
ध इत्यस्य आंगिरसो विरूपोऽग्निर् गायत्री कृसरं हिरण्यवर्णामिति पंचदशर्चस्य आ
नंदकर्दमचिक्लीतेंदिरासुतऋषयः श्रीर्देवता आद्यास्तिस्रोऽनुष्टुभः चतुर्थी प्रस्तारप
ङ्क्तिः पंचमीषष्ठ्यौ त्रिष्टुभौ ततोऽष्टावनुष्टुभः अंत्या प्रस्तारःपङ्क्तिर् होमे वि०॥ प्रत्यृचस
मिदाज्यचरून् प्रत्येकशत्त्वाष्टाविंशति अष्टान्यतमसंख्यया जुहुयात्॥ त्वं नः सोम
विश्वत इत्यस्य राहूगणः सोमस् त्रिष्टुप् पायस होमे वि०॥१३॥ त्वं नः सोम विश्वत इति
मंत्रः॥ त्वं नः सोम विसुक्रतुरिति वा॥ अनयो रेको विमदः सोम आस्तारपङ्क्तिः॥ त
तश्चतुर्गृहीतमाज्यं गृहीत्वा पातरुद्रेति कश्यपो रुद्रः स्वराडनुष्टुप्॥ अनेनजु

ग्रां०र०
८७

हुयात्॥ ततः सूत्रेण व्यस्तसमस्ताभ्याहुतिभिराज्यं हुत्वा॥ स्विष्टकृदादिप्रायश्चित्त
होमांतं कुर्यात्॥ ततो दिक्पालेभ्यो नवग्रहेभ्यो विनायकादिभ्यः निर्ऋतिपर्यंताय
जगुप्रोरुन्नामश्लेत्रपालाय बलदीपेमाषभक्तबलीन्दद्यात्॥ तत आचार्यो यजमा
नो वा चतुर्गृहीतेन स्रुवाद्वादशगृहीतेन वास्तुचं पूरयित्वा तत्र फलादिकमवधाय
पूर्णाहुतिं जुहुयात्॥ तत्र मंत्राः॥ समुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य गोतमो
वामदेवो — अग्निस्त्रिष्टुप् पूर्णाः॥ सप्तवानग्निर्जगती पूर्णा॥ ततो पूर्णाहुतिं हु
त्वा प्रणीताविनयनादिकमशेषं समाप्य चतुःकुंभमध्यवर्त्तिनं कुंभं दक्षिणात
:स्पृष्ट्वा त्र्यंबकमिति याजुषाश्च यजमानस्तदा रुद्रैकादशिनीमपि जपेत्॥ ब
ह्वृचश्चेद्रुद्रसूक्तानि॥ सामगश्चेद्रुद्रसामानि॥ अथर्वणश्चेत्त्र्यंबकं मात्रं॥ अथ

वाप्येकादशाद्यष्टत्रिद्व्येकसंख्यया रुद्रजपः शतत्र्यंबकजपश्च सर्वेषां॥ ततः रुद्रंस
वोपचारैः संपूज्य त्र्यंबकमोषुणइत्युपस्थाप्य सर्वकलशोदकं पात्रांतरे गृही
त्वाचार्यो यजमानं सर्वौषधीभिरनुलिप्तांगं धृतनववस्त्रं सपुत्रां च तत्पत्नीमुपवे
श्य वक्ष्यमाणैर्मंत्रैरभिषिंचेत्॥ तेच अग्नीभ्यामितिषण्णांकश्यपोविहाय स्नानाशा
नोनुष्टुप् अग्निरीमिष्टोदेवेति सप्तानां वसिष्ठऋषिआद्यानां त्रयाणामग्निर्देवता
ततश्चतुर्णां विश्वेदेवाः आद्यागायत्री द्वितीयानुष्टुप् ततस्तिस्रोगायत्र्यो गायत्र्य
स्त्रंत्येद्वे अनुष्टुभौ अभि॥ आपो हि ष्ठेति नवर्चस्यांबरीषः सिंधुद्वीप आपो गायत्र्य
स्त्रोंत्येद्वे अनुष्टुभौ पंचमीवर्धमानासप्तमीप्रतिष्ठा अभि॥ आपइद्वेति द्व्यस्य स
प्तर्षयो विश्वेदेवा अनुष्टुप्॥ सहस्राक्षेणेति प्राजापत्याय क्ष्मनाशानो यक्ष्मनाशा

शां०र० ९८

नोवस्म हात्रिष्टुरादेवस्यत्वेत्यापस्तं नुशाखाग तैलिखि भिमंत्रैः यज्ञाग्रत इतिषण्णां
प्रजापतिर्मना रुत्रष्टुप॥ ततः॥ योसौवज्रधरोदेवोमहेंद्रोगजवाहनः॥ सार्प
जातत्रिशांदोषंमातापित्रो र्व्यपोहतु॥ योसौशक्तिधरोदेवोमहेंद्रागजवाह
नः॥ सप्तजिव्हश्चदेवोग्निसार्पदोषंव्यपोहतु॥ योसौदंडधरोदेवो सार्पजात
त्रिशोदोषं मातापित्रो र्व्यपोहतु॥ योसौशस्त्रधरोदेवो हुतभुङ्मेषवाहनः॥ स
प्तजिव्हश्चदेवोग्निसार्पदोषंव्यपोहतु॥ योसौदंडधरोदेवोधर्मोमहिषवाहनः॥
सार्पजातत्रिशोदोषंव्यपोहतुपमोमम॥ योसौखड्गधरोदेवोनिर्ऋतिराक्षसाधि
पः॥ प्रशमयतुसर्पोत्थंदोषंगंडांतसंभवं॥ योसौपाशधरोदेवोवरुण श्चजले
श्वरः॥ नक्रवाहः प्रचेतानोसार्पोत्थाघंव्यपोहतु॥ योसौदेवोजगत्प्राणोमारु ९८

तोमृगवाहनः॥ प्रशामयत्वेतुसार्पोत्थंदोषंबालस्यशांतिदं॥ योसौनिधिपतिर्देवःखड्ग
न — जिवाहनः॥ मातापित्रोः त्रिशो श्चैवसार्पदोषंव्यपोहतु॥ योसौयमपतिर्देवः
पिनाकीवृषवाहनः॥ अश्लेषामूलगंडांतंदोषमाशुव्यपोहतु॥ विघ्नेशः क्षेत्र
पोदुर्गालोकपालानवग्रहाः॥ सर्वदोषप्रशमनं सर्वेकुर्वंतिशांतिशांतिदाः॥ अश्ले
षाऋक्षजातस्यमातापित्रोर्धनस्यच॥ भ्रातृज्ञातिकुलस्थानांदोषंसर्वंव्यपोहतु॥
योसौवागीश्वरोनाम अधिदेवोबृहस्पतिः॥ मातापित्रोस्त्रिशोश्चैवगंडांतंव्यपोह
तु॥ पितरः सर्वभूतानांरक्षंतुपितरंसदा॥ सर्पनक्षत्रजातस्यवित्तंचज्ञातिबांध
वान्॥ सुरास्त्वेत्यादिभिरभिषिंच्यतत्रयोःशांमुंविम्बेदेवाःशाकरी॥ अभितोरुद्र
सर्पकलशोदकेनासनचशातछिद्रंमंतधर्पा॥ अभिषेको यजमानआचार्यायधेनु

शां०र०
५९

ब्राह्मणेवषरुद्रजापिनेकृष्णमनडुहंप्रतिमांचस्वविप्रोयथाशक्तिदक्षिणांदत्वासपा
णामुत्तरपूजनंविधायताम्रपात्रेजलपुष्पादियुक्तमर्घ्यंगृहीत्वासर्पाधीशनमस्तु
भ्यंनागानांचगणाधिपः॥गृहाणार्घ्यंमयादत्तंसर्वारिष्टप्रशांतये॥इत्यर्घ्यंदत्वा
उत्तिष्ठेतिविसर्ज्यसंकल्पपूर्वकमाचार्यहस्तौप्रतिपाद्याग्निंसंपूज्यगच्छगच्छेतिवि
सर्ज्ययथाशक्तिब्राह्मणान्भोजयित्वाशांतिसूक्तजपंकारयित्वासुहृद्युतोभुंजीत
॥इतिश्रीकमलाकरभट्टकृतेअश्लेषाशांतिप्रयोगः॥ अथनक्षत्रविशेषदोष
फलमुक्तं॥नृसिंहप्रसादे॥चित्राद्यार्धेपुष्यमध्येद्विपादेपूर्वाषाढाधिष्ण्येपादेतृती ५९
ये॥जातःपुत्रश्चोत्तरायेवितत्तेमातापित्रोर्भ्रातरंपुष्यनाशंद्विमासश्चोत्तरा
दोषःपुष्येचैवत्रिमासिकः॥पूर्वाषाढाष्टमेमासिचित्राषाण्मासिकंफलं॥नव

मासंतथाश्लेषा॥मूलेचाष्टकवर्षकं॥ज्येष्ठापंचदशेमासिपुत्रदर्शनवर्जिते॥यत्रशांति
र्नोक्तातत्रग्रहमखःकार्यः॥तस्माच्छांतिप्रकुर्वीतग्रहाणांक्रूरचेतसामितिवसिष्ठेन
सर्वत्रोषत्वोक्तेः॥नारदः॥कृष्णागौःकपिलावासःकपिलंकृष्णमेवच॥तच्छांतयेतुविप्रा
यदातव्यास्तल्लक्षणान्तरे॥ततोहोमंप्रकुर्वीततच्छांत्यर्थंयतुयवैस्तिलैः॥नमस्तेरुद्र
मंत्रेणदक्षिणांप्रदापयेत्॥यथावित्तानुसारेणततःशांतिर्भविष्यति॥येनमंत्रे
णहोतव्यंतन्मंत्रंचतथाजपेत्॥यातावत्तेनमंत्रेणजुहुयाच्चैवमंत्रवित्॥श्रीफ
लस्यापिसमिधःशिवायेजुहुयात्ततः॥अष्टोत्तरशतंचैवगायत्र्याजपमुत्तम॥शां
तिकंप्रजपेद्विप्रइदंविष्णु— —र्विचक्रमे॥सहस्रशीर्षामंत्रेणजपेत्पौष्टिकशांत
ये॥आपस्तंबः॥चतुष्पादंपंचपादंवाभवतीत्येतानिसर्वाणिसूर्यदैवत्यात्सप्र

शां०र० तानिप्रायश्चित्तानिभवेत्पुत्रंजातवेदसमितिस्थालीपाकंहुत्वापंचभिराज्याहुति
१०० भिरभिजुहोतिसूर्यायस्वाहासर्वग्रहाधिपतयेस्वाहाकिरणपंकंहुत्वापंचभिराज्या
हुतिभिरपाणेस्वाहारश्मिरायस्वाहासर्वपापप्रणाशनायस्वाहोतिस्त्री हुतिभिर्हुत्वायसा
मगायेत् ॥ इतिश्रीकमलाकरभट्टकृतेप्रसवशांतिः ॥ अथैकनक्षत्रजननशां
तिः ॥ वृद्धगर्गः ॥ एकस्मिन्नेवनक्षत्रेभ्रात्रोर्वापितृपुत्रयोः ॥ प्रसूतिश्चतयोर्मृत्युर्भ
वेदेकस्यनिश्चयात् ॥ भ्रात्रोर्वातुभगिन्योरित्यर्थः ॥ पितृपुत्रयोःपित्रोर्नक्षत्रेपुत्रदुहि
त्रोर्योदिप्रसूतिरित्यर्थः ॥ भ्रात्रोःपुत्रयोरित्यत्रभ्रातृपुत्रौस्वसृदुहितृभ्यामित्येक १००
शेषः ॥ पित्रोरित्यत्रपितामातृभ्यामेकशेषःमध्यमपदलोपीअसमर्थसमास
श्चेंद्वः ॥ ज्योतिर्निबंधेसमासात्तामेयदादेविपितापुत्रौचसोदरौ ॥ भगिन्यौवासवं

धृवातदापूर्वस्यनाशनं ॥ तद्दोषनाशायतदाप्रशस्तांशांतिंचकुर्यादभिषेचनंच
सपूज्यरुद्रप्रतिमांतदग्रेहोमंचकुर्याद्विभवानुरूपं ॥ तत्रशांतिंप्रवक्ष्यामिसर्वा
चार्यमतेनतु ॥ शुभर्क्षेशुभवारेचचंद्रताराबलान्विते ॥ रिक्तांविष्टिंविवर्ज्येतुप्रार
भेद्दिवसेसुधीः ॥ आचार्यंवरयेत्पूर्वंचतुरोवाद्विजोत्तमान् ॥ पुण्याहंवाचयित्वा
तुशांतिकर्मसमाचरेत् ॥ अग्नेरीशानदिग्भागेनक्षत्रप्रतिमांतथा ॥ तत्तद्दैवोक्त
मंत्रेणपूजयेत्कलशोपरि ॥ नक्षत्रदेवतापूज्यात्वधिप्रत्यधिपूर्वकमिति ॥ ज्यो
तिर्निबंधेतु ॥ रक्तवस्त्रेणसंछाद्यवस्त्रयुग्मेनवेष्टयेत् ॥ स्वगृह्योक्तेनमार्गेण
कुर्यादग्निमुखंततः ॥ अनेनैवतुमंत्रेणतुनक्षत्रोक्तंशतं ॥ तत्तद्देवेनेत्यर्थः ॥
प्रत्येकंसमिदाज्यैःप्रायश्चित्तांतमेववा ॥ अभिषेकंततःकुर्यादाचार्यःपितृ

शां०र० १०१

पुत्रपौत्र॥ वस्त्रालंकारगोदानैराचार्यं पूजयेत्पुनः॥ ऋत्विग्भ्यो दक्षिणां दद्यान्माषत्रय
सुवर्णकं॥ देवताप्रतिमादानं धान्यवस्त्रादिभिः सह॥ यानशय्यासनादीनि दद्या
त्तद्दोषशांतये॥ भोजयेद्ब्राह्मणान्सर्वान्वित्तशाठ्यविवर्जितः॥ अथ प्र
योगः॥ ॥मातापितृनक्षत्रोत्पत्तौ गोमुखप्रसवं कृत्वा भ्रातृनक्षत्रे तमकृत्वा
देशकालौ संकीर्त्यास्य शिशोः पित्रादिनक्षत्रोत्पत्तिसूचितसर्वारिष्टशांत्यर्थं एक
नक्षत्रजननशांतिं करिष्ये इति संकल्प्य गणेशपूजा ऋत्विग्वरणांते आचार्यः ऐ १०१
शान्यां कलशं स्थाप्य तत्र रक्तवस्त्रे च जन्मनक्षत्रप्रतिमां तदृक्षमंत्रेण वस्त्रयुग्माद्यै
ः पूजयेत्॥ ततोऽग्निग्रहान्संप्रतिष्ठाप्यात्र प्रधानं अमुकनक्षत्रं तद्देवतां वास
मिश्रैर्वाज्यैः प्रत्येकमष्टशतसंख्याया त्र्यक्षेण स्विष्टकृतमित्यादिबलिदा॥ नां

तं कुर्यात्॥ ज्योतिर्निबंधे तु भक्त्या हरिहरौ स्वर्णरूपमयौ शुभौ रत्नयुक्तौ हरिहरौ संपू
ज्य विधिवत्स्या अस्य विश्वस्य पितरौ विश्वतोमुखौ॥ प्रीयेतां मूर्तिदानेन देवौ हरिहरावु
भावित्याचार्याय समेवासदक्षिणौ दत्वाभिषेकं कुर्यात्॥ दानहोमविधेः पश्चाद्दाना
दत्वभिषेचनमित्युक्तं॥ पूर्णाहुतिं प्रणीताविमोकादि च कृत्वा कलशजलेनाभिषि
च्याचार्याय वस्त्रालंकरणाः ऋत्विग्भ्यश्च माषत्रयमितं सुवर्णं दत्वोत्तरपूजां कृ
त्वा विसृज्याचार्यहस्ते दत्वा यथाशक्ति धान्यवस्त्रशय्यासनान्याचार्यऋत्विग्भ्योन्ये
भ्यो वा दत्वा विप्रान्भोजयेत्॥ ॥इति कमलाकरभट्टकृते एकनक्षत्रशांतिप्र
योगः॥ अथ व्यतीपातवैधृतिप्रसवविधिः॥ शौनकः अथातः संप्रवक्ष्यामि
शौनकः शांतिमुत्तमां॥ वैधृतौ च व्यतीपाते महादोषोऽभिजायते॥ मारजन्मका

शां०र०
१०२

लेतुव्यतीपातश्चवैधृतिः॥संक्रमश्चरवेस्तत्रजातोदारिद्र्यकारकः॥दरिद्राणांम
हादुःखंव्याधिपीडामहद्भयम्॥अस्मिन्पंचसुमाप्रीतिनात्रकार्याविचारणा॥स्त्री-
णांचशोकदुःखंचसर्वनाशकरोभवेत्॥शांतिवापुष्कलाकार्यातत्रदोषोपनुत्त्व-
न॥गोमुखप्रसवंकृत्वाकुर्याच्छांतिंप्रयत्नतः॥जपाभिषेकदानैश्चहोमाद्यैर्विवि-
शेषतः॥नवग्रहमखंकुर्यात्तस्यदोषोपशांतये॥प्रथमंगोमुखाज्जन्मततःशां-
तिंसमाचरेत्॥गृहस्यपूर्वदिग्भागेगोमयेनानुलिप्यच॥अलंकृतेसुदेशेतुव्री-
हिराशिंप्रकल्पयेत्॥पंचद्रोणमितंधान्यंतदर्धंतंडुलेनच॥तदर्धंतुतिलैः १०२
कुर्यादन्योन्योपरिकल्पयेत्॥अभिमंत्रितपराशौतुकष्टपत्रंलिखेद्बुधः पुण्या-
हंवाचयित्वातुआचार्यंवृणुयात्पुरा॥पंचांगभूषणंदद्यात्सदवस्त्रांगुलीयकं

राशौप्रतिष्ठितंकुंभमव्रणंसुमनोहरं॥तीर्थोदकेनसंपूर्यसमिध्यौषधिपल्लवं
सुगंधपंचरत्नंचवस्त्रयुग्मेनवेष्टयेत्॥तस्योपरिन्यसेत्पात्रंसूक्ष्मवस्त्रेणसंयुतं
॥प्रतिमांस्थापयेद्धीमान्स्वाधिप्रत्यधिदेवतां॥चंद्रादित्याकृतापार्श्वेमध्येवैधृ-
तिमर्चयेत्॥वैधृतिदेवतांरुद्रंएवंव्यतीपातमध्येसंक्रमणस्यवा भानोरुत्तरतो-
रुद्रमग्निंदक्षिणतोन्यसेत्॥वैधृतौमध्येरुद्रः॥दक्षिणोत्तरयोःसूर्यचंद्रौसंक्रम-
णात्तयेमध्येसूर्योदक्षोत्तरयोरग्निरुद्राविलयः॥निष्कमात्रेणवार्धेनपादेनापिस्व-
शक्तितः॥प्रतिमांकारयेद्धीमांस्तत्रलक्षणलक्षितां॥तत्तद्दानपरिभाषायांम-
योक्तं॥प्रतिमापूजनार्थायवस्त्रयुग्मंनिवेदयेत्॥अग्निर्देवंभवेत्सूर्यचंद्रःप्रत्य-
धिदेवतं॥तत्तद्धातृतिपूर्वेणतत्तन्मंत्रेणपूजयेत्॥त्र्यंबकेनमंत्रेणप्रधान

शां०र०
१०३

प्रतिमांजपयेत् ॥ उद्रसूर्यइतिमंत्रेणसूर्यपूजांसमाचरेत् ॥ आप्यायस्वेतिमंत्रेणसो
मपूजांसमाचरेत् ॥ उपचारैःषोडशभिर्वापंचोपचारकैः ॥ अर्चितंगंधपुष्पाद्यैः
फलैर्नैवेद्यमर्पयेत् ॥ मृत्युंजयेनमंत्रेणप्रधानप्रतिमांस्पृशन् ॥ अष्टोत्तरसह
स्रंवाअष्टोत्तरशतंतुवा ॥ अष्टाविंशतिवावापिप्रजप्यात्स्वशक्तितः ॥ सर्वेसौ
रंप्रजप्यापसोमाघंसोममंत्रतः ॥ आनोभद्रेतिसूक्तंचभद्राअग्नेभ्यसूक्तकं ॥ जपे
च्चपौरुषंसूक्तंत्र्यंबकमतःपरं ॥ कुंभंस्पृष्ट्वाचयंदीक्षेजपंकुर्यात्तुस्वृत्विजः ॥ कुंभस्य
पश्चिमेदेशेस्थंडिलेग्निप्रकल्पयेत् ॥ स्वगृह्योक्तविधानेनकारयेत्संस्कृतानलं ॥ त्र्ये १०३
यंबकेनमंत्रेणसमिदाज्यचरून्हुवेत् ॥ अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा
अष्टाविंशतिवाकुर्यात्स्वस्यशक्त्यनुसारतः ॥ मृत्युंजयेनमंत्रेणतिलहोमंसमा

चरेत् ॥ ततःस्विष्टकृतंहुत्वाअभिषेकंचकारयेत् ॥ समुद्रज्येष्ठासूक्तेनआपोहिष्ठात्वचे
नच ॥ अक्षिभ्यामितिसूक्तेनयावम्पानीभिरेवच ॥ त्र्यंबकेनतुसूर्यआप्यायस्वेतिमं
त्रतः ॥ सुरास्त्वामितिमंत्रेणअभिषेकंसमाचरेत् ॥ आचार्यंपूजयेत्पश्चाद्वस्त्रहे
मांगुलीयकैः ॥ गोदानंवस्त्रदानंचहेमदानंविशेषतः ॥ तद्धोमशमनार्थायआचा
र्यायप्रदापयेत् ॥ प्रच्छादनपदंदद्यात्ततःशांतिर्भविष्यति ॥ जापकेभ्योब्राह्मणेभ्यो
दक्षिणाभिश्चतोषयेत् ॥ दीनांधकृपणेभ्यश्चप्रदद्याद्भूरिदक्षिणां ॥ ब्राह्मणान्
शतसंख्याकान्मिष्टान्नैर्भोजयेत्ततः ॥ बंधुभिःसहभुंजीतयथाविभवसारतः ॥ ए
वंयःकुरुतेमर्त्योनैवदुःखसमाप्नुयात् ॥ आयुरारोग्यमैश्वर्यमातापित्रोःशि
शोरपि ॥ सर्वदुःखनिवृत्तिश्चपुत्रपौत्रप्रवर्धनं ॥ सर्वान्कामानवाप्नोतिसुरदिर

शां०र०
१०४

त्वाचिरं वसेत्॥ ॥इति शौनकीये व्यतीपातादिशांतिः॥ अथ प्रयोगः॥ गोमुखप्रस्त
र्वकृत्वा देशकालौ संकीर्त्यास्य शिशोर्वैधृतिजननसूचितसर्वारिष्टशांतिद्वारा श्री
परमेश्वरप्रीत्यर्थं वैधृतिजननशांतिं करिष्ये॥ एवं व्यतीपातसंक्रमयोः॥ एकदिने
तस्त्वे तु तंत्रेणैव शांतिः॥ संक्रांतौ वैधृतेः स्थले शांतिद्वयं पृथक् कार्यं ततो गणेश
पूजनपुण्याहवाचननांदीश्राद्धादि स्वस्तिवरणानि कुर्यात्॥ तत आचार्यो यद
त्रेति सर्षपान्विकीर्य भूमिं प्रोक्ष्य पूर्वसां महि द्यौरिति भूमिं स्पृष्ट्वा ओषधयः
समिति पंचद्रोणमितं व्रीहिराशिं तदुपरि सार्धद्रोणद्वयपरिमितं तंदुलराशिं
तदुपरि सपाद द्रोणमितं तिलराशिं कृत्वोपरि समं कृत्वा तत्र पंचवर्णैरष्टदलं कृ
त्वा तत्राकलशो क्षितिकुंभं प्रतिष्ठाप्य इमं मे गंगे इति तीर्थजलेनापूर्य तत्र सृ

न्मृत्तिका सर्वौषधी पंचपल्लव पंचगव्याष्टगंधपंचरत्नानि प्रक्षिप्य वस्त्रयुग्मेन सं
वेष्ट्य पूर्णपात्रोपरि वस्त्रे वैधृतिशांतौ व्याहृतिपूर्वं त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप् इति म
ध्ये रुद्रं तद्दक्षिणतः अस्सूर्य इति सूर्यमुत्तरत आप्यायस्वेति सोमं आवाहयेत्॥ व्यती
पातसंक्रमशांतौ अस्सूर्य इति मध्ये सूर्यं दक्षिणतोग्निं दूतमित्यग्निमुत्तरतस्त्र्यंब
कमिति रुद्रं आवाहयेत्॥ ततः षोडशोपचारैः संपूज्य रुद्रप्रतिमास्थाने जपे
त्॥ ततः सूर्यप्रतिमास्थाने सर्वसौरान् जपेत्॥ तद्यथा॥ उदुत्यमिति त्रयोदशर्च
स्य सूक्तस्य कण्वपुत्रः प्रस्कण्वो नवाद्या गायत्र्योंत्यास्तस्रोनुष्टुभः॥ चित्रं देवा
नामिति षष्ठ्यांगिरसः कुत्सस्त्रिष्टुप्॥ इंद्रं मित्रमिति द्वयोरौचथ्यो दीर्घतमास्त्रिष्टु
प्॥ हंसः शुचिषदित्यस्य गोतमपुत्रो वामदेवो जगती॥ प्रजासूर्येत्यत्रिरनुष्टुब्वो

DR. BHAU DAJI MEMORIAL

शां०र० १०५

यस्यध्यसूर्यपत्न्येकस्याउत्सूर्यसूर्यशतित्तिसृणां अवेतिसार्द्धचतसृणां॥ उदुत्यदर्शि
मितितिसृणां मैत्रावरुणिर्वसिष्ठस्त्रिशश्चंत्यवहती छर्दीश्छर्दशतिसतोवहती
॥ तच्चक्षुःपुरउष्णिका वेष्मइंअसीति द्वयोःजमदग्निःपूर्वावृहती उत्तरासतोवृ
हती॥ नमोमित्रस्य सूर्योनोदिवशतिपंचर्चस्यसर्पपुत्रश्चक्षुर्गायत्री॥ विभ्राडृह
दितिचतसृणां सूर्यपुत्रोविभ्राड्जगती विभ्राजे मित्यास्तारपंक्तिः आयंगौरि
तित्तृचस्यसार्पराज्ञीगायत्री॥ सर्वेषां सूर्योदेवता॥ ततः सोमप्रतिमांस्पृष्ट्वा
प्यायस्वेतिजपेत् मतीपातसंक्रमणग्रहणांते रपूर्वसौरजपस्ततोमृत्युंजयजपः॥ १०५
ततश्चतुर्दिक्षुऋत्विजः कुंभंस्पृष्ट्वा आनोभद्रेतिसूक्तं भद्राअग्नेरितिसूक्तं पुरु
षसूक्तं त्र्यंबकमंत्रं चजपेयुः॥ ततअश्वमोग्नियहांश्चप्रतिष्ठाप्यन्वादध्यात्

अत्रप्रधानं तदंगुष्ठमहस्राष्टशतान्यतरसंख्ययाश्म्मिराज्यचरुद्रव्येणव्यति
पातसंक्रमयोस्तुसूर्यरुद्रसंख्ययाग्निरुद्रोअतिस्यमृत्युर्नसंशयः॥ व्याधिपीडा
चदारिद्र्यंशोकश्चकलहोभवेत्॥ शांतितेषांप्रवक्ष्यामिनराणां हितकाम्यया॥
यस्मिन्नृक्षे विशेषेणग्रहणं यदिजायते॥ तदृक्षाधिपतेरूपं सुवर्णेनप्रकल्पये
त्॥ सूर्यग्रहेसूर्यरूपं हिरण्येन स्वशक्तितः॥ चंद्रचंद्रग्रहेधीमान् रजतेनविशे
षतः॥ राहुरूपंप्रकुर्वीत॥ नागेनैवविचक्षणः॥ नागः सीसं॥ सुचौदेशेप्रयत्नेन
गोमयेनप्रलेपयेत्॥ तस्योपरिलिखेद्धीमान्नववस्त्रंसुशोभनं॥ त्र्यपाणांचैव
देवानांस्थापनं तत्रकारयेत्॥ श्वेतवस्त्रं श्वेतमाल्यं श्वेतगंधानुलेपनं॥ चंद्रे
ग्रहेप्रदातव्यं अष्टाविंशतिदेवतासंख्यया॥ मृत्युंजयत्र्यंबकमंत्रेणशोधयेत्स्वि

शां०र०
१०६

ष्टकृतमित्यादि ततश्चक्रहोमं कृत्वा सर्वशांतिषु तिलैर्मृत्युंजयहोमं कृत्वा बलि
दानांते पूर्णाहुतिं कृत्वा समुद्रज्येष्ठा इति सूक्तेन आपो हि ष्ठेति तृचेन अक्षीभ्यां
मिति सूक्तेन पावमानीभिः रुद्रसूर्याग्निमंत्रैः सुरास्त्वेत्यादिपौराणैश्च अभिषिंचे
युः ॥ ततो यजमानो रूप्यं रूपमिति मात्रं सदक्षिणं ब्राह्मणाय दत्वाचार्याय वस्त्रयु
ग्मं गां हेमांगुलीयकादि सुवर्णं प्रच्छादनपटं च दत्वा ऋत्विजदक्षिणां दत्वा उत्तरपू
जां कृत्वा विसृज्याचार्यहस्ते प्रतिदद्यादग्निं विसृज्य पश्चात् ब्राह्मणान् ऋत्विजश्च भो
जयेदिति ॥ ॥ इति श्रीकमलाकरभट्टकृतौ व्यतीपातादिशांतिप्रयोगः ॥ १०६
अथ ग्रहणशांतिः ॥ शौनकः ॥ ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि जायते ॥ व्याधि
पीडां तदा स्त्रीणामादौ तु स्तु तु दर्शनात् ॥ इत्थं संजायते यस्य तस्य मृत्युर्न संश

यः ॥ व्याधिपीडां च दारिद्र्यं शोकश्च कलहो भवेत् ॥ शांतिं तेषां प्रवक्ष्यामि नराणां
हितकाम्यया ॥ यस्मिन्नृक्षे विशेषेण ग्रहणं यदि जायते ॥ तदृक्षाधिपतिं रूपं सुवर्णेन
प्रकल्पयेत् ॥ सूर्यग्रहे सूर्यरूपं हिरण्येन स्वशक्तितः ॥ चंद्रं चंद्रग्रहे धीमान् रज
तेन विशेषतः ॥ राहुरूपं प्रकुर्वीत नागेनैव विचक्षणः ॥ नागः सीसं ॥ शुचौ देशे प्रय
त्नेन गोमयेनोपलेपयेत् ॥ तस्योपरि न्यसेद्धीमान् नवं वस्त्रं सुशोभनं ॥ त्रया
णां चैव देवानां स्थापनं तत्र कारयेत् ॥ श्वेतवस्त्रं श्वेतमाल्यं श्वेतगंधानुलेपनं ॥ चं
द्रस्य हेमवृक्तस्य चंद्रप्रीतिकरं च यत् ॥ राहवे चैव दातव्यं कृष्णपुष्पांबरादि च
॥ दद्यात्सहस्रना — यश्वेतगंधानुलेपनं ॥ सूर्यं संपूजयेद्धीमान् आकृष्णेनेति
मंत्रतः ॥ चंद्रस्य हं तया सम्यग् आप्यायस्वेति मंत्रतः ॥ स्वर्भानोरिति मंत्रेण राहुं

यत्नेनपूजयेत्॥एवंसंपूजयेद्धीमान्सिद्धिस्त्वर्कसंभवैः॥चंद्रग्रहेचपालाशान्स
मिद्भिर्जुहुयान्नरः॥दूर्वाभिर्जुहुयाद्धीमान्राहोःसंप्रीणनायच॥समिद्भिर्ब्रह्मवृ
क्षस्यभौमायजुहुयाद्बुधः॥आज्येनचरुणाचैववृत्तिलैश्चजुहुयात्ततः इदंसर्वेभ्यः
पंचगव्यैःपंचरत्नैःपंचवल्कपंचपल्लवैः॥जलैरौषधिकल्कैश्चसहितैःकलशो
दकैः॥अभिषेकंप्रकुर्वंतियजमानस्ययत्नतः॥मंत्रैर्वारुणसंभूतैरापोहिष्ठादि
भिस्त्रिभिः॥इमंमेगंगेपूरतस्तत्वायामीतिमंत्रकैः॥अभिषेकेनिवृत्तेतुयजमान
ःसमाहितः॥आचार्यंपूजयेत्सम्यक्सुशांतोविजितेंद्रियः॥तस्मैदद्यात्प्रयत्नेन
नभक्त्याप्रतिकृतित्रयं॥गांचैवदक्षिणांदद्याद्यजमानःसमाहितः॥अनेनवि
धिनाशांतिंकृत्वासम्यग्विशेषतः॥अकालमृत्युशोकंचव्याधिपीडांतथाध्रुवा

त्॥सौख्यंसौमनस्यंनित्यंसौभाग्यंलभतेनरः॥इत्थंग्रहणजातानांसर्वारिष्टविना
शनं॥कथितंभार्गवेणेदंशौनकायमहात्मने॥ इतिग्रहणशांतिः॥ अथ
यमलशांतिः॥भारतवडवागोस्त्रियागोवडवायास्ययमलंचैवजायते॥योनी
यास्यमृतोभीतिंमारुतींशांतिमाचरेत्॥मयूरचित्रेघोटिकाहस्तिनीचैवमहिषी
यमलौयदि प्रसूयंतेतदानाशःसस्राजस्यमहान्भवेत्॥कारयेत्तत्रहोमं
चबहुदानंचकारयेत्॥भोजनंब्राह्मणानांचदद्याद्गांचैवदक्षिणां॥महिषीय
मलोत्पत्तौवन्यानांचैवजन्मनि॥दद्याच्चैवतुतामेवंशांतिंयत्नात्प्रयोजयेत्॥
कात्यायनः॥अथातोयमलजननेप्रायश्चित्तिर्यस्यभार्यागौर्दासी॥महिषीव
डवावाविकृतिंप्रसवेपूर्णेदशाहेचतुर्णांक्षीरवृक्षाणांकषायमुपसंहरे—क्ष

शां०र०
१०८

वटोदुंबराश्चामीदेवदारुगौरसर्षपास्तेषामभ्यमयो हिरण्यपांडुवांकुरैः सपत्रबेर
ष्टोकलशान्स्पृश्य सर्वौषधीनां दंपती स्नापयित्वा आपोहिष्ठेति तिसृभिः क
यानश्चित्रइति द्वाभ्यां पंचवेत्रेण पंचवारुणेन तेदृमापः प्रवहंतेत्याद्यमिति स्ना
पयित्वा तौ दर्भेषूपवेशयेत् ततः अग्नि मारुतं स्थालीपाकं श्रपयित्वाज्यभागांते विष्णुस्त्वाहुती
र्जुहोतिः पूर्वोक्तैः स्नपनमंत्रैः स्थालीपाकस्य जुहोत्यग्नये स्वाहा सोमाय स्वाहा
पवमानाय स्वाहा पावकाय स्वाहा मरुताय स्वाहा मारुताय स्वाहा मारुद्भ्यः
स्वाहा यमाय स्वाहा अंतकाय स्वाहा मृत्यवे स्वाहा ब्रह्मणे स्वाहाग्नये स्विष्टक १०८
ते स्वाहेत्येतद्देवगृहोत्पातेषु लूकगृध्रकपोतश्येनो वा प्रविशेत् स्तंभो वा प्र
रोहेद्वल्मीकं मधुजालं वा स्वेदकुंभप्रज्वलने आसनयानभंगे गृहगो

तं द्विजपेद्धोमः कार्यो र्कसमिधैः शुभैः ॥ औदुंबरैरन्नकामस्तेजस्कामस्तु खा

दिरैः ॥ अपामार्गसमिद्धोमः कार्यो र्कसमिधैः शुभैः ॥ औदुंबरैरन्नकाम

स्तेजस्कामस्तु हुतबाधाविनिवृत्तिः ॥ ग्रहबाधाविनाशाय जपेदश्वत्थसन्नि

धौ ॥ लवणामिनदध्यन्ना तीक्ष्णायाश्वत्थसंभवाः ॥ जुहुयात्समिधः सूर्यास्या

शांतं मंत्रमुच्चरेत् ॥ दशपंचाहुतीर्दत्त्वा गच्छ गच्छेत्युदीरयेत् ॥ यावद्धोमं ब

लिं दद्यात् पुरुषाहारसंमितं ॥ एवं कृते विमुंचंति तं मां स्त्री वा महाग्रहाः ॥

पजे तुल्यत्वरूपं तेत्स्या नामुखो जपेत् ॥ जुहुयाच्छतपत्राणि सहस्राक्षय

शां.र. माप्नुयात्॥ लाजाहोमेनकन्यार्थीप्राप्नोतिसुखरूपिणीः लाजाश्चपुसंयुक्ता
:श्वेतपुष्पाणिवापुनः॥ हूयंतेहरितेदेशेनस्यविश्वेवशीभवेत्ः॥ वामीगस्तु
२८९ त्रंतंकृत्वास्त्रीवृक्षितेविचक्षणः॥ हस्तस्थामात्यकांस्पर्थतिलैश्चाज्येनसंयुतैः
होमस्थानेतुसंप्राप्यकुंभमेकंजलान्वितं॥ मंत्रयित्वाष्टसाहस्रंचूलशाखां
तुनिक्षिपेत्॥ अभिषेकश्चतैस्तोयैःकार्योवाप्योक्तैःप्रदक्षिणं॥ग्राहग्रामादि
शांतिश्चसर्वैः कार्यातुपूर्ववत्॥ वास्तुपूजाचकर्त्तव्याएकाशीतिपदे
:शुभे॥ ईशानायबलिकार्योभूतानांचतर्पयेत्तथा॥ एवंकृतेपशूनांसप्रजा राम
नांशांतिमाप्नुयात्॥अद्भुतेषुचसर्वेषुनिशायांग्रामबाह्यतः॥उपविश्य २८९
जपेत्रुद्रंत्वरितंबहुभिःसह॥ होमपालाशसमिधैःकर्त्तव्योघृतसंयुतैः

२९०

ईशानायबलिःकार्योयस्यांदिशितदद्भुतं॥तद्दिशपतयेचैवपशूनांपतयेत
था॥ वृद्धिकामोजपेल्लक्षंतिलैर्होमोघृताविलैः॥ बलिःपूजाप्रकर्त्तव्याशि
वस्यवरुणस्यच॥सर्वकामेषुचैवार्थेत्वरितस्यजपोभवेत्॥अयुतद्वयम
ध्येतुयावल्लक्षंततोधिके॥ एवंकृतेतुसिद्धिःस्यात्सिद्धकामःप्राप्नुयाच्छिवं॥
एहिकामुष्मिकान्भोगान्भुक्त्वासायुज्यमाप्नुयात्॥ ॥इतिहेमाद्र्युक्तशां
तिकांडेगंगास्तुतप्रोक्तत्वरितरुद्रसमाप्तः॥ ॥अथातःस्वप्नाध्यायः॥ ॥
तत्रदेवतादीन्देवेचसंयुतोयां॥ब्राह्मीशापूर्वपश्चात्तुस्त्काहाद्भुतसागरेपरा
शरः॥अस्मच्चमंत्रेस्तुपुरोहितस्तु॥संघस्यतस्यानुविसंपतायां॥ब्राह्मीश
पूर्वापरभागमुच्चकृत्वोपधानंशिरसिक्षितीशः तथैकतुदक्षिणपार्श्वशा

शां. र. यां स्वप्नं परीक्षेत यथोपदेशं॥ नमः शंभो त्रिनेत्राय रुद्राय वरदाय च॥ वामना
य विरूपाय स्वप्नाधिपतये नमः॥ भगवन्देवदेवेश शूलभृद्वृषवाहनः॥ इष्टानि
२९० ष्टे मम आचक्ष्व स्वप्ने सुप्तस्य शाश्वत॥ एकवस्त्रे कुशास्तीर्णे सुप्तः प्रयतमानस
निशांते पश्यते स्वप्नं शुभं वा यदि वाशुभं॥ शुभस्य भानाह्वृहद्यात्रायां वराहः
शैलप्रासादनागाश्ववृषभारोहणं हितं॥ चंद्रतारार्कग्रसनं परिमार्गणामे
क्व॥ भूम्येबुधीनां ग्रसनं शत्रूणां च वधक्रिया॥ जयो विवादधूतेषु संग्रामे
च तथा जय॥ भक्षणं चैव मांसानां मत्स्यानां पायसस्य था॥ दर्शनं रुधिरस्यापि
स्नानं वा रुधिरेण च॥ सुरारुधिरमद्यानां क्षीरस्यापि नं॥ रस्य पायसः अंत्रेण राम
वेष्टितं भूमौ निर्मलं गगनं तथा॥ सुखेन दोहनं शस्तं महिषीणां तथा गवां॥ सिं २९०

३०

हीनां हस्तिनानां च वडवानां तथैव च॥ प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा शुभः
॥ अंभसां वनिषेकश्च तेयं राज्यप्रदं हितं॥ राज्ये निषेकश्च तथा चंदनं शिर
सो पि च॥ मरणं वह्निदाहं च वह्निदाहो गृहादिषु॥ तथोदकानां तरणं तथा वै
षमतं लुनं॥ हस्तिनीवडवानां च गवां च प्रसवो गृहे॥ आरोहणं गजेंद्राणां
रोहणं च तथा शुभं॥ परस्त्रीणां तथा लाभस्तथा लिंगनमेव च॥ निगडैर्बंध
नं धन्यं तथा विष्ठानुलेपनं॥ बीजानां भूमिपालानां सुहृदामपि दर्शनं॥ शु
भान्येतानि प्रोक्तानि रउद्भवान्यकराणि च॥ अद्भुतसागरे पराशरः॥ ब्रह्मो वा
निशाधे प्रसेदहनं ताराशिनो बाऊ नाछत्र चाधिरदादिरोहणविधिर्दिव्यो
पि च ब्राह्मणः॥ दिनकरशशितारानक्षणस्पर्शनादिविचारणमपिमूर्धस

शां.र. प्रपंचत्रिधावा ॥ वृषभगृहनरेंद्रश्वेतसिंहाधिरोहा ग्रसनमुदधिनृम्योर्न्नृमिराज्ञा
प्रदानि: ॥ विपुलरणविमर्दधूतवादेर्न पश्वपशुमृगमनुजानांलंघिंबृध्यासनं
२७१ वाद्विजानपरिलेपोगम्यनारीगमेस्वमरणाशिखिरलाभ: सस्यसंदर्शनंच ॥ सि
तसुरभिमनोज्ञालेपमाल्यांबराणांद्विजसुरगुरुराज्ञां दर्शनान्याशिषश्च ॥
मणिरजतसुवर्णभाजपात्रेषुभुक्तं घृतदधिपरमान्नं सर्वमेतच्छुभंच ॥ वरा
ह ॥ वृश्चिकादिदंशानमणिरत्नकांचनत्राकजप्रदीपकिशोरा: ॥ वस्त्रंहंस
त्रात्राद्ययोग्नेकलाभ: ॥ पुत्रलाभायः विद्याधर्मे ॥ एकस्यांयदि वारात्रौशुभं राम
वायदिवाशुभं ॥ पश्चादृष्टस्वप्नस्तत्रतस्यपाकं विनिर्दिशेत् ॥ ॥अथदुःस्व
प्ना: ॥ अद्भुतसागरे देवल: ॥ रक्तगंधांबरस्त्रग्वी गच्छेद्दक्षिणामुख: ॥ २७१

३१

खरोष्ट्रमहिषारोहे त्रिमासान्नाभिजीवति ॥ श्वैनत्रेयो निपतेस्वप्ने दारंतस्यपिधा
यते: ॥ नचौन्निष्पतियस्तस्मान्न दंतंतस्यजीवति: ॥ मार्कंडेय: वासांमूत्रंपुरीषंतु
सुवर्णरजतंतथा ॥ प्रत्यक्षमथवास्वप्ने जीवे तद्दशमासिकं ॥ केशांगारंतथाभस्म
वरगांनिर्जलांनदीं ॥ दृष्ट्वास्वप्नेदशाहात्तुरे मृत्युरेकादशेदिने ॥ करालैर्विकटै: कृ
ष्णै: पुरुषैरुघतायुधै: ॥ पाषाणैस्ताडितेस्वप्ने सद्योमृत्युभवेन्नर: ॥ रक्तकृष्णां
बरधरागायंतिवहसंतिच ॥ दक्षिणाशांनयेन्नारीस्वप्ने सोपिनजीवति ॥ वराह:
॥ हरिणारेहित्नमणंमृत्युर्नचिरेणखरकरारोहे: ॥ उष्ट्रखरोष्ट्राधिवृद्धि: स्याल्लंजन हे
रारोहे: ॥ मांसेविष्णुधर्मेच ॥ मलिनांबरधारित्वमभ्यंगपंकदिग्धता: ॥ गेवा
त्पतनंचैवदोलारोहणमेवच ॥ रक्तध्वजस्यपतनंपतनंशशिसूर्ययो: ॥ देव

शां.र. द्विजातिनृपानां प्रजानां क्रोधएव च ॥ आलिंगनं कुमारीणां विधवानां च मैथुनं
॥ हानिश्चैव स्वगात्राणां घारकं तेमनः प्रियाः ॥ दक्षिणाशाभिगमनं व्याधिनाभि
२७२ भवस्तथा ॥ फलापहारश्च तथा शाड्वलानां विशोधनं ॥ गृहणं चैव वन्हेंगश्च
गृहसंमार्जनं तथा ॥ क्रीडापिशाचक्रव्यादवानरान्त्यैरपि ॥ कषायवस्त्रधार
णं तद्वत्क्रीडनकं तथा ॥ तैलपानावगाहौ च रक्तमाल्यानुलेपनं ॥ एवमादी
नि चान्यानि दुःस्वप्नानि विदर्शित् ॥ पराशरः कायस्यालेपनं वा कर्दमजल
मज्जा गोमयस्नेहपंके दंशिकादंतबाऊत्र पतनमथवा नर्थशोकप्रदानिः राम
लैंगे ॥ मुक्तकेशो हसंश्चैव गायते नृत्यते नरः ॥ याम्यां दिशामितो गच्छेद्देतंत
स्यनजीवति ॥ अन्येषु योगाः भीष्मद्रोणकर्णपर्वसुद्धकाण्डादौ भारतरामायणा २७२

३२

दौ ज्ञेयाः मास्यं विष्णुधर्मे च ॥ स्वप्नस्तु प्रथमे यामे संवत्सरे फलो भवेत् ॥ षड्भिर्मास
द्वितीयामेन त्रिभिर्मासैस्त्रियामकः ॥ चतुर्थे मासत्रेण फलं भवति नान्यथा ॥ प
राशरः पादद्विपादैर्नरपाद वृद्ध्या वर्षार्धमासत्रयमासकालाः ॥ निशाविभा
गेषु चतुर्षु दृष्टाः स्वप्ना अनिष्टेष्टफलप्रदास्युः वराहः ॥ आद्ये च वर्षैस्त्रिराधि द्वि
तीये पाकोवर्षार्धभागे तृतीये मासोत्पाकः ॥ शार्वरी पश्चिमांते ॥ अत्र च तुर्य
चरणं विचार्यं नवेत्सः एतरेयोपनिषदि ॥ अथ स्वप्नाः पुरुषं कृष्णं कृष्णदंतं प
श्यति स एवं हंति वराहएनं हंति मर्कट एनमास्कंदयत्याशु वायुरेनं प्रवहति सु
वर्णं खादित्वापगिरति मध्वश्नाति बिसानि भक्षयत्येकपुंडरीकं धारयति ध्वरैर्वरा
है युक्तैर्याति कृष्णां धेनुं कृष्णवत्सां नलदमाली दक्षिणामुखो व्रजति स यदेते

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्यस्य स्मारक

शां॰ र॰ षांकिंचित्स्वरूपेतेषांतुपोष्यपायसंस्थालीपाकंश्रपयित्वागायत्रीसूक्तेनप्रत्येकंहुत्वा
न्येनान्नेनब्राह्मणान्भोजयित्वाचरुंस्वयंप्रश्नीयादिति॥अत्रनक्षहोमःकार्यःदुः
२९३ :स्वप्नाद्भुतदर्शनेइतिपूर्वमुक्तेः तथाचडीपाठेपिशांतिकर्मणिसर्वत्रतथादुः:
स्वप्नदर्शने॥ग्रहपीडासुचोग्रासुमाहात्म्यंशृणुयान्मम॥दुःस्वप्नंचनृभिर्दृष्टंसु
स्वप्नमुपजायतेइत्यादिमार्कंडेयपुराणात्पराशरः॥देवद्विजाभिप्रतिपूजिता
न्निमंत्रोपवासादिपवित्रसेवति॥तिलान्नगोभूमिहिरण्यदानंदुःस्वप्नसंदर्श
ननाशनानि॥नद्यंबुसंस्पर्शनिमंत्रहोमतिलप्रदानंजपनंचदानंदुःस्वप्न राम
संदर्शननाशनानि॥नद्यंबुसंस्पर्शनमंत्रहोमतिलप्रदानंजपनंचदानंज
पनंचदानंदुःस्वप्नहंत्—णियपश्चगांगं॥तिलानामयुतंतत्रजुहुयात्समाहि २९३

३३

तः॥तिलोसीतिचमंत्रेणब्राह्मणांधनुंदद्याच्चदक्षिणां॥ब्राह्मणांस्तर्पयेत्तत्रद
क्षिणाभोजनादिभिः॥दानंचविविधंदेयमशुभानांविनाशनं॥षड्भिर्मासैस्तुसं
पूर्णैरस्यामरणंभवेत्॥मासेश्रुतिश्चवासुदेवस्यतथातस्यचपूजनं॥ग
जेंद्रमोक्षश्रवणंतेयंदुःस्वप्ननाशनइत्युक्ते॥प्रयोगपारिजातेशौनकः॥
स्वप्नोत्पातेषुचैतेषुकालराधिदेवता॥पूजाविधानंपूर्वोक्तंकुर्यादशपि
यत्नतः॥होमंकुर्यात्प्रयत्नेनरात्रैवेचद्विजोत्तमः॥प्रत्यचंपायसंहुत्वारात्री
श्वरब्रदितिक्रमात्॥अष्टोत्तरशतंहुत्वासूक्तेनानेनयत्नतः॥स्वप्नाधिप
तिमंत्रेणहुनेदष्टोत्तरंशतं॥कालरात्रिनाथोस्यर्थः॥गुरवेदक्षिणांदद्यात्स्व
हेमपशुनानपि॥यद्युक्तदक्षिणादानेप्यशक्तोहोमकर्मणि॥हिरण्यंदक्षि

शां.र. णां दद्यात्तदानीमेव वा बुधः॥ वस्त्रकुंभादिसकलं तद्योत्रे प्रतिपादयेत्॥ स ए
व॥ यद्यनिष्टफलं स्वप्नं पश्येत्तस्योपशांतये विधिः॥ अद्या नो देव सवितरित्स्वा
२७४ पूर्वमके या॥ ततः परं पठेद्गोघ्नदुःस्वप्नपंचभिः॥ ऋग्भिः परैस्ततो यो मे रा
जन्युज्यश्शक्तिश्चा॥ ऋग्भिः सर्वाभिरेताभिरुपतिष्ठेत भास्करं॥ एवं कृते दु
ःस्वप्नदर्शनैः फलं न भवेत्॥ अथ स्वप्नस्य तिजपत्रात् प्रातर्दिने दिनोदुः
स्वप्नं तु दत्ते कृच्छ्रेणानंतस्मान्निंदते नयं॥ अत्र श्राद्धमपि कार्यं॥ श्राद्धार्हद्रव्य
संपत्तौ तथा दुःस्वप्नदर्शने॥ जन्मर्क्षे ग्रहपीडासु श्राद्धं कुर्वीत वेछ्येति पृथ्वी राम
चंद्रोदये मार्कंडेयपुराणात्॥ एतदस्मान्निर्णयसिंधावुक्तं॥ ॥इति क
मलाकरभट्टकृते शांतिरत्नाकरे दुःस्वप्नशांतिः॥ ॥अथ वास्तुशांतिः॥॥ २७४

२७

तत्कालोऽस्मान्निर्णयसिंधावुक्तः॥ कश्चित्तूच्यते॥ नारदः सौम्यफाल्गुन
वैशाखमाघश्रावणकार्तिकाः॥ मासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्र
दाः॥ बादरायणः॥ वैशाखे फाल्गुने पौषे श्रावणे मार्गशीर्षके॥ सत्रारंभः
शिलाभ्यासस्तंभारंभः प्रशस्यते॥ देवतत्वक्षभः शोको धान्यं पंचतानि पशु
त्वं स्वाप्तिनैरव्यं संगरं मृत्युनाशं॥ स्वं श्रीप्राप्तिं वह्निभीतिं च लक्ष्मीं कुर्युश्चैत्राद्या
गृहारंभकाले॥ मासेतु॥ आषाढे भृत्यरत्नानि पशुवर्गमवाप्नुयात्॥ मा
र्गशीर्षे तथा धान्यं॥ पौषे तस्करतो भयमित्याबाद: शुनः॥ पौषश्चाशु
भः उक्तः॥ रत्नमालायां॥ कर्कनक्रहरिकुंभगते र्के पूर्वपश्चिममुखानि
गृहाणि॥ तौलिमेषवृषवृश्चिकयाते दक्षिणोत्तरमुखानि वदंति॥ गर्गः स्युत्तर

शां.र. मृगरोहिण्यांपुष्ये मैत्रेकरत्रये॥ धनिष्ठाद्वितये पौष्णे गृहारंभः प्रशस्यते॥
मासे आदित्यभौमवर्जं तु सर्वे वाराः शुभावहाः॥ चंद्रादित्यबलं लब्ध्वा लग्ने शु
२९५ भनिरीक्षिते॥ स्तंभोच्छ्रायादि कर्तव्यं मन्यत्र परिवर्जयेत्॥ प्रासादेष्वेवमेवस्या
त्कूपवापीषु चैव हि॥ नूपरीक्षोक्तान्त्रैव॥ अरत्निमात्रे गर्ते वैस्वनुलि
प्ते तु सर्वतः॥ घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयं॥ ज्वालयेन्नूपरीक्षार्थं पू
र्णे तत्सर्वदिक्षु खं॥ दीप्तौ पूर्वादि दिग्दीप्त्या मनुपूर्वशः॥ अरत्निमा
त्रं गर्त्तं तु कृत्वा तत्खात पूरणे॥ अधिके श्रियमाप्नोति न्यूने हानिः समे समं
॥ फालकृष्टेथवा देशे सर्वबीजानि वापयेत्॥ त्रिपंचसप्तरात्रेणयत्ररो राम
हंति तान्यपि॥ ज्येष्ठोत्तमा कनिष्ठा भूर्वर्जनीयेतरा मता॥ वराहः दक्षि २९५

णपूर्वके कृत्वा पूजां शिलां न्यसेत्प्रथमं॥ शेषाः प्रदक्षिणेन स्तंभाश्चैवं समुच्छ्रा
प्याः॥ लक्ष्मीः ध्वजः स्नानं च पाके शयनं च भोज्यं गजालयं वाजिगृहं धनस्य देव
स्य पूर्वादिदिशो दिक्क्रमेण मध्ये सभा नायपतिवेशनाय॥ आश्वलायनसूत्रे पत्रा
यः॥ सर्वतोमध्यं समेत्र प्रदक्षिणं॥ न्नायनीयं परीस्प्राच्याः स्पंदेरन्नतस्सर्वं
समृद्धं वसिष्ठः॥ स्वगृहात्पश्चिमे भागे पितृस्वाग्रजमंदिरं॥ गर्गः॥ परकोणे
: परद्वारे: परस्तंभैः परद्रुमैः॥ कूपवृक्षादिभिश्चैव हतं द्वारं निरर्थकं॥ ना
रदः॥ प्रवेशो मध्यमो ज्ञेयः सौम्यकार्त्तिकमासयोः॥ माघफाल्गुनवैशा
खज्येष्ठमासे शुभशोभनः॥ रत्नकोशे पुष्ये धनिष्ठा मृगवारुणे शुभस्याद्यं तु
वक्ष्ये त्रिषु चोत्तरासु॥ अक्षीणचंद्रेशुभदो नृपस्य तिथावरिक्ते चरस्थ वे

शां॰ र. शः॥ वसिष्ठः कृत्वाष्टकं पृष्ठतो वामोता कीर्विधान्मूल्यानयहः॥ पूर्णकुंभं रम्यं
तोरणस्रग्वितानैः स्त्रीभिः स्रग्वीणानयावद्यैर्विशेषलग्नात्प्रागादितो दिक्षु खो
२९६ घोराशानिवेशयेत्॥ एकमेधं न्यसेत्कोणे वामं श्रुकं विधिं नयेत्॥ नारद
॥ अकपाटमनाच्छन्नमदत्तबलिभोजनं॥ गृहं न प्रविशेद्धीमानपदा माक
रोदितत्॥ मृत्येष्टिकां स्वर्णरत्नधान्यशैवलसंयुतां॥ गृहमध्ये हस्तमा
त्रगर्तैर्वास्तुं च विन्यसेत्॥ हेमाद्रौ मात्स्ये॥ एकाशीतिपदं कृत्वा रेखाभिः क
नकेन तु॥ पश्चात्पिष्टेनालिप्य सूत्रेणापोह्य सर्वतः॥ दशपूर्वापरा रेखा राम
दशश्चैवोत्तरायताः॥ सर्ववास्तुविभागेषु विज्ञेया नवका नव॥ एवंस्थाप्य
जयेद्देवांश्चत्वारिंशच्च पंच च॥ द्वात्रिंशद्बाह्यतः पूज्यास्त्वंतस्त्रयोदश॥ २९६

३६

मध्ये नवपदो ब्रह्मा चत्वारः स्त्रिपदाः स्मृताः॥ विंशतिस्त्वेकपदिकास्तावंतो द्विप
दाः स्मृताः॥ नामतस्तान्प्रवक्ष्यामि स्थानानि च निबोधत॥ ईशानकोणादिषु
तान्पूजयेत्क्रमशो नव॥ शिखी चैवाथ पर्जन्यो जयंतः कुलिशायुधः॥ सू
र्यसत्यौ भृशश्चैव काशो वायुरेव च॥ पूषा च वितथश्चैव गृहक्षत यमावुभौ॥
गंधर्वो भृंगराजश्च मृगः पितृगणस्तथा॥ दौवारिकोथ सुग्रीवः पुष्पदंतो जलाधि
पः॥ असुरः शोषवायो च रोगोऽहिर्मुख्य एव च॥ भल्लाटः सोमसर्पौ च अदिति
श्च दितिस्तथा॥ बहिर्द्वात्रिंशदेते तु तदंतश्च ततः शृणु॥ ईशानादिचतुष्कोणसं
स्थितान्पूजयेद्बुधः॥ आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च॥ मध्ये नवप
दो ब्रह्मा तस्याष्टौ च समीपगाः॥ अर्यमा सविता चैव विवस्वान्विबुधाधिपः॥

शां॰ र॰ मित्रोथराजयक्ष्माचतथापृथ्वीधरःस्मृतः॥अष्टमश्चापवत्सस्तुपरितोब्रह्म
णस्मृतः॥॥आपश्चैवापवत्सश्चपर्जन्योग्निर्दितिस्तथा॥पदिकानांतुवर्गो
२८७ यमेवंकोणेष्वशेषतः॥तन्मध्येतुवहिर्विंशद्द्विपदास्तेतसर्वतः॥अर्यमा
चविवस्वांश्चमित्रःपृथ्वीधरस्तथा॥ब्रह्मणःपरितोदिक्षुत्रिपदास्तेतुसर्व
तः॥शीर्षेशिखीसमादिष्टोमुखेचापःसमाश्रितः॥पृथ्वीधरोर्यमाचैवस्त
नोरुश्चापवत्सकः॥नेत्रयोर्दितिपर्जन्यौश्रोत्रेदितिजयंतकौ॥सर्पेंद्रावंसं
स्थौतुपूजनीयौप्रयत्नतः॥सत्यरोगादयस्तद्बाह्वोःपंचचपंचवा॥रुद्रश्च राम
राजयक्ष्माचवामहस्तेसमाश्रितौ॥सावित्रःसवितातद्वद्दक्षिणमाश्रि
तौ॥विवस्वानथमित्रश्चजठरेसंव्यवस्थितौ॥पूषाचपापयक्ष्माचहस्तयोर्म २८७

३९

णिबंधने॥तथैवासुरशोषौचवामपार्श्वेसमास्थितौ॥पार्श्वेतुदक्षिणेतद्वद्वि
तथःसगृहक्षतः॥ऊर्वोर्यमांबुपौतेषांजान्वोर्गंधर्वपुष्पकौ॥जंघयोर्भृंगसुग्री
वेस्फिकस्थोदौवारिकोमृगः॥जयशक्रौतथामेढ्रेपादयोःपितरस्तथा॥मध्ये
नवपदोब्रह्माहृदयेनतुपूज्यते॥चतुःषष्टिपदोवास्तुप्रासादेब्रह्मणास्मृतः
ब्रह्मणास्मृतः॥ब्राह्मचतुष्पदस्तत्रकोणेष्वेकपदास्तथा॥बहिःकोष्ठेष्वथा
ष्टौतुसार्धांश्चोभयसंस्थिताः॥विंशतिद्विपदाश्चैवचतुःषष्टिपदेस्मृताः॥
पूजामाहनारदः॥वास्तुमंत्रेणवास्तुज्ञोदूर्वादध्यक्षतादिभिः॥वसिष्ठःप्रण
वेनार्चयेद्वापि॥अथवास्वस्वनामभिः॥होमस्त्रिमेखलेकार्यःकुंडेहस्तप्रमा
णके॥यवैःकृष्णतिलैश्चैवसमिद्भिःक्षीरवृक्षजैः॥पालाशैःखादिरैश्चापा

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्य स्मारक

शां.र. गौडुंबरसंभवैः ॥ कुशान्वांभवैर्वापि मधुसर्पिसमन्वितैः ॥ कार्यास्तु पंचभिः
बिल्वैर्वाजैस्त्याधिवाः ॥ होमांते नक्षत्रभाज्येस्तु वास्तुदेवो बलिं हरेत् ॥ ईशा
२९८ कोणे घृताक्तान्नं शिखिने विनिवेदयेत् ॥ ओदनं सोत्पलं दद्यात्पर्जन्याय घृ
तान्वितं ॥ जयंताय घृतं पातयेष्टं कूर्मं च संसृजेत् ॥ इंद्राय पंचरत्नानि पैष्टं
चक्कुलिशं तथा ॥ वितानकं च सूर्याय धूपं सक्तुं तथैव च ॥ सत्याय घृतगोधू
ममत्स्यान्दद्यात्मृशाय च ॥ शाष्कुलीमंतरिक्षाय दद्यात्सक्तुकं च वायवे ॥ ला
जाः पूष्णे तु दातव्या वितथे चणकोदनं ॥ गृहक्षताय मधुक्तं यमाय पिशि
तोदनं ॥ गंधोदनं च गंधर्वे भृंगे मत्स्यान्निकं ॥ मृगाय यावकं दद्यात्पितृ राम
भ्यः कृसरं तथा ॥ दौवारिके दंतकाष्ठं पैष्टं गह बलिं तथा ॥ सुग्रीवे पूपकं द २९८

३०

द्यात्पुष्पदंताय पायसं ॥ कुशस्तंबेन सः — — पंथापद्मं च वारुणे ॥ पिष्टं हिरण्म
यं दद्यादसुराय सुरा तथा ॥ घृतोदनं च रोगाय — — चैव पापयक्ष्मणे ॥ घृतल
डुकं रोगाय नागे पुष्पफलान्वितं ॥ मुख्ये पंचमुख्याय दातव्यं मुद्गोदनं मतः परं ॥
भल्लाटस्यान्नकं दद्यात्सोमे वंबा घृतो बलिः ॥ क्षीरमाषाय दातव्यमपवस्सा
यवैर्दधि ॥ सवित्रे लड्डुकं दद्यात्समरीचं कुशोदकं ॥ सवित्रे गुडपूपां पाश्चजया
य घृतचंदनं ॥ विवस्वते पुनर्दद्यादक्तं चंदनपायसं ॥ आमपक्वं तथा मांसं
देयं स्यादाजयक्ष्मणे ॥ पृथ्वीधराय मांसानि कूष्मांडानि निवेदयेत् ॥ शा
र्करापायसं दद्यादर्यम्णो यानमेव च ॥ पंचगव्यं च वा ब्रह्मणे तिलाक्षतहवि
ष्चरुं ॥ सर्वेषां कंधनं दद्याद्ब्रह्मणे गोपयस्विनी ॥ मांसोदनं घृतं पद्मकेसरं

शां॰ र॰ दुर्विषाग्निचितं॥ ईशाननागमाश्रित्य विदार्यै विनिवेदयेत्॥ दध्यन्नं सरुधिरं मा
सान्वैरूतनागपाः॥ वायव्ये पापराक्षस्यै मत्स्यमांसं सुरासवं॥ पायसं वापि
२८८ दातव्यं स्वनाम्ना सर्वतः क्रमात्॥ नमस्कारानुयुक्तेन प्रणवाद्येन सर्वतः॥ त
तः स्वैरौषधिस्नानं यजमानस्य कारयेत्॥ द्विजांस्तु पूजयेच्छाये वा स्वे गृह
मागताः॥ एतद्वास्तुपशमनं कृत्वा कर्म समाचरेत्॥ प्रासादभवनोद्यान
प्रारंभे परिवर्त्तने॥ जीर्णोद्धारे तथा सा ते तथा गृहनिवेशने॥ द्वारानिवर्त्ति
ने तद्वत्प्रासादपरिवर्त्तने॥ धुरवेश्मप्रवेशे च सर्वदोषोपशांपशांतये॥ राम
वास्तूपशमनं कृत्वा ततः सूत्रेण वेष्टयेत्॥ रक्षोघ्नपावमानेन सूक्तेन भ २८८
वनादिकं॥ अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः॥ गृहे वायतने कुर्यान्न स

३९

दुःखमवाप्नुयात्॥ गृह्योक्तहोमविधिना बलिकर्म कुर्यात् प्रासादवास्तुशमने
च विधिर्यदुक्तः॥ गृह्योक्तशांतेरस्याश्च समुच्चयः स्यात्॥ संतर्पये द्विजवरान
थ भक्ष्यभोज्यैः शुक्लांबरः स्वभवनं प्रविशेत्सुरूपं कृत्वाग्रतो द्विजवरानथ पूर्णकुं
भं दध्यक्षताम्रदलपुष्पफलोपशोभं॥ दत्वा हिरण्यवसनानि तथा द्विजेभ्यो मंग
लशांतिनिलयं स्वगृहं विशेद्य॥ आश्वलायनः बीजवतो गृहान् प्रपद्येत वसिष्ठः
संहितायामप्येवमेव शांतिरुक्ता तत्रैव॥ वास्तुपूजामकृत्वा यः प्रविशेन्न
वमंदिरं॥ रोगान्नानाविधान् क्लेशान् अश्नुते सर्वसंकरान्॥ ॥इति वास्तुशां
तिः॥ ॥अथाश्वलायनकृतो वास्तुशांतिप्रयोगः॥ प्रागुक्तगृहप्रवेशादि
नात्पूर्वेद्युः शुभे पूर्वाह्णे सस्त्रीकः शुचिः प्राङ्मुखः प्राणानायम्य देशकालौ स्म

त्वाग्रहारंभादौअस्यवास्तोः शुभतामिध्यर्थंसनवग्रहमखांवास्तुशांतिंकरि
ष्यइतिसंकल्प्यतदंगत्वेनगणेशपूजनपुण्याहवाचनमातृकापूजननांदीश्रा
द्धाचार्यादिवरणानिकरिष्यइतिसंकल्प्यतानिकृत्वाचार्यादीनलंकारवस्त्रा
दिभिः संपूजयेत्॥ तत्रऋत्विजश्चत्वारः॥ ततः आचार्यः कर्मकरिष्यइतिसं
कल्प्यतानिकृत्वासर्षपान्विकिरेदेभिर्मंत्रैः॥ यदत्रसंस्थितंभूतंस्थानमाश्रि
त्यसर्वदा॥ स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु॥ अपक्रामंतुभूतानि
पिशाचाःसर्वतोदिशं॥ सर्वेषामविरोधेनशांतिकर्मसमारभेत्॥ भूतप्रेतपि
शाचाद्याअपक्रामंतुराक्षसाः॥ स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमिभुवंत्वि
मांइति॥ ततोगायत्र्यागोमूत्रंगंधद्वारेतिगोमयमाप्यायस्वेतिक्षीरंदधिक्राव्णो राम ३००

तिदधिघृतमिमाक्षेतिघृतं॥ आपोहिष्ठेतिकुशोदकंचैकत्राप्रणवेनावलोड्यकु
र्योःशुचीः वोहव्याइतित्वेनसर्वंगृहादिप्रोक्षेत्॥ ततोगृहाद्दैर्घ्ययजमानैकहस्त
मितंचतुरस्त्रंसयोनिमेखलंकुंडंचतुरस्त्रंचतुरंगुलोत्सेधंस्वजानुलंवा विधायतस्
वतिश्चतुरंगुलोन्नतंहस्तमितंवेदिंचशुभमृदाविधायतद्वेदेरीशान्यादिकोणच
तुष्केचतुःशंकून्॥ विशांतुभूतलेनागालोकपालाश्चसर्वशः॥ अस्मिन्नाले
वतिष्ठंतुआयुर्बलकराःसदेतिमंत्रेणपरोपयेत्॥ प्रतिरोपणंमंत्रावृत्तिरेव
मग्रेपि॥ प्रासादादौतुरुद्रपदेतत्तन्नाम्नोहनीयं॥ एवंप्रासादेपीतिसर्वांतेतिदे
शात्॥ ततोरोपणक्रमेणशंकुपार्श्वेमाषभक्तबलीन्॥ अग्निभ्योप्यथसर्वेभ्यो
याम्येतुसमाश्रिता॥ तेभ्योबलिंप्रयच्छामिपुण्यमोदनमुत्तममितिदद्यात्ः ततो

शां॰र॰ दृक्परिक्षेत्रे कुंकुमादिनासुवर्णरजतादिशलाकया॥ शांताःपद्मावती
३०१ कांताविशालाप्राणवाहिनीनामतीसुमतीनंदासुभद्रासुरथाःस्योंकारादिन
मोतैर्नाममंत्रैः पश्चादारभ्यप्राग्गताउदक्तस्याःसमाअंगुलद्वयांतरादशरे
खाःकृत्वापुनः हिरण्यासुव्रतालक्ष्मीविभूतिविमलाप्रिया॥ जयाज्वालाविशो
कास्तुइडाइतिनाममंत्रैःपश्चिमेवदक्षिणारभ्यउदग्गताः प्राक्तस्थप्राकुशारेखा
ः कृत्वाकुंडेस्थाउिलेवास्तुवंसंस्कृत्याग्निंप्रतिष्ठाप्यदक्षिणवेद्यांवस्त्रेनवग्रह
मंडलंविलिख्यतत्रग्रहादीन्संस्थाप्यषोडशोपचारैःसंपूज्यतदीशान्यांकल
शंसंस्थाप्यवास्तुमंडलंगत्वातत्रईशानकोणपदादारभ्यप्रतिमास्तुतंडुल राम
पुंजेषुवाशिख्यादिदेवताःप्रणवादिनमोंतनाममंत्रेणावाहयेत्॥ तत्रईशा ३०१

५१

नकोणपदेवास्तोःशिरसि॥ ॐशिखिनेनमः शिखिन्आवाहयामितिस्थापयेत्॥
एवमग्रेपि॥ तद्दक्षिणैकपदेदक्षिणनेत्रेपर्जन्यंतद्दक्षिणपदेतत्पश्चिमपदेव
दक्षिणश्रोत्रेजयंतं॥ तद्दक्षिणपदद्वयेदक्षिणांसेकुलिशायुधंतद्दक्षिण
पदद्वयेदक्षिकूर्परेसूर्यं॥ तद्दक्षिणोपरिस्थितैःकपदेदक्षिणप्रवाहौवाक्क
शंतद्दक्षिणाग्नेयकोणपदेदक्षिणप्रावाहावेववायुस्पश्चिमेकपदेदक्षिणम
णिबंधेपूषणं॥ तत्पश्चिमपदेतदुत्तरपदेवदक्षिणपार्श्वेवितथंतत्प
श्चिमपदद्वयेदक्षिणपार्श्वेगृहक्षतं॥ तत्पश्चिमपदद्वयेदक्षिणोरौयमं
तत्पश्चिमपदद्वयेदक्षिणपार्श्वेगृहक्षतं॥ तत्पश्चिमपदद्वयेदक्षिणोरौयमं
तत्पश्चिमपदद्वयेदक्षिणपार्श्वेगृहक्षतं॥ तत्पश्चिमपदद्वयेदक्षिणजानौगंध

रा.र. ३०२

वं॥ तत्पश्चिमपदद्वये दक्षिणजंघायां मृगराजं॥ तत्पश्चिमपदद्वये दक्षिणोरौ यमं
तत्पश्चिमपदद्वये दक्षिणपार्श्वे एव ग्रहक्षतं॥ तत्पश्चिमपदद्वये दक्षिणजानौ
गंधर्वं॥ तत्पश्चिमपदद्वये दक्षिणजंघायां भृंगराजं। तत्पश्चिमोपरिस्थ्ये एकप
दे दक्षिणस्फिचि मृगं॥ तत्पश्चिमनैरृत्यकोणैकपदपादयोः॥ पितॄन्॥ तदुत्त
रैकपदे दक्षिणस्फिचि मृगं॥ तत्पश्चिमवामस्फिचि दौवारिकं॥ तदुत्तरपदे त
त्पाकपदे वामजंघायां सुग्रीवं॥ तदुत्तरपदद्वये वामजानौ पुष्पदंतं॥ तदु
त्तरपदद्वये वामोरौ वरुणं॥ तदुत्तरपदद्वये वामपार्श्वे असुरं॥ तदुत्तरप
दद्वये वामपार्श्वे एवं शोषं॥ तदुत्तरोपरिस्थ्यैकपदे वाममणिबंधे॥ पापांत
उत्तरपश्चकोणपदे वामप्रबाहौ रोगं॥ तत्प्रागेकपदे वामप्रबाहवे अहिं॥ राम ३०२

५२

तत्प्राक्पदे तद्दक्षिणपदे च वामकूर्परे मुख्यं॥ तत्प्राक्पदद्वये वामबाहौ भल्ला
टं॥ तत्प्राक्पदद्वये बाहवे सोमं॥ तत्प्राक्पदद्वये वामांसे सर्पं॥ तत्प्राक्प
दद्वये वामश्रोत्रे अदितिं॥ तत्प्रागुपरिस्थैकपदे वामनेत्रे दितिं॥ तद्दक्षिणे
शिखिपदाधः कोणपदे मुखे आपं॥ आग्नेयवायुपदाधःकोणपदे दक्षि
णहस्ते सावित्रं॥ नैरृत्ये पितृपदाधःकोणपदे मेढ्रे जयं॥ वायव्ये रोगपदा
धःकोणपदे वामहस्ते सावित्रं॥ नैरृत्ये पितृपदाधःकोणपदे मेढ्रे जयं॥ वायव्ये
रोगपदाद्रुद्रं मध्यपदे च॥ ईशानकोणपदे दक्षिणपदत्रये दक्षिणस्तने ऽर्यम्णं॥
तद्दक्षिणांसे ये ककोणपदे दक्षिणहस्ते सवितारं॥ तत्पश्चिमपदत्रये जठर
दक्षिणभागे विवस्वंतं॥ तत्पश्चिमनैरृत्यकोणपदे वृषणयो विबुधाधिपं॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारक

शां.र. तदुत्तरपदत्रये नैरृत्यवामभागे मित्रं ॥ तदुत्तरवायव्यकोणपदे वामहस्ते रा
जयक्ष्माणं ॥ तत्प्राक् पदत्रये वामस्तने पृथ्वीधरं ॥ तत्प्रागीशानकोणप
२०३ देचरसि आपवत्सं ॥ मध्ये नवपदेषु तन्नाम ब्रह्माणं ॥ तत उत्तरे वृषवा
स्तुवास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् रुद्रो वास्तोष्पते प्रतिजानीह्यस्मानि
ति मंत्रेण स्थापयेत् ॥ स च सुवर्णस्य रूप्यस्य वा ॥ ततो मंडलस्य बहिरीशा
नाग्नेयनैरृतवायव्यकोणेषु क्रमेण चरकीं विदारीं पूतनां पापराक्षसीं ॥
स पूर्वदक्षिणपश्चिमोत्तरदिक्षु च क्रमेण स्कंदमर्यमणं जृंभकं पिलिपिंछं
च प्राग्वन्नाममंत्रैः संस्थाप्य प्रागाद्यष्टदिक्षु इंद्रादीन् स्वस्वमंत्रैर्नाममंत्रैर्वा राम
संस्थाप्य तद्बहिस्तावद्यासनाद्युपचारैः प्रत्येकमेकतंत्रेण वा कुंडस्य सम्य २०३

४३

येन वा स्वस्त्ययमंडलादीशान्यामाकालकमव्रणं कलशं संस्थाप्य तत्र गंधौषधी
यवदूर्वापंचपल्लवसप्तमृत्फलपंचरत्नानि प्रक्षिप्य वस्त्रेणावेष्ट्य यवपूर्ण १०१
पूर्णपात्रं निधाय वरुणमावाह्य तत्र तीर्थान्यावाहयेत् ॥ तत आचार्योन्वाधानं
कुर्यात् ॥ तत्र चक्षुषी आज्येनेत्यंतमुक्त्वा नवग्रहान् अमुकसंख्याभिः समित्तिलपा
यसाज्याहुतिभिर्वास्तोष्पत इति चतसृभिरृग्भिः क्रमेणामुकसंख्याभिः समित्ति
लयवपायसाज्याहुतिभिर्वास्तोष्पत इति पंचभिरृग्भिः क्रमेणामुकसंख्याभि
र्वैस्तद्दीजैर्वर्धिरकाद्यानमुकसंख्यसमिदादिचतुराहुतिभिरिति प्रधानदे
वताः संकीर्त्य शेषेण स्विष्टकृतमित्याद्युक्त्वा समिधोनुजुयात् ॥ ततः प्रण
ताप्रणयनांतं कृत्वा शिख्यादिदेवताभ्यः प्रत्येकममुष्मै त्वेति निरूप्याम्सर्वेभ्यो

शां॰र॰ तं कुर्यात्॥ ततो यजमानाग्नेर्दक्षिणतउपविष्टः सर्वदेवताद्रव्याणि च संक
त्रित्वास्मयतान्सुस्रजे न नममेत्येकदेवत्यागं कुर्यात्॥ बहुकर्तृके होमेप्र
३०४ त्याहुति त्यागस्य कर्तृसत्त्राकत्वात् तत आचार्य इत्याधानादि कृत्वा प्रधानहो
मं सहुत्विक कुर्यात्॥ तत्र द्रव्याणि तत्संख्या सेव केचित्त्वे के कान्वर्वाहुतिरि
त्याहुः॥ ततोधिदेवताप्रत्यधिदेवताविनायकादिभ्य स्तन्त्रनसंख्ययात थै
व॥ तत्र तत्र गृहाधिदेवतादिभ्यस्त त्र गृहसमिधः पलाशरूपो वा ग्रहाणामष्ट
पक्षे एतान्यश्वतस्य इति शिष्टाः॥ अत्र तिसृभिर्दूर्वाभिरेकाहुतिरिति संख्या राम
कार्या॥ कुशेष्वग्रिपत्रे णे केति॥ ततः शिरस्यादिभ्यः प्राणुक्त प्रणवादिस्वा ३०४
हान्तनामभिः प्रत्येकमष्टसहस्रमष्टशतमष्टाविंशतिरष्टौ वाहुतीः॥ समित्ति

५५

लपायसाज्यं जुहुयात्॥ अत्र समिध उदुंबरस्यामुकसंख्या स्तदलाभे ऽश्वत्थादीना
मपि॥ सर्वासमिधो मधुघृतदधिभिर्मधुघृतक्षीरैर्वाभ्यक्ता होतव्याः तिलाः कृष्णा
एव यव यवो गोरेव केचित्तु तिलेष्व यः वा नाहुः॥ ततो वास्तुवेवास्तोष्पत इति च
तसृभिर्वास्तोष्पते ध्रुवेति च प्रत्यृचं पंचाशकैकं वाज्यं नाशं बिल्वं जुहुयात्॥
वास्तोष्पत इति च तसृणां वसिष्ठो वास्तोष्पतिस्त्रिष्टुभोत्यागाभ्यत्री होमे
वि॥ वास्तोष्पते ध्रुवास्थूणामस्य विवसिष्ठो वास्तोष्पतिर्द्विष्टुहोमे वि॥ ततश्चार
वादिभ्यो मुख्यमन्त्रसंख्ययाच वादि द्रव्याणि जुहुयात्॥ मुखेभ्यो ऽष्टसंख्याया
या मात्र चतुः संख्यत्वमिति शिष्टाः॥ एतानि सर्वाणि द्रव्याणि हस्तेनैव होतव्या
नि॥ ततः स्विष्टकृदादि प्रायश्चित्तहोमान्तं कृत्वेन्द्रादिदिक्पालेभ्यो ग्रहेभ्यश्च सदी

शां.र. पमाषभक्तबलीन्दत्वावास्तुव्यासंधादरस्पृहीन्वचतुर्थ्यंतैर्नवाकृता॥नालि
३०५ केरादिफलंतत्रसंस्थाप्यमूर्द्धानमितिपूर्णांजुहुयात्॥मूर्द्धानंदिवोअरक्षाजो
वैश्वानरस्त्रिष्टुप्॥ततःप्रणीतानिनयनादिकर्मशेषंसमाप्यवास्तुमं
डलपश्चिमदेशेशिखिनेएषपायसबलिर्नमः॥इत्येवंशिख्यादिभ्योबली
न्दद्यात्॥तान्विप्रेघृतयुतपायसेनक्षत्रियादीवक्ष्यमाणैःपक्वैस्तदभा
वेपायसेनेति॥ततश्चरकादिभ्यस्तथैवमाषभक्तबलीन्दद्यात्॥तत
आचार्यादयःसमुद्रज्येष्ठाइत्यादिभिर्वैदिकैः॥सुरास्त्वेत्यादिपौराणैश्चमंत्रैर्यज राम
मानंसपत्नीकंत्र्यंबकशोदकेनाभिषिंच्यसर्वौषधीभिस्तुलिप्यस्नाप ३०५
येयुः॥तत्रआचार्योब्रह्मस्थानेसुरूपांलक्षितांस्वरूपांपृथ्वींध्यात्वा॥ॐधरा

येनमः॥इतिमंत्रेणप्रपूज्यजयेत्॥सर्वदेवमयंवास्तुवास्तुदेवमयंपरमितिः॥
ततोगृहंप्रागादितःषिसस्त्रायामवमानेनसक्तेनराक्षोघ्नेनवेष्टयेच्छनैः॥छि
न्नेसूत्रेऽशुभं॥ततोऽन्नपूर्णपात्रसस्नानकंभ्राम्यान्नजलपूर्णपात्रसस्नानकंभ्रा
म्यातथैवसक्तेनयेनधारापद्धयेनधारापद्धयमविच्छिन्नंकुर्यात्॥अथयज
मानोगृहस्याग्नेयेआकाशप्रदेशाजानुदघ्नमवटंखनित्वातंगोमयेनोपलिप्य
शुक्लंचंदनपुष्पाक्षतादिभिरलंकृत्यव्रीह्यादिसप्तबीजानिदध्योदनंचप्रक्षि
प्यनवकुंभंजलपूर्णंशुक्लैःकुंकुमपुष्पयुतंगंधादिभिरर्चितंहस्तद्वयेनादा
यजानुभ्यामवनींगत्वा॥ॐनमोवारुणायेतितज्जलेनगर्त्तंपूरयेत्॥तत्रा
वर्त्तेभद्रदक्षिणेपुष्पोचोर्द्ध्वमुखेशुभंनोवैपरीत्येत्वशुभं॥ततोगृहंत्रिमितयेटि

काचीसमबीजदध्योदनत्रीवालफलपुष्पाणि प्रक्षिप्य पूर्वस्थापितं वृषवा
स्तुं तूर्यमंगलघोषेणानीय तस्यां संस्थाप्य गंधादिभिः संपूज्य प्रार्थयेत् ॥ वास्तो
पूजितोसि मया वास्तो होमाद्यै र्वनं शुभैः प्रसीदपाहि विश्वेश देहि मे गृहजं
सुखं ॥ वास्तोष्पुरुष नमस्तेस्तु भूशय्याभिरतप्रभो ॥ मद्गृहं धनधान्यादि स
मृद्धं कुरु सर्वदेति ॥ ततः पेटिकामाच्छाद्य तस्मिन् गर्त्तेविधानेन निक्षिपेदनेन ॥
सशैलसागरां पृथ्वी यथावहसि मूर्द्धनि ॥ तथा मां वह कल्याणसंपत्संतति
भिः सहेति ॥ गर्त्तं वितथ्येवमृदा पूरिते मृदआधिक्ये उत्तमं साम्ये मध्यमं न्यूनत्वे
त्वधमं फलं विद्यात् ॥ गर्त्तोपरि भूमिं गोमयेनोपलिप्य शुक्लगंधपुष्पाक्षता
दिभिर्भूषयेत् ॥ ततोग्नेः पश्चिमतआचार्यं संपूज्यालंकृतां सवत्सां गां वासोयुगं

च दक्षिणां दत्वा ब्राह्मणेभ्यो यथाशक्ति दत्वा गृहाणां शिख्यादिवास्तुदेवतानां च पूजां
कृत्वा क्षमाप्य उत्तिष्ठ यान्तु देवा इति विसृज्याचार्यहस्ते प्रतिपाद्याग्निं संपूज्य गच्छ ग
च्छेति विसृज्य ॥ ब्राह्मणैः शांतिपाठयित्वा ग्रहादीनां च शिख्यादीनां च प्रीत्य
र्थं प्रत्येकं त्रीस्त्रीनेकैकं वा यथाशक्ति वा ब्राह्मणान् संभोज्याशिषो गृहीत्वा सु
हृद्युक्तो भुंजीत ॥ एवं प्रथमेह्नि वास्तुशांतिं विधाय द्वितीयेह्नि गृहप्रवेशं कुर्या
त् ॥ सचेत्थं नवं जलपूर्णं पल्लवोपेतं ह्वस्त्रितं सुधालिप्तं वस्त्रवेष्टितं संपूर्णपात्रं
सफलं कलशमंजलिना गृहीत्वा यजमानो ब्राह्मणान्वितः सदारसुतः तूर्यघोषे
ण गृहं प्रविश्य प्रधानगृहे मध्ये धान्योपरि तं कलशं स्थापयेत् ॥ ततो गृहे स्वे
र्याश्च पुण्याहं वाचयित्वा ब्राह्मणान् संपूज्य च भोजयित्वाशिषो गृहीत्वा सुहृ

ग्रा॰ र॰ घतोऽनुजातः॥ ॥इतिवास्तुशांतिप्रयोगः॥ ॥केचित्त्वेकाशीतिपदेशवम
ण्डलेस्थापनपूजनहोमबलिदानेषुब्रह्मादिपूर्ववदिच्छन्ति॥यथा॥मध्यन
३०७ वपदेषुवास्तोरुरसोब्रह्मा॥ तत्प्राक्संलग्नपदत्रयेदक्षिणस्तनेऽर्यमा
ब्रह्मपदसंलग्नदक्षिणपदत्रयेजठरदक्षिणभागेविवस्वान्॥ तस्यैवपश्चि
मसंलग्नेपदत्रयेजठरवामभागेमित्रः॥ तस्यैवोदक्संलग्नेपदत्रयेवामस्त
नेपृथ्वीधरः॥ ब्रह्मपदसंलग्नेईशानपदेउरस्यापवत्सः॥ आग्नेयपदेदक्षि
णहस्तेसविता॥ नैरृत्यपदेवृषणयोर्विबुधाधिपः॥वायव्यपदेवामहस्तेराजय
क्ष्मा॥आपवत्सपदसंलग्नेईशानपदेमुखेआपः॥सवितृपदसंलग्नेआग्नेयपदे राम
दक्षिणहस्तेसावित्रः॥ विबुधाधिपपदसंलग्ननैरृत्यपदेमेढ्रेजयः॥यक्ष्मपद ३०७

संलग्नवायव्यपदेवामहस्तेरुद्रः॥मंडलेईशानकोणपदात्शिखादीन्दिसंता
त्यान्वत्संस्थाप्यचरकादीन्प्राग्वदावाह्यतैर्नैवक्रमेणपूजनहोमादिकुर्यात
इतरत्सर्वंविहिति॥ ॥इतिगृहेवास्तुशांतिप्रयोगः॥ प्रासादारामादौतुचतुःष
ष्टिपदंमंडलंकुर्यात्॥ तत्रलक्ष्मीयशोवतीकांतासुप्रियाविमलाश्रियासुभगा
सुमतीइडाएतैर्नामभिः प्रागग्राउदक्संस्थानवरेखाः कृत्वाधस्याः प्राणाः
विशालाः स्थिराः नद्भाजयाः॥ ॥निशाः विरजाः विनयाः एतैर्नमोतैर्नामभिरुद
गग्राः प्राक्स्थानवरेखाः कृत्वाः मध्यगंपदचतुष्टयमेकीकृत्यतत्कोणचतु
ष्टयाबहिः॥ कोणचतुष्टयगतरेखाभिः पदान्याधीकृत्यशिखादीन्स्थापये
त्॥ तत्रईशानपददक्षिणार्धेशिरसिशिखिनं॥ तद्दक्षिणसार्धपदेदक्षिणेप

शां.र. द्वयेदक्षिणबाहौसूर्यं॥ तद्दक्षिणबाहवेब्रसत्यांतद्दक्षिणसार्द्धपदेदक्षिणकू
र्परेभृशं॥ तद्दक्षिणाग्नेयपदार्धेदक्षिणप्रबाहावाकाशं॥ तत्पश्चिमार्द्धेदक्षिण
३०८ प्रबाहावेवायुः॥ तत्पश्चिमसार्द्धपदेदक्षिणमणिबंधेपूषणं॥ तत्पश्चिमप
दद्वयेदक्षिणपार्श्वेवितथात्पश्चिमपदद्वयेदक्षिणपार्श्वेगृहक्षतं॥ तत्प
श्चिमपदद्वयेदक्षिणोरौयमंतत्पश्चिमपदद्वयेदक्षिणजानौगंधर्वं॥ तत्पश्चि
मसार्द्धपदेदक्षिणजंघायांभृंगराजंतत्पश्चिमनैर्ऋत्यपदार्धेदक्षिणास्फि चि
मृगंतदुत्तरार्द्धेपादयोःपितॄन्॥ तदुत्तरपदद्वयेवामगुल्फेदौवारिकं
तदुत्तरवायव्यपदार्धेद्वयेवामजंघायांसुग्रीवं॥ तदुत्तरपदद्वयेवामजा राम
नौपुष्पदंतं॥ तदुत्तरवायव्यपदार्धेवाममणिबंधेः॥ यापांतेप्राक्पदा ३०८

४८

र्धेवामप्रबाहौरोगं॥ तत्पुदक्सार्द्धपदेवामप्रबाहावेवाहिं॥ तत्प्राक्पदद्वयेवा
मकूर्परेमुख्यं॥ तत्प्राक्पदद्वयेवामबाहौभल्लाटं॥ तत्प्राक्पदद्वयेवामबा
हौभल्लाटं॥ तत्प्राक्पदद्वयेवामबाहवेसोमंतत्प्राक्॥ पदद्वयेवामांसेसर्पं
तत्प्राक्सार्द्धपदेवामश्रोत्रे॰ हितिं॥ तत्प्रागर्द्धपदेवामनेत्रेदितिं॥ मध्यपदे
पुर्ईशानकोणेपदोत्तरार्द्धेमुखेआपं॥ आग्नेयपदोत्तरार्द्धेदक्षिणहस्तेसावित्रं
नैर्ऋत्यपदोत्तरार्द्धेमेदूजयं॥ वायव्यपदोत्तरार्द्धेवामहस्तेरुद्रं॥ मध्येप्राक्प
दद्वयेदक्षिणास्तने॰ र्यमणं॥ आग्नेयपददक्षिणार्धेदक्षिणहस्तेसवितारं॥
तत्पश्चिमपदद्वयेजठरदक्षिणेविवस्वंतं॥ नैर्ऋत्यपदपूर्वार्द्धेवृषणयोर्विबुधा
धिपं॥ तदुत्तरपदद्वयेजठरवामेमित्रं॥ वायव्यपदपश्चिमार्द्धेवामहस्तेराजय

शां.र. क्ष्माणं ॥ तस्याः कुपदद्वये वामहस्तेन पृथ्वीधरो ॥ ईशानपदे दक्षिणार्द्धे उरस्याप
वत्सं ॥ मध्यपदचतुष्टये हृत्प्रासे ब्रह्माणं ॥ ततउत्तरे वास्तोष्पतिं नरतिकलश
३०९ वास्तुं ॥ चरक्यादिस्थापनं तु पूर्ववत् ॥ तत्र तत्र गृहपदे प्रासादादिपदस्मूद्यो ॥
अपरे कि भवे कोष्ठात्र नास्ति ॥ अन्यत्सर्वं मविशिष्टं यथा ॥ ब्रह्मादीनावाह
येत् ॥ तत्र मध्यनवदचतुष्टये हृदये ब्रह्मा पूर्वपदद्वये दक्षिणास्तनेऽर्यमो ॥ द
क्षिणपदद्वये वामस्तने पृथ्वीधरः ॥ आग्नेयपदार्द्धद्वयोर्दक्षिणहस्ते सवि
तारौ ॥ निरृतिपदार्धयोर्वृषणमेढ्रयो विबुधाधिपजययोः ॥ वायव्यपदार्द्धयो
र्वामहस्ते राजयक्ष्मणोः ॥ ईशानपरार्धयो रुरोमुखयोरापायवत्सौ ॥ ततई रा म
शानपद दक्षिणार्द्धपादिदितिरिफलं प्राग्वत् ॥ ततो वास्तो पूजादि सर्वं पूर्ववत् ३०९

इति प्रासादादौ वास्तुशांतिप्रयोगः ॥ ॥ अत्र सर्वत्र भक्ष्यक्रियादिकं क्षीराक्तो समो
त्रिरवादिबाम्यर्थमीता निदप्राप्यादहरेतानि वाशिखिने घृतौदनं ॥ पर्जन्याय
सोमस्यघृतौदनं ॥ जयंताय सपीध्वजं ॥ कुर्मं कुलित्थ ॥ सुधायः सय वतत्वपिष्ट
कुलित्थं ॥ सूर्याय रक्तवितानातपसक्तू ॥ सत्याय सघृतगोधूमान्नं ॥ भृशाय
वतत्वपिष्टकुलित्थं ॥ सूर्याय रक्तवितानातपसक्तू ॥ पूष्णे लाजान्नः ॥ वित
थाय चेताकोदनं ॥ गृहक्षताय समधक्तं ॥ यमाय पपश्रिनादेनः ॥ गंधर्वाय
गंधोदनं ॥ भृंगराजाय पतेमत्स्यजिह्वाः ॥ मृगेशाकुनिजिह्वाः ॥ मृगाय पाव
कं ॥ नीलपटमपात्पे कोष्णा वकं पचस्वरू ॥ पितृभ्यः कसरं मुद्गौदनं कृष्ण
पिष्टमाषाः ॥ सुग्रीवाय अपूपं यावकं वा ॥ खर्परघृष्टगोधूमविकारो पूपा

पुष्पदंतायपायसंवरुणायसक्तून्यद्यपत्महिरण्यपिष्टकं।।असुरायसुरां
न्नंवायघृतौदनं।।पापायगोधूमयवावा:।।रोगायसघृतोलट्टकं।।अहयेस
पुष्पंफलं।।नागकेसरंवा:।।मुख्यायघृतौदनंमत्स्यंवा।।भल्लाटायमुद्गौद
नं।।सोमायसघृतंसमधुवापायसं।।सर्पायशालूकंशालिपिष्टंवा:।।शा
लूकंपद्मकंद:।।अदित्यैलोपिका:दित्यैपूरिका:आपायक्षीरं:सावित्रा
यसमरीचंलड्डुकं।।सकुशमोदनंचेत्यन्ये:।।जयायसचंदनंघृतघृतौद
नंवा:।।रुद्रायरक्तपायसं।।अर्यम्णेशर्करापायसं।।सवित्रेगुडापूप:।।वि
वस्वतेसुरक्तचंदनपायसं।।विबुधाधिपायसहरितालंघृतौदनं।।राजा
यक्ष्मणेआमपक्वमांसे:।।पृथ्वीधरायवागमांसंकूष्मांडंवामांसान्नफला

निवा:।।आपवत्सायदधि:ब्रह्मणेपंचगव्यं:यवतिलाक्षतंघृतदध्यानिनाना
भक्ष्यंच।।एवामलाभेयाएवंसर्वेभ्य:विप्रास्तुसर्वदापायसवे।।ततश्चरकै
माषान्नंघृतपद्मकेसराणिविदार्यै:।।माषान्नंतधिरहरिद्रान्नं:पूत
नायै:।।दधिअन्नंसरुधिरास्थिखंडपीतरक्त:पापराक्षस्यै।।मत्स्यमाषसु
रासमा:।।स्कंदायसुरारुधिरे:।।अर्यम्णेसमांसमन्नं:।।जृंभकायमांसरुधि
रेपिस्सायमाषरक्तपद्मं।।अत्रनिषिद्धश्चणपमकरादीयांसतयतिरिक्तानि
कृतिमांसादीनिग्राह्याणि:।।एषामलाभेविप्रश्चमाषान्नं:।। ।।इतिश्रीबिं
दुवृंदवंद्यपादपद्मश्रीमन्नारायणसूरिसूनुनरहरिमकृष्णरचितेपौराणवा
स्तुशांतिप्रयोग:।। ।।इदानींपूर्वोक्तवास्तुशांतिरभिधीयते:।।साचद्विजातीनांपू

शां०२. वोक्त्यासमुच्चीयते॥ पूर्वोक्तायांवराङ्गेचस्वस्वसूत्रोक्तकर्त्तव्यानया।विसिद्धेः॥
३११ येषांतुसूत्रेनास्तितेषांब्राह्मणानांचपूर्वोक्तैवातस्याःसर्वसाधारण्येनविधा
नात् अतस्तन्त्रमात्रविषयत्वं॥ तस्मात्सूत्रोक्तपूर्वयासमुच्चीयते॥
तत्राश्वलायनीयगृह्योक्तायाःप्रयोगः॥ ॥काष्ठादिनिर्मितसंपन्नंगृहेव्री
ह्यादिबीजसंयुतं॥ शोभनेमुहूर्त्तेस्निग्धेःसहसत्तूर्यघोषंप्रविश्य।शुचिवेदी
चतस्रःशिलाःसंस्थाप्यतासुदर्वांनिधायतत्रमणिकसंतनंकुंडस्थापये
दनेनपृथिव्याअधिसंभवेति॥ पृथिव्याअधीति॥ अरंगरोवाववदीति
त्रेधाबद्धोवरत्रया॥ इरामुदप्रशंसन्त्यनिरामपबाधतामितिवा॥ ततोम राम
णिकेजलंसमासिंचेदनेन॥ एतुराजावरुणोरेवतीभिरस्मिन्स्थानेतिष्ठतुमोद ३११

मानः इरावद्धतंघृतमुक्षमाणामित्रेणसाकंसहसंविशन्त्विति॥ ततस्तज्जलं
पात्रांतरआदायतत्रगंधदूर्वाशमीशाखाव्रीहियवान्फलंहिरण्यंचक्षिप्त्वा
दूर्वाभिः॥ शाखाभ्यांचसर्वंगृहंगृहाग्रादितःप्रदक्षिणंव्रजन्त्रिःप्रोक्षेदनेनसू
क्तेनः शंनइन्द्राग्नीइतिपंचदशर्चस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप्गृहप्रोक्षणेविनि
योगः॥ सकृत्सूक्तपाठः ततोमध्येगृहमग्निंप्रतिष्ठाप्यवास्तोष्पत्यंचरुंक
र्मितिप्रधानंसंकीर्त्यान्वाधायपूर्णपात्रनिधानांतंकृत्वावदानधर्मेणावदाया
वदायवास्तोष्पतइतिचतुर्भिर्मंत्रैःस्वाहांतैर्जुहुयात्॥ वास्तोष्पतयइदंन
ममेतिसर्वत्रत्यागः॥ ततःस्विष्टकृदादिहोमशेषं॥ वास्तोष्पतयइदंनमम
तिसर्वत्रत्यागः॥ ततःस्विष्टकृदादिहोमशेषंसमाप्यहुतशेषेणचरुणान्येन

शां.र. शांतं तदर्धं तदर्धं सामान्यपरिभाषया बह्वृचवचनाच्छक्त्या ब्राह्मणान्
भोजयेत्॥ चरोः पूर्वं तत्रान्यः पाको न कार्यः॥ ततः शिवं वास्तु शिवं वास्त्वि
३१२ ति भवंतो ब्रुवंत्विति ब्राह्मणान् ब्रूयात्॥ तैः शिवं वास्त्विति उक्तः सुहृद्युतो
भुंजीतेति॥ विशीर्णगृहसंकरणेऽप्येतदिष्यते साधारणशांतिवत्॥ ॥इति आ
श्वलायनसूत्रोक्तवास्तुशांतिप्रयोगः॥ प्रासादवास्तुशांतिर्गर्भप्रतिष्ठाराज्या
भिषेकादिकं तु मत्कृते पूर्तकमलाकरे ज्ञेयां॥ बौधायनसूत्रे॥ अथातो गृ
हवह्निमिच्छन्मासि मासि तावृतौ संवत्सरे वापूर्यमाणपक्षे पुण्ये नक्षत्रे गृहशां राम
ति प्रारंभेतापामार्गपलाशोदुंबरसदर्भप्रसूनमिंद्रवृक्षाग्रं गृहं संमार्ज्य मा
नस्तोक इति द्वयं च गव्येन दर्भमुष्टिना वासं प्रोक्षति यत इंद्रस्वस्तिदा इति शास् ३१२

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

५२

त्रिरिति वास्तुं कुरुष्व या जरस्येतेनानुवाकेन सिद्धार्थान्संप्रकीर्य वास्तुपदोऽ
ग्निमाग्निमुखान् कृत्वा पक्वान्नं जुहोति वास्तोष्पते वास्तोष्पते इति द्वाभ्यां मध्याज्या
हुतीरुपजुहोति वास्तोष्पते ध्रुवा स्थूणामिति षड्भिरनुष्टुप्छंदः संसादित्रा
सहस्रं तु कुर्याच्छिष्टं कुद्रा धार्यं तु चंदनाक्ता ब्राह्मणानन्नेन परिविष्य पुण्याहं
स्वस्ति समृद्धिमिति वाचयित्वा स्वयं प्रभुंजानो महांतं पोषं पुष्यति बहुधा॥ पुत्रान्नवं
तिनैव बालाः प्रमीयंते न ग्रहा व्याधमो गृहस्थं तिनं दंष्ट्रिणो पयाते ये भुंजंति स्क
रसर्पराक्षसपिशाचाबाधंते यदि शांतं प्रतेष्वेस्तु वा मध्ये आहुति सहस्र
न्तु कुर्यान्नवा शांतिरिस्याच्छक्षतेऽपि पक्वं तु भ्यदां चैतदेकाख्यातं वास्तोदक्षिणेस्या
द्वौधायनः॥ ॥अथ ऋतुरजोदर्शनशांतिः॥ ॥तत्र फलमाह मदनरत्ने नार

शां. र. दः ॥ अमाविष्काष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि ॥ परिघस्य तु पूर्वार्द्धे व्यतीपाते
च वैधृतौ ॥ संध्यासूपप्लवे विष्ट्यां गंडांते प्रथमार्तवं ॥ उपप्लवो ग्रहणं ॥ रोगी
३१३ पतिव्रताऽसुखी पुत्रिणी भोगभागिनी ॥ पतिव्रता क्लेशभागी स्वैरिणी वारादिषु क्र
मात् ॥ वैधव्यं सुतलाभश्च मैत्र्यं शत्रुविनाशनं ॥ मित्रलाभः शत्रुहानिः कुलम
तिर्वपुर्नाशनं ॥ मरणं वंशवृद्धिश्च निराहारः कुलक्षयः ॥ तेजश्च सुतनाशश्च
कुलहानिः स्तिथ्यादिक्रमात् ॥ गर्गः सुभगा चैव शीलाढ्या पुत्रसमन्विता ॥
धर्मयुक्ता व्रतपरा च पस्संतानमोदिनी ॥ सुपुत्रा च बहुः पुत्रा पितृवेश्मर राम
ता सदा ॥ दीना प्रजापती चैव सुपुत्रा चित्रकारिणी ॥ साध्वी पतिप्रीणनित्य ३१३
सुपुत्रा कष्टचारिणी ॥ स्वकर्मनिरता हिंस्रा पुण्यपुत्रादिसंयुता ॥ निःस्वधनव

५२

यासक्ता पुत्रधान्यसमन्विता ॥ मूर्खा वा नाथ पुण्यवती दस्रर्क्षादिक्रमात् ॥ त्फलं ॥
नारदः कुलीरवृषचापांत्यमृगकन्या तुलाप्यदं ॥ राशयः शुभदा ज्ञेया नारीणां
प्रथमार्तवे ॥ गर्गः सुभगा श्वेतवस्त्रा स्याद्दृढवस्त्रा पतिव्रता ॥ क्षौमवस्त्रा क्षिती
शा स्यान्नववस्त्रा सुखान्विता ॥ दुर्भगा जीर्णवस्त्रा स्याद्रोगिणी रक्तवाससा ॥ नीलां
बरधरा नारी पुष्पिता विधवा ततः ॥ वस्त्रेष्वविषमा रक्तबिंदवः ॥ पुत्रमार्गुपा
समाश्चेत्कन्यका चेति फलं स्यात्प्रथमार्तवे ॥ अत्र स्त्रीसंगवर्जनमाह वसिष्ठः
: प्रसूतदोषप्रत्यपदि दृश्यते तेन घ्नं तदा शांतिककर्म कार्यं ॥ विवर्जयेद्देवतये
कृत्यां यावद्रजोदर्शनमुत्तमेष्टि ॥ ज्योतिर्निबंधे वसिष्ठः आद्यत्रयोपि बस्तु
केर्जमधुस्य चिंतनस्याश्च पुरुपापवारारिक्ताप्तपर्वाष्टिषष्ठ्यपितृपरसदने रा

शां·र· त्रिसंध्याघराह्णे ॥ मिश्रोयंमूलतीक्ष्णंवि — — — वरुणास्याधिकास्वंवराषुत्रोस्या
तः पापस्यफलत्वेन सदृशं जरन्त्री त्वरक्तो बस्वआयत्ते ऽभिगनारी विषकुन्नेवेदृ
३१४ जस्वली ॥ वंध्याश्चैवातिगंडे च शूले शूलवती भवेत् ॥ गंडे तु पुंश्चली नारी विष्कुं
भ्याघाते वात्मघातिनी ॥ वज्रे च वैरिणी प्रोक्ता पाते च पतिघातिनी ॥ परीघे
त वंध्या च वैधृतौ पतिमारिणी ॥ शेषाः शुभावहा योगा यथानाम फलप्रदाः ॥
वसिष्ठः ॥ कृत्स्नतदोषे यदि दृश्यते तु रजस्वला शांतिककर्मकार्यं ॥ विकर्णयेद्दे
वतदेकशाम्यां यावज्जोदर्शनमुत्तकि ॥ शांतौ कृता पापमीस्पर्शः ॥ शांतिमाह
प्रयोगपारिजाते शौनकः ॥ मन्त्रविधानं तु नारीणां शांतिं वक्ष्यामि शौनकः ॥ पं राम
चमेह्निचतुर्थे वा ग्रहातिथ्यपुरःसरं ॥ द्रोणप्रमाणधान्येन व्रीहिराशित्रयं न्य ३१४

५४

वेतः कुंभत्रयं न्यसेत्प्राशौ तंतुवस्त्रादिवेष्टितं ॥ पूजयेत्तीर्थसलिलैः प्रतिकुंभं प्र
थकृ २ ॥ स्रक्तेनायनवर्चेन प्रस्तुवआपस्त्रियः ॥ स्चायाः प्रवतस्तक्रायश्चा
च ततः क्रमात् ॥ मध्यकुंभे क्षिपेद्वाम्समौषधानि च होमच ॥ उदुंबरः कुशाग्
र्वा रजीववरविल्का ॥ विष्णुक्रांता मत्तजसी बर्हिबर्हांरवपुष्पिका ॥ शताव
र्य्यश्वगंधा च निर्गुंडी सर्षपद्वयं ॥ अपामार्गपलाशाश्च पनसो जीवकस्तथा ॥ प्रि
यंगवश्च गोधूमा व्रीहयो मुस्तुरस्तथा ॥ क्षीरं दधि च सर्पिश्च पद्मपत्रं तयोस्तनंः
कटकत्रयमुंजाच्चक्वाभक्कत्तुस्तका ॥ धात्रीत्वादौषधानीह यथासंभवमाह
रेत् ॥ मृत्तिकाश्चौषधादीनि तन्मंत्रेण क्षिपेत्क्रमात् ॥ कुंभोपरि न्यसेत्पात्रं कां
स्यमृद्वेणुतापजं ॥ भुवनेश्वरीं न्यसेत्तत्र रमणीं च पुरंदरं ॥ आचार्यः पूजयेद्दा

शां. र. स्योगायश्चामंत्रसारथाः ॥ इंद्राणीं चैव पूजयेद्देवीमिंद्राणीमासुनारिषु ॥ इंद्रत्वावृ
षभंविंद्रस्तु पञ्चभिः प्रपूजयेत् ॥ तन्मध्ये संस्थं कलशं मंत्रेण त्र्यंबकेश्वरा ॥ जपो
३१५ त्गायत्रीमंत्रे होमाद्यु सूक्तं च जपेत्ततः स्थाने दक्षिणं कलशं मृत्विगेको जपेद्बुधः ॥
चत्वारि रुद्रसूक्तानि चतुर्मंत्रोत्तराणि च ॥ संस्थाप्य चोत्तरं कलशं तथा रुद्रं रुद्रसंख्यया
॥ शांत्यर्थं द्राग्निसूक्तं च तत्रैव संस्थाप्य जपेत् ॥ कलशस्य पश्चिमे देशे शांतिहोमं
समाचरेत् ॥ दूर्वाभिस्तिलगोधूमैः पायसेन घृतेन च ॥ तिलमिश्रैश्च दूर्वाभिरे
वैकस्याहुतिर्भवेत् ॥ अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ॥ गायत्र्यैव राम
तु होतव्यं हविरत्र चतुष्टयं ॥ ततः स्विष्टकृतं कृत्वा मसुद्राहुर्मिसूक्ततः ॥ संत
तामाज्यधारां तां पूर्णाहुतिमथाचरेत् ॥ अथाभिषेकं कुर्वीत प्रतिकलशस्थितो ३१५

५५

दकैः ॥ आपो हि ष्ठेति तिसृभिः सूक्तेन च ततः परं ॥ इंद्रोअंगऋचेनैव पावमानैः ॥
क्रमेण तु ॥ उग्रयं श्रण्वद्धनस्त्वस्मिंद्राविराणकया ॥ त्र्यंबकेन मंत्रेण जातवे
दसैकया ॥ समुद्रज्येष्ठा इत्यादित्रायंत्रा च त्रिभिः क्रमात् ॥ आपदृचे नै
वदेवस्य त्वेति मंत्रतः ॥ मंत्रेणाद्यत्मीशानं त्वमग्ने रुद्र इत्यथा ॥ तमुष्टुहीति मं
त्रेण भुवनस्य पितरं तथा ॥ या ते रुद्रेति मंत्रेण शिवसंकल्पमंत्रतः ॥ इंद्रत्वावृ
षभं पंचमंत्रैश्च वाभिषेचयेत् ॥ धेनुं पयस्विनीं दद्याद्वाचार्याय च भूषणैः ॥ स
दक्षिणमनड्वाहं प्रदद्याद्रुद्रजापिने ॥ महाशांतिप्रजप्याय ब्राह्मणान्भोजये
त्ततः ॥ मदनरत्ने ऋषिपुत्रसंहितायां ॥ तत्रैवोक्तं ॥ प्रायमाणेंद्रदोषाणां शांति
कुर्यादनंतरं ॥ तिथिनक्षत्रवारादिदेवानां पूजनं पृथक् ॥ स्थंडिलं कारयेत्तत्र चतु

शां०र० राटकत्रयाणिभिः ।। आटकं तंडुलाश्चैव आटकौ तिलयावकौ ।। आटकस्तु पलै
श्चतुर्दशः प्रस्थ आढको द्रोणश्चैव च ।। धान्यमानेषु बोद्धव्याः क्रमशोमी चतुर्गुणा
३१६ स्तुकः ।। उपर्युपरि संस्तीर्णं तन्मध्ये नलिनं लिखेत् ।। दर्भैराच्छाद्य तन्मध्ये कर्णि
कायां न्यसेद्घटं ।। पुण्योदकेन संपूर्णमोषध्यादिसमन्वितं ।। सहदेव्यौ कूपत्रा
च विष्णुक्रांता समज्जिका ।। बिल्वपत्रं सहैतानि चूर्णयित्वा न्यसेद्घटे ।। कुष्टं मां
सी हरिद्रे द्वे मुरा शैलेय चंदनं ।। वचाचंपकमुस्ताश्च सर्वौषध्यो दश स्मृताः ।। ग
जाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् ।। राजद्वारप्रदेशाच्च मृदमानीय नि राम
क्षिपेत् ।। पंचगव्यं च कलशे तथा शुक्लफलानि च ।। बध्वैष्ट्यमाणिकानि क्र ३१६
मान्निविनिक्षिपेत् ।। एवं कुंभं समासाद्य सर्वैर्धान्यादिभिः शुभैः ।। सावित्र्याचज

येत्कुंभं स्त्रंशतं शतं द्विजः ।। एवं प्रदोषकाले तु तोयैस्तां स्नापयेत्ततः ।। अष्टोत्तरस
हस्रं वा शतमष्टाधिकं तथा ।। स्वगृह्योक्तविधानेन होमं कुर्यात्प्रयत्नतः ।। दूर्वा
ज्येन तिलैर्जुह्वन् सावित्र्या चैवमंत्रितः ।। अष्टोत्तरसहस्रं वा शतमष्टाधिकं त
था ।। तत्संख्यया त्रिधा हुत्वा दूर्वाज्येन तिलैः सह ।। ब्राह्मणान्भोजयित्वा तु दे
वं संपूजयेत्ततः ।। एवं समासतः प्रोक्तं नारीणां प्रथमार्तवे ति ।। तत्रैव नारदः
तत्र शांतिं प्रकुर्वीत घृतदूर्वातिलाक्षतैः ।। प्रत्येकाष्टशतं चैव गायत्र्या जुहु
यात्ततः ।। स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये ।। शिष्टैः प्रयोगपारिजा
ताद्येष्वत्रोक्तं न कोक्तं वा दत्तुः ।। तत्रास्मत्पितृकृतः प्रयोगो लिख्यते ।। ।। कत्रामि
मपत्न्याः प्रथमरजोदर्शनजनितमासादिसूचितसर्वारिष्टशांत्यर्थं सग्रहमखं

शां॰ र॰ रजोदर्शनशांतिकरिष्ये इति संकल्प्य ॥ गणेशपूजापुण्याहवाचनमातृपूजां नांदी
३१७ श्राद्धानि कृत्वाचार्यमृत्विजश्च वृणुयात् ॥ आचार्य ऐशान्ये मध्ये दक्षिणोत्तरयोश्च
महाद्यौरिति भूमिं स्पृष्ट्वा ओषधयः समिति द्रोणप्रमाणव्रीहिराशित्रये आक
लशेषु इति कुंभत्रये मंत्रावृत्त्या संस्थाप्य प्रसुव आप इति नकानां त्रियममेधानधी
जगती ॥ याः प्रवतो वसिष्ठोनघोराकरी ॥ आप्यांजलेना भूर्यगंधद्वारामिति
गंधं या ओषधीरिति सर्वौषधीः ओषधयः समिति यवांश्च त्रिषु क्षिप्त्वा मध्य
कुंभे यवव्रीहितिलमाषकंगुश्यामाकमुद्गान् क्षिप्त्वा सामश्रोउंबरकुश राम
दूर्वारक्तोत्पलचंपकबिल्वविष्णुक्रांतातुलसीबर्हिषत्रं रक्तपुष्पाणि शता ३१७
वर्यश्च गंधान् निर्गुंडी रक्तपीतसर्षपापामार्गपलाशजनसर्वं धूकप्रियंगुगो

४७

MEMORIAL

धूमब्राह्यच्छदधि उग्यधृतसपत्रनीलोत्पलसितरक्तपीतकुरंदकपुंजावचाभद्र
कमुस्तारव्यानि द्रवाणि त्रिंशद्यथासंभवं वा क्षिपेत् ॥ ततस्त्रिषु कोउत्कांडादिति हू
र्वा ॥ अश्वत्थेव इति पंचपल्लवान् अस्योनेति सप्तमृदः याः फलिनीरिति फलं सहि
रत्नानीति पंचरत्नानि हिरण्यरूप इति हिरण्यं क्षिप्त्वा युवा सुवासा इति वस्त्रे
णावेष्ट्य पूर्णादर्वीति पवादि पूर्णपूर्णपात्राणि निधाय तत्राष्टदलानि कृत्वा मध्ये
गायत्र्या भुवनेश्वरीमावाह्य दक्षिणकुंभे इंद्राणीं वृषाकपि रिंद्राणी षष्ठि ॥ इंद्री
द्राणीं उत्तरकुंभे इंद्रत्वा विश्वामित्र इंद्रो गायत्री मिंद्र सहस्रमहत्स्र ते वाज
येत् ॥ ततो हिरण्यवर्णामिति ऋ इति इमावाह्य तन्मंत्रैः षोडशोपचारैः
पूजयेत् ॥ ततो मध्यकुंभस्थ ह्रुं गायत्री + पंचदशानां कर्दमानंदचिक्लीतेंदि

शां.र. रासुता ऋषयः श्रीर्देवता तिस्रोनुष्टुभ एका प्रस्तारपंक्तिर्द्वे त्रिष्टुभावष्टावनुष्टुभो
न्त्या प्रस्तारपङ्क्तिः जपे वि० ॥ एकरुद्र दक्षिणकं मेकद्रुद्रायेति नवानां घोरः कण्वो
३२८ रुद्रो गायत्री इमा रुद्रायेत नवस्य स्येकादशानां कुत्सो रुद्रो जगत्यौ द्वे त्रिष्टुभौ ॥
आ ते पितरिति पंचदशानां गृत्समदो रुद्रस्त्रिष्टुप् इमा रुद्राय स्थिरधन्वन इति
चतुर्णां रुद्रस्त्रिष्टुप् ॥ आवो राजानं वामदेवो रुद्रस्त्रिष्टुप् शतमुष्ट हिनो मे त्रिष्टु
प्त्राः भुवनस्य पितरं कजिश्वा रुद्रस्त्रिष्टुप् ॥ त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप् ॥ अ
याम्याः उत्तरेकं ने रुद्रे काद्शिनीं जपेत् ॥ ततः शं न इन्द्राग्नी इति पंचदशानां व
सिष्ठो विश्वेदेवास्त्रिष्टुप् इति जपेत् ॥ अथाग्निं प्रतिष्ठाप्य ईशान्यां ग्रहान् रुद्रो राम
मास्कंद विघ्नं ब्रह्मेंद्र यम काल चित्रगुप्तान् रुद्राधिदेवान् अग्निमापन्नास्मि विष्णुं इन्द्राणि ३२८

५८

प्रजापति सर्प ब्रह्मणः प्रत्यधिदेवान् विनायकादीन् पंच लोकपालांश्च वाद्यस
घूज्येयशान्यां कुंभे वरुणं संपूज्या वाद्य्यात् ॥ चरूष्मं तेन चग्रहान् प्रत्येकमष्ठ
कसंख्याभिः समिच्चर्व्याज्याहुतिभिः समिद्भिलाज्यैर्वाधिदेवादीनेकैकयाज्या
हुत्या भुवनेश्वरीं प्रत्येकं त्वाञ्तिलमिश्रगोधूमपायसाज्यानामष्टशताष्टाविंश
त्यन्यतराहुतिभिरिंद्राणीमिंद्रं च प्रत्येकमुक्तद्रव्यैरष्टाविंशत्यष्टान्यतराहु
तिभिः श्रीबेण स्विष्टकृतमित्यादि उक्तदेवेभ्यो मुष्मै मुष्मै वेमनसा त्यागः इति
रूप्यक्षीरे चरुं कृत्वा यजमानेन त्यागे कृते उक्तसंख्या पाहोमांत
त्रतिस्त्रमिद्द्वा भिदधिमध्वाज्याक्ताः निरेकाहुतिः ॥ एवं समिधोक्ताः ततः स्विष्ट
कृदादि प्रायश्चित्त होमांते दिक्पालेभ्यो नवग्रहेभ्यो भुवनेश्वरीन्द्राणीन्द्रेभ्यश्च सदी

शां॰र॰ यमाषभक्रबलीन्द्वा समुद्राद्रूर्मिरितित्र्चस्य वामदेवोग्निस्त्रिष्टुप् इति पूर्णाहु
तिं हुत्वा प्रणीताविमोकादि शेषं समाप्याथ यजमानमभिषिंचेत्॥ आपोहिष्ठेति
३१९ नवभिः॥ यत्किंचेदिदयं तेगोतम इंद्रस्त्रिष्टुप्॥ त्रिणि हृदं देवेति समुद्रानां वसिष्ठस्त्र
याणांमग्निस्ततो विश्वेदेवा आद्या गायत्री ततोनुष्टुप् इति स्त्रोमा यज्ञांत्येनुष्टुभोत
भयं भृणवद्येनेति भर्गइंद्रो बृहती स्वस्तिदा विशोयमइंद्रोनुष्टुप्॥ त्र्यंबकंजा
तवेदसे कश्यपो दुर्गा त्रिष्टुप्॥ समुद्रज्येष्ठाश्चतुर्णां वसिष्ठ आपस्त्रिष्टुप्॥
त्र्यंबकंजातवेदसे कश्यपो दुर्गा त्रिष्टुप्॥ समुद्रज्येष्ठाश्चतुर्णां वसिष्ठ आप राम
स्त्रिष्टुप्॥ त्वायं तां इमा आप इति चतसृणां सप्तर्षयः॥ आपोनुष्टुप्॥ देवस्य ३१९
त्वेषांपस्तं बभ्रायेति भिः॥ तमीशानं गोतम इंद्रो जगती त्वमग्ने रुद्रानुष्टु

५९

हो सोंगिरस स्तिरश्ची रुद्रस्त्रिष्टुप्॥ भुवनस्य पितरं त्र्यंबकं॥ यातेरुद्र कश्यप
पो रुद्र स्वराडनुष्टुप् प्रयत्नाम्यतइति षण्णांप्रजापतिर्मनस्त्रिष्टुप्॥ इंद्र त्वा वृषभं
पंचानांविश्वामित्र इंद्रो गायत्री॥ ततः सुरास्त्वेत्यादिभिरभिषिक्तोग्निं संपूज्याचा
र्याय धेनुं रुद्रजापिने शताहं सदक्षिणामन्येभ्यश्च ब्राह्मणेभ्यो दत्वा देवानामुत्तरपू
जां कृत्वा विसृज्याचार्यहस्ते दत्वाग्निं संपूज्य गच्छ गच्छेति विसृज्य महाशांतिं पठित्वा
विप्रान्संभोज्य भुंजीत॥ ॥इति कमलाकरभट्टकृते शांतिरत्नाकरे रजो
दर्शनशांतिः॥ ॥अथ सर्पबलिः॥ अथ वक्ष्यामि सर्पस्य संस्कारविधिमु
त्तमं॥ सिनीवाल्यां पौर्णमास्यां पंचम्यां वापि कारयेत्॥ कृतसर्पवधो विप्र
ः पूर्वजन्मनि वा यदि॥ वधं प्रख्यापयेत्स्यापी चरेत्कृच्छ्रं चतुर्दश॥ विप्रायशो

हेदंडंचतन्मूल्यंवापिदापयेत्॥याज्ञवल्क्योप्याह॥उरगेघायसौदंडइतिमूल्य
माहगतिष्कत्रयंनिष्कंवानिष्कमेकंकनीयसां॥अनुमत्यादिकर्तृणांनिष्क
मर्धतदर्धकं॥इदंस्वर्णरूप्ययोःताम्रमात्रेयनथाप्रियंगुव्रीहिगोधूमतिलपि
ष्टेनवापुनः॥कृत्वासर्पाकृतिंशूर्पेनिधायप्रार्थयेद्द्विजं॥द्विजपूर्वमनःस
र्पेअस्मिंश्छिद्रेसमाविशसंस्कारार्थमहंभक्त्याप्रार्थयामिसमासतः॥ व
स्त्रोपवीतगंधाद्यैःसंपूज्यचहरेद्बहिः॥कुर्यात्संस्कारसंकल्पंप्राणायाम
पुरःसरं॥यज्ञोपवीतिनाकार्यसंस्कारकर्मतु॥यौकिकाग्निंप्रतिष्ठाप्य
समिदाधानमाचरेत्॥ततोग्नेरद्विगभागेभूमिंसंप्रोक्ष्यवारिभिः॥चितिंकृ
त्वाथसंस्तीर्यकत्रैराग्नेयकाष्ठकैः॥पर्युक्ष्याग्निंपरिस्तीर्यपरिषिंच्यसम

र्चयेत्॥कृत्वेध्माधानमाघारौचक्रूवावपयाविधि॥सर्पंगृहीत्वायत्नेनचि
तिमारोपयेत्सुधीः॥स्रुवेणजुहुयादाज्यमग्नौव्याहृतिभिस्त्रिभिः॥सर्पास्ये
जुहुयादाज्यंव्याहृत्याचसमंत्रयाः॥आज्यमग्नौचस्रुवेणैवसार्द्धदिष्टेनिक्षेपयेत्
चमसस्थैर्जलैःसर्पव्याहृत्याभ्युक्ष्यपाणिना॥आग्नेरक्षाणइत्यनयासर्पायाग्निं
प्रदापयेत्॥अग्नेरक्षाणाःअंहसःप्रतिष्मदेववर्षतः॥तपिष्ठेरजरोदह
॥इत्यर्चेन॥उपतिष्ठेद्दह्यमानंनमोस्तुसर्पमंत्रतः॥तानतोतानतोवापिकृतः
सर्पवधोमया॥पूर्वजन्मनिवासर्पतत्सर्वंक्षंतुमर्हसि॥क्षीरप्रस्येनततस्ता
ग्निंप्रोक्ष्यव्याहृतिभिर्जलैः॥नास्थिसंचयनंकुर्यात्स्नात्वाचम्यगृहंव्रजेत्॥
ब्रह्मचर्यादिकंकार्यंत्रिरात्रंशौचमिष्यते॥सचैलंतुचतुर्थेह्निस्नात्वाग्निमान्

शां॰र॰ समर्चयेत्॥ सर्पोनंतस्तथा शेषः कपिलो नागएव च॥ कालिकः शंख
पालश्च श्रीधरश्चेति वामतः॥ गंधपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद्द्विजान्
३२१ घृतपायसभक्ष्यैश्च द्विजान्भक्त्या तु भोजयेत्॥ एवंकृते विधाने न सर्पसंस्का
रकर्मणि॥ सर्पहिंसाकृतात्पापान्मुच्यते नात्र संशयः॥ ॥इति नागबलिः
॥ ॥अथ कन्याया वैधव्ययोगे शांतिः॥ मार्कंडेयः॥ बालवैधव्ययोगे तु
कुंभद्रुप्रतिमादिभिः॥ कृत्वा लग्नं ततः पश्चात्कन्योद्वाह्येति चापरे॥ तत्रपु
नर्भूत्वाभावउक्तो न्यायवरखंडे॥ स्वर्णे वा पिप्पलानां च प्रतिमा विष्णुरूपिणी॥ राम
तया सह विवाहे तु पुनर्भूत्वं न जायते॥ सत्यारुण्यसंवादे विवाहात्पूर्वका
ले तु वेदतरावजान्विते॥ विवाहोक्तेवमंधम्मा कुंभेन सह चोद्वहेत्॥ स्व ३२१

६१

त्रेण वेष्टयेत्पश्चाद्दशतंतुविधानतः॥ कुंकुमालंकृतं देहं तयोरेकांतमंदिरे॥
ततः कुंभप्रार्थना तत्रैव॥ वरुणांगस्वरूपाय वतिःसार्यप्रभज्यसलिलाश्रये:
ततोभिषेचनं कुर्यात्सिंचपल्लववारिभिः॥ कुंभप्रार्थना तत्रैव॥ वरुणांगस्व
रूपाय जीवनानां समाश्रय॥ पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु॥
देहि विष्णो वरं देव कन्यां पालय दुःखतः॥ ततोलंकारवस्त्राद्यैर्वरायप्रतिपा
दयेत्॥ मूर्तिर्दानमपि तत्रैवोक्तं॥ ब्राह्मणं साधु धर्मज्ञं संपूज्य विधिवद्धितो
तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं नकुर्जनो॥ शुद्धवर्णसुवर्णेन वित्तशक्त्याथ
वा पुनः॥ निर्मितां रुचिरां चक्रं खगदाब्जकभसंयुतां॥ दधानां वाससी पीते कु
मुदे स्ववमालिनीं॥ सदक्षिणां च तां दद्यान्मंत्रमेनमुदीरयेत्॥ यन्मया प्रावि

शां॰र॰ जन्तुविघ्नस्यापतिसमागमं॥ वियोगविषशाम्यावैरंतोवा विविरक्तयाः॥ प्रा
३२२ प्यमानं महाघोरं यत्राः सौख्यधनायहांवैधव्याघतिदुःखौघनाशायसुख
लब्धये॥ बहुसौभाग्यलब्धेवमहाविष्णोरिमांतनुं॥ सौवर्णीनिर्मितांशक्त्या
तुभ्यसंप्रददे द्विजः॥ अनघाद्याहमस्मीति त्रिवारं प्रजपेदिति॥ एवमस्त्वि
तितस्मोक्तं गृही वा स्वगृहे विशेत्॥ ततो वैवाहिकं कुर्यात् विधिं दत्वा मृगीदृ
शः इत्यादि निर्णयसिंधौ ज्ञेयं॥ ॥इति वैधव्ययोगे शांतिः॥ ॥अथ तृतीयमा
नुषीविवाहनिषेधात्तद्दर्थमर्कविवाह उच्यते॥ प्रयोगपारिजाते मात्स्ये॥
उद्वहेत्तृतीयां सिध्यर्थं तृतीयां न कदाचन॥ मोहादज्ञानतो वापि यदि गच्छेत्तु मा राम
नुषीं॥ नश्यत्येव न संदेहो गर्गस्य वचनं यथा॥ संग्रहे च तुर्यादिवाहार्थं तृतीये ३२२

६२

र्कं समुद्वहेत्॥ आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे॥ शुभे दिने वा पूर्वाह्णे कु
र्यादर्कविवाहकं॥ ग्रामाद्ग्रामात्प्राच्यामुदीच्यां वा सपुष्पफलसंयुते॥ कृत्वा
र्कं पुरतः शिष्टान् प्रार्थयेत द्विजोत्तमः॥ त्रिलोकवासिन् सप्ताश्व छायया सहितो रवे
तृतीयोद्वाहजं दोषं निवारय सुखं कुरु॥ ततोध्यारोप्य देवेशं॥ छायया सहितं र
विं॥ वस्त्रोर्माल्यैश्च गंधैश्च तन्मंत्रेणैव पूजयेत्॥ चतुर्थे दिवसे तीते पूर्ववत्संप्रपू
ज्यच॥ विसृज्य पश्चात् मम च उद्वहेन्मानुषीं परां॥ व्यासः सपुष्पफलशाखैक
मर्कगुल्मं समाश्रयेत्॥ अर्ककन्याप्रदानार्थमाचार्यं कल्पयेत्सुराः॥ अर्क
सन्निधिमागम्य नात्वा स्वस्त्यादिवाचयेत्॥ नांदीश्राद्धं हिरण्येन अष्टवर्गांश्च पूज
येत्॥ पूजयेन्मधुपर्केण वरं विप्रसहस्तः॥ यज्ञोपवीतं वस्त्रादि वरायास्मै प्र

शो॰र॰ दापयेत्॥ अर्कं प्रदक्षिणं कुर्वन् जपेन्मंत्रमिमं बुधः॥ मम प्रीतिकरो येयं मया
सृष्टः पुरातनी॥ अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु॥ पुनः प्रदक्षिणीकु
३२३ र्यान्मंत्रेणानेन मंत्रवित्॥ नमस्ते मंगले देवि नमः सवितुरात्मजे॥ त्राहि मां
कृपया देवि पत्नीत्वं मां समागता॥ अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च
वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः॥ तृतीयोद्वाहजं पापं मृत्युं चाशु वि
नाशय ततस्तत्कन्यावारणं त्रिपुरुषमुच्चरेत्॥ आदित्यः सविता सूर्यः पुत्री
पौत्रश्च नप्तृकाः॥ गोत्रं काश्यपं ततस्तु क्रमलोके लौकिकमाचरेत्॥ सुसूत्रेकं
निरीक्षेत स्वस्तिसूक्तमुदीरयन्॥ अथाचार्यसमायुक्तविधिना तन्मुखाह्वतं राम
प्रतिष्ठाप्य ततो होमं गृह्योक्तविधिनाचरेत्॥ अर्ककन्यामिमां विप्र यथाशक्ति ३२३

विभूषितां॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय॥ अंजल्यक्षतकर्माणि कृ
त्वा कंकणपूर्वकं॥ यावत्पंचावृतं सूत्रं तावदर्कं प्रवेष्टयेत्॥ स्वगृह्योक्तेन मं
त्रेण गायत्र्या चाथवा जपेत्॥ पंचावृतं पुनः सूत्रं स्कंधे बध्नाति मंत्रतः॥ बृह
त्साम इति मंत्रेण सूत्रवृक्षं प्रकल्पयेत्॥ अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरतस्
तथा॥ कुंभांश्च निक्षिपेत्पश्चादाग्नेयादि चतुष्टये॥ प्रतिकुंभे नमो विष्णुं सप्
रमपरमेश्वरं पुनः प्रदक्षिणं कृत्वा मंत्रमेतमुदीरयेत्॥ मया कृतमिदं कर्म स्था
वरेषु जरायुजा॥ अर्का पत्यानि नो देहि तत्सर्वं क्षंतुमर्हसि॥ दस्तुस्वाशांतिस्त्र
क्रान्निजस्वातं विसृजेत्तु नः॥ गोयुग्मं दक्षिणां दद्यात् तेपुण्यसमाचमाचरेत्
त्रोतनकः॥ तृतीये स्त्रीविवाहे तु संप्राप्ते पुरुषस्य तु॥ आर्कविवाहं वक्ष्यामि

शां॰ र॰ शौनकोक्तविधानतः ॥ अर्कसंनिधिमागत्य तत्र स्वस्त्यादि वाचयेत् ॥ नांदीश्रा
३२४ द्धं प्रकुर्वीत स्थंडिलं च प्रकल्पयेत् ॥ अर्कमभ्यर्च्य सौर्यं च गंधपुष्पाक्षतादिभिः
अर्कस्य सोत्तरे देशे समन्वारब्ध एतया ॥ उल्लेखनादिकं कुर्यात्तदाघारांत
मतः परं ॥ आज्याहुतिं च जुहुयात्संगोभिरिंनयेकमायस्मै त्वा काममकामाये
त्येतयर्चा ततः परं ॥ व्यस्ताभिश्च समस्ताभिस्तिसृभिश्च स्विष्टकृद्भवेत् ॥ परिषेचन
पर्यंतमथाग्नेस्त्यादिकं क्रमात् ॥ अत्र प्रयोगो मत्कृते निर्णयसिंधौ ज्ञेयः ॥ ॥
इति कमलाकरभट्टकृते शांतिरत्नेऽर्कविवाहः ॥ ॥ अथास्मत्पितृकृतो राम
रुद्रस्नानप्रयोगो लिख्यते ॥ ॥ अथ विरुद्धचटीयोगसंहारेण रुद्रकलश
स्नानविधिः ॥ उदगयनादौ गुरुशुक्रास्तादिरहिते शुभे मासि शुक्लपक्षे क्ष ३२४

६४

तो विशेषेण चतुर्थ्यष्टम्यां चतुर्दश्यां वा रविवासरे ॥ वा शुभनक्षत्रे चंद्रता
राद्यनुकूल्येन तत्कल्येन कर्तव्यं ॥ इदं च चतुर्विधवंध्यात्वे विशेषतो मृताप
त्यत्वे भवति ॥ एतन्महानद्योर्नद्योर्वा शुभ्यसंगमे संगममात्रे वा कार्यं इदं चो
दगयनासंभवे सर्वमासेषु दक्षिणायनेऽपि कार्यं ॥ सर्वेष्वपि हि मासेषु ब्राह्म
णानुमते शुभे ॥ तस्माद्बहुरूपकर्तव्यं पुत्रं स्त्रीसुखसृद्धतिः ॥ हेमाद्रौ भविष्यो
त्तरोक्तेः ॥ तत्र सर्वकन्यासिन्नार्यादिर्घायुः सुपुत्रायुत्पत्ति प्रतिबंधकदुरित
निरासार्थं यथाशक्ति प्रायश्चित्तमनुतापपूर्वकं कुर्यात् ॥ तच्च फलतारतम्या
वगतदुरिततारतम्येन षडब्द त्र्यब्दसार्धाब्दरूपं चांद्रायणकृच्छ्रातिकृच्छ्ररूपा
वा द्रव्यहोमतीर्थब्राह्मणभोजनादि प्रत्याम्नायैः कार्यं सयोग्यदिष्टैः ॥ ततः

शां. र. श्रीरुद्रप्रीत्यर्थं कृष्णामेकां धेनुं शक्तोपस्करयुतां दद्यात्॥ तत्राशक्तो लक्ष
३२५ तदर्धमितं अयुतमितं वा गायत्रीजपं तद्दशांशेन तिलहोमं च कुर्यात्॥ एवं
कृते रुद्रस्नानेऽधिकारो भवति॥ ततः प्रागुक्तकाले देशे च कर्ता सभार्यः
कृतस्नानः शुद्धः शुद्धे वाससी परिधाय आसनोपविष्ट आचांतः भूमिशुद्धि
तर्वकं प्राणानायम्य देशकालौ स्मृत्वा मम सभार्यस्य दीर्घायुः सपुत्रादिसंतति
प्रतिबंधके न त्वा ग्रहद्वेषेण वा गुरुद्वेषेण वा मृगशावभक्षणेन वा बालघातेन
वा रक्षापहरणेन वा वत्सवियोगेन वा पितृद्वेषेण वा अन्येषां कर्मणो सत्र
चतुर्विधवंध्यात्व तत्खंध्यात्वदोष निरासनद्वारा तथा स्त्रियाः क्षुद्रकेदोष राम
नानानानाम्पऽ ष्टस्त्री चैलोवलस्यसंदोषतदेकासना शानंश्याद्विजनि ३२५

६५

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

तद्दोषादि सर्वसंतति प्रतिबंधकनिरासद्वारा उमासहित श्रीरुद्रप्रीत्यादीर्घा
युष्यसुपुत्रादि संतत्यवाप्त्यर्थं बौधायनोक्तविधिना रुद्रकलशस्नानाख्यं कर्मा
हं करिष्ये इति संकल्प्य गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च
संकल्पपूर्वकं कुर्यात्॥ एतानि कृत्वा वा प्रधानसंकल्पः॥ तत आचार्यब्र
ह्मर्त्विग्वरणं करिष्ये इति संकल्प्य वरणं कर्तुं ब्राह्मणान् प्रार्थयेत्: ब्राह्मणाः
संतु मे शरणं ताः पापात्पांतु समाहिताः॥ वेदानां चैव वक्तारस्त्रातारः सर्वदेहि
नां॥ जपेहोमे स्नायायत्तेदानेश्च विविधेः पुनः॥ देवानां च पितृणां च तृप्त्य
र्थं याजकाः स्मृताः॥ येषां देहे स्थिता वेदाः॥ पावयंति जगत्त्रयं॥ ते मां रक्षंतु
सततं जपयज्ञे व्यवस्थितं॥ तत आदिताग्निं द्विजं शांतं धर्मज्ञं सत्यवादिनं॥

शां०र० स्नानार्घमर्चयित्वा देवं निपुणं रुद्रकर्मणि । तिलक्षणमुत माचार्यं वृणुयात् ॥ ततो ब्र
३२६ ह्माणमृत्विजश्चैकादश वृणुयात् ॥ ततः सर्वान्मधुपर्कवस्त्रालंकारादिभिः
पूजयेद्यथाशक्ति ॥ तत आचार्यादिसहितो मंडपं प्रविशेत् ॥ ततः सर्विगा
चार्यः संकल्प सर्वकं सलक्षणे कृटे वा मंडपे वा ईशान्यां सर्वतो भद्रं लिंगतो
भद्रं महद्दलं वाग्रत्येकं कृत्वा तत्समीपे परितः ॥ सप्तधान्यानि मंगलार्थं निधा
य रक्षोहणमित्याद्यैर्यदत्रे संस्थितं भूतं स्थानमाश्रित्य सर्वदा ॥ स्थानं त्यक्त्वा
तु तत्सर्वं यत्रस्थं तत्र गच्छतु । अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं ॥
सर्वेषामविरोधेन ब्रह्मकर्म समारभे तु ॥ इति च सर्षपान्विकीर्य पंचगव्ये राम
न शुद्धावोहक्षेति ऋचेनाभ्युक्ष्य मंडपपूजां विधायासने उपविश्य तत्र स्थादि ३२६

६६

कमात्मरक्षां च कृत्वा ॥ श्रीरुद्रं ध्यायन्नाराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः ॥ आ
राधयामि भक्त्या त्वां गृहाण महेश्वर इत्यर्चयेत् ॥ ततः प्रत्येकं इंद्रादिः दिक्पा
लान् ॥ प्रणवादि नमोंतं तत्तन्नाममंत्रैर्नत्वा महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयः स
मिति यवान् क्षिप्त्वा आ कलशेषु रोहंति क्षालितान्कलशान्स्वस्थेषु निधाय इमं मे गंगे
इति तीर्थजलेनापूर्य तत्र गंधद्वारामिति गंधं ओषधयः समिति यवान् या ओषधी
इति सर्वौषधीः कांडात्कांडादिति दूर्वाः याः फलिनीरिति फलं स्योना पृथिवीति
सप्तमृदः ॥ अश्वत्थे व इति पंचपल्लवान् सहिरत्नानीति पंचरत्नानि हिरण्यरूप
इति हिरण्यं क्षिप्त्वा युवं वस्त्राणीति वस्त्रेण रक्तसूत्रेण च वेष्टयित्वा पूर्णा दर्वी
इति वंशपात्राणि पूर्णपात्राणि निधाय कलशस्य मुखे विष्णुरित्यादिना कलशेषु

ग्रां.र. देवतीर्थास्यावाह्यः ॥ देवदानवसंवादइत्यादिनाकलशोसंस्थाप्यो त्र्यंबकंमि
तिरुद्रमावाहयेत् ॥ तत्रः समुद्रान्हर्मिरिति समुद्रंकलशजलेनावयित्वाक
३२७ लशास्यमूलेब्रह्मस्थानमिति ब्रह्माणं ॥ मध्येइदं विष्णुरिति विष्णुं नमःस्तो
भवेतिरुद्रं मुखेइंद्राग्नीआगतमितिइंद्राग्नीयमेनदत्तमितियमंचसर्वतश्चत्वे
तिदेवान् ॥ आदित्यत्वास्येतिसूर्यंविश्वतश्चक्षुरितिपरमेष्ठिनंचपार्श्वयोर्न
मोस्तुसर्पेभ्यइतिसर्पान् ॥ पूर्वेअग्निमीळइतिऋग्वेदं दक्षिणइषेत्वेतियजुः
पश्चिमेअग्नआयाहीतिसामवेदं ॥ उत्तरेशन्नोदेवीरित्यथर्वं मध्येतत्सवितुरिति
गायत्रीन्यसेत् ॥ पूर्वाद्यष्टदिक्षुतत्तन्मंत्रैर्नाममात्रैर्वाइंद्रादीनष्टौन्यस्यकांडा
त्कांडादिति दूर्वांशिरसिनिक्षिपेत् ॥ ततोवंशपात्रेअष्टरत्नयुतानिवस्त्राणिसं

राम

३७

६७
८८

Dr. BHAU DAJI
MEMORIAL

संस्थाप्य ॥ तत्रनिष्कतदर्धतदर्धसुवर्णनिर्मितांअशक्तौवस्त्रावरसुवरसुवर्णनि
र्मिताः श्रीरुद्रप्रतिमाअग्न्युत्तारणपंचामृताभिषेकपूर्वकंस्थापितास्त्वावह
वितिमासदितंश्रीरुद्रमावाहयेत् ॥ एवमावाह्यसद्योजातंप्रपद्यामिइत्या
सनं ॥ सद्योजातायवैनमोनमइतिपाद्यं ॥ भवेभवेनातिभवेभवस्वमामित्यर्घ्यं
भवोद्भवायनमइत्याचमनीयं ॥ वामदेवायनमइतिआपोहिष्ठेत्यादिभिःस्ना
नंदत्वाचमनंचदत्वाष्टभिस्तर्पयेत् ॥ भवंदेवंतर्पयामि ॥ शर्वंदेवंतः रुद्रंदेवंतः
पशुपतिंदेवंतः ईशानंदेवंतः भीमंदेवंतः महांतंदेवंत० ॥ ततोज्येष्ठाय
नमइतिवस्त्रं ॥ तूष्णीमाचमनं ॥ श्रेष्ठायनमइत्युपवीतं० रुद्रायनमइत्यलं
कारंकालायनमइतिगंधः ॥ कलविकरणायनमइतिपुष्पंबलविकरणाय

ग्रां॰ र. नमइतिधूपं॥बलायनमइतिदीपं बलप्रमथनायनमइतिनैवेद्यं॥तूष्णीमाचम
३२७ नासर्वभूतदमनायनमइतितांबूलं मनोन्मनायनमइतिदक्षिणांदद्यात्॥केचित्तु
सद्योजातमितिप्रतिष्ठाप्य सद्योजातायेत्यासनं भवेभवेइतिपाद्यं॥भवोद्भवा
येतिस्नानं॥तर्पणमश्विभिर्ज्येष्ठायेत्याचमनः श्रेष्ठायेतिमधुपर्कं॥कालायेतिगं
धं॰ कलविकरणायेतिपुष्पं॰ सर्वभूतेतिधूपं मनोन्मनायेतिदीपं भवोद्भवायेति
नैवेद्यं॰॥अंबकमितिवस्त्रादीनिदद्यादित्याहुः॥अथाष्टौपुष्पांजलीन्दद्यात्॥ राम
भवायदेवायनमः॥शर्वायदेवाय॰ रुद्राय॰ पशुपतये॰ उग्राय॰ ईशानाय॰ भी
माय॰ महतेदेवाय॰ इति॥अथास्योघोरतनूरघोरेभ्यइत्युपतिष्ठेत्॥ततोनमस्का ३२७
रः॥विश्वेश्वरविरूपाक्षविश्वरूपसदाशिवः॥शरणंभवभूतेशकरुणाकरशं

६८

कर॥गौरीहरंशंभोमहादेवविश्वेशामरवल्लभ॥शिवशंकरसर्वात्मन्महादेवाय
तेनमः॥इतिप्रार्थना॥राजसेनस्वयंब्रह्मासात्विके+मानीलकंठनमोस्तुते॥
मृत्युंजयायरुद्रायनीलकंठायशंभवे॥अमृतेशायशर्वायमहादेवायतेन
मः॥इतिप्रार्थना॥राजसेनस्वयंब्रह्मासात्विकेनस्वयंहरिः॥तामसेनस्वयंरुद्र
स्त्रितयंत्वयिसंस्थितं॥नमामित्वांविरूपाक्षनीलग्रीवनमोस्तुते॥त्रिनेत्रायनम
स्तुभ्यमुमादेहार्धधारिणेत्रिशूलखट्वांगभृतेवराभयविधायिने॥सुरेशायनम
स्तोभक्तानामिष्टप्रदायचेतिसंप्रार्थ्यसद्योजातादिमंत्रेणवात्र्यंबकमंत्रेणाघृतंवा
त्राधिकसहस्रमाहुतिंदत्वाग्रहान्संपूज्य॥रुद्रादिदिक्पालान्कलशेषुसंपूज्य
पश्चाद्दंपतीमध्यवेद्यांसंस्थाप्याचार्योब्राह्मणैःसहस्वस्तिवाचनंविधायजीवत्पति

शां.र. पुत्राभिः सुकेशाभिः स्त्रीभिः कृतमंगलं यजमानमभिषिंचेत्॥ पूर्वकलशमादा
यः॥ सहस्राक्षं शतधारमृषिभिः पावनं कृतं॥ तेन त्वाभिषिंचामि पावमान्यः पु
३२९ नंतु त इति अभिषिंचेत्॥ ततो दक्षिणं कलशमादाय॥ भगं ते वरुणो राजा भ
गं सूर्यो बृहस्पतिः॥ भगमिंद्रश्च वायुश्च भगं सप्तर्षयो विदुः इत्यनेन॥ ततः प
श्चिमं कलशमादाय॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि॥ ललाटे
कर्णयोरक्ष्णोरापः तद्घ्नंतु सर्वदा॥ इत्यनेन॥ तत उदीच्यं कलशमादाय
पूर्वोक्तैस्त्रिभिर्मंत्रैरभिषिंच्य बृहत्पराशरोक्तैरभिषिंचेत्॥ पावमानं शत राम
स्रानं सहस्राक्षमृषिस्मृतं॥ तेन त्वा तत्र धारेण पावमान्यः पुनंतु माः॥
शक्रादिदशदिक्पाला ब्रह्मेशाः -- वादय॥ आपस्ते घ्नंतु दौर्भाग्यं शांतिं द ३२९

दतु सर्वदा॥ सुमित्रिया नः ह्लिम्नः संतु गिरयो नद्यो मुनयश्च पतिव्रताः॥
दौर्भाग्यं घ्नंतु ते सर्वे शांतिं यच्छंतु सर्वदा॥ पादगुल्फोरुजंघास्थ नितंबोदरना
भिषु॥ स्तनोरोबाहुसहस्तायग्रीवांसेषु संधिषु॥ नासाललाटकर्णाक्षिके
शांतेषु च यत् स्थितं॥ तदापो घ्नंतु दौर्भाग्यं शांतिं यच्छंतु सर्वदा॥ एवमभिषि
च्य यजमानस्य पश्चात्तिष्ठन् सव्यपाणिगृहीतकुशांतरिते यजमानस्य मूर्ध्नि रु
द्रकलशोदकं॥ औदुंबरेण स्रुवेण जुहुयात्॥ ॐ मिताय स्वाहा॥ ॐ संमिताय॥
ॐ शालाय॥ ॐ कटंकटाय॥ ॐ कूष्मांडाय॥ ॐ राजपुत्राय॥ यजमानस्य सांगं क
यात्॥ इध्माधानादि कृत्वा च वरुणा पूर्वोक्तैः षड्भिर्मंत्रैः चरुं हुत्वा प्रणीताधि
मोकांतं कृत्वा चरुशेषेण ग्रहेरभिषेकशालायां वेद्यादिदिक्षु लोकपालेभ्यो

शां.र. बलिंदद्यात्॥ रुद्रायनमः॥ इंद्राय॰ अग्नये॰ यमाय॰ निर्ऋतये॰ वरुणाय॰ वा
यवे॰ सोमाय॰ ईशानाय॰ ब्रह्मणे॰ अनंताय॥ अथयजमानः स्नात्वाष्ट
३३० क्रमाल्यांबरधरो गुरूणां सहितो शांबशिवायचकृताकृतं तंडुलसुक्तौदन
पायसमान्नंपक्वापक्वमांसत्रिविधसुरालंकापूपपूरिकोंडेरकदध्यन्नपायस
गुडमिश्रपिष्टलड्डुककुल्माषफलानिपूर्वोक्तमंत्राभ्यां सांबशिवायचैनमुप
हारं ददामीति दत्वाशिरसा भूमिंगत्वा सांबशिवायोपतिष्ठेतः॥ रूपंदेहि य
शोदेहि भगंभगवति देहिमे॥ पुत्रान्देहि धनंदेहि सर्वकामांश्च देहिमे इति राम
सांबशिवं संप्रार्थ्य॥ ततः शूर्पे कुशानास्तीर्य पिहारं शवं तत्रनि ३३०
धायचतुष्पथंगत्वा तत्रमंत्रैर्बलिंदद्यात्॥ बलिंगृह्णंत्विमे देवा आ

७०

दित्यावसवस्तथा॥ मरुतोथाश्विनौ रुद्राः सुपर्णाः पन्नगा गृहाः॥ असुरा यातुधाना
श्च पिशाचा मातरो रगाः॥ दिक्पाला लोकपालाश्च येच विघ्नविनायकाः॥ सौ
म्यास्त्वेतु तृप्ताश्च भूतप्रेताः सुखावहाः॥ ततआचम्य गृहंगत्वाचार्याय वस्त्र
द्वयं ऋत्विग्भ्योऽन्येभ्यश्च यथाशक्ति दक्षिणां दत्वा सांबपीठोत्तरपूजां कृत्वा विसृज्या
चार्याय प्रतिपाद्य विभूतिं धृत्वाग्निं विसृज्य ब्राह्मणान् पायसान्नेन भोजयेत्॥
॥ ॥इतिश्रीकमलाकरभट्टकृते चतुर्विधवंध्यत्वदोषशांतिः॥ ॥अथरुद्रविधि
॥तत्रपुरश्चरणं हेमाद्रौ॥ कृच्छ्रमादौ स्वयंचीर्त्वा पाराकं च तथा पुनः॥ स्नात्वा
ईशांसमभ्यर्च्य जित्वासप्तशार्वरीः॥ जपेद्रुद्रांस्तथा जप्त्वा तदंते प्राशयेद्घृतं॥
अपरेहनि संजाते समाप्यैवं व्रतं पुनः॥ भास्कराभिमुखो भूत्वा तद्दिने तान्जपेद्ब

शां.र. ल्लः ॥ मूपश्चाक्षिपरेरुद्रं संपूज्य विधिवत्ततः ॥ घृताक्तैर्बिल्वपत्रैश्च रुद्रहोमं प्र
कल्पयेत् ॥ रुद्रविनियोगस्त्रिधा ॥ जपे होमेभिषेके केचिद्रुद्रजपहोमार्चनवि
३३१ धिव्याख्यास्याम इति महार्णवे बोधायनोक्तेः ॥ किं जाप्येनामृतत्वेनोद्भूलित्रा
तरुद्रियकेणोति तत्रैव जाबालश्रुतेश्च ॥ जपशब्देन केवलो जपो ऽभिमतेइति
केचित् ॥ अन्येतु मात्रे दशांशहोमः स्यागत्वाद्दशांशादिहोमविशिष्टोजपो
विधीयतइत्याहुः ॥ एतेन होमरुद्रेण तर्पणादि अभिषेकरुद्रेव ब्राह्मण
भोजनं सिद्धं ॥ जपादिरुद्रश्चपंचधा रुपं रुद्रो रुद्री महारुद्रो तिरुद्रश्चेति एका राम
दशगुणवृद्धाः ॥ तत्रस्वरूपं नाम नमकचमकस्वरूपं अन्येषां लक्षणमा
हमहार्णवे शातातपः ॥ षडंगैकादशी रुद्रो रुद्रैकादशस्मृतः ॥ ॐस्या ३३१

एकादशाभिरेताभिर्महारुद्रश्च कथ्यते ॥ एकादशमहारुद्रैरतिरुद्रस्तुतीरितः
अस्यार्थः ॥ षडंगन्याससहिता एकादशरूपाणां समाहारः ॥ एकादशी रुद्रइ
त्युच्यते ॥ षडंगेस्तु पलक्षणं ॥ पंचांगरुद्राणामिति बोधायनोक्तेः ॥ तत्पाठे च प्र
कारो बौधायनेनोक्तः ॥ नमस्तेरुद्रमन्यवइत्येकादशानामनुवाकानामेक
मेकं जपेत् ॥ अस्यार्थः ॥ सर्वनमकानुवाकान्पठित्वाद्यं चमकानुवाकं पठे
त् ॥ पुनः सर्वनमकानुवाकान्पठित्वा द्वितीयं चमकानुवाकं पठेत् ॥ पुनः
सर्वनमकानुवाकान्पठित्वा द्वितीयं च एवमेकादशवारमिति ॥ तथा च हेमा
द्रौ कौशिकः ॥ सद्यादिपंचवक्त्रोश्च जमकादि ततो जपेत् ॥ पुनरेतज्जपेत् सर्व
द्वितीयं चमकं तथा ॥ एवमेकादशानुक्रमेण चमकांस्तथा ॥ रुद्रैकादशिनी

ग्रं०र० तेषांसर्वकामफलप्रदाः॥एकादशगुणास्सैकरुद्रस्यसंनिधौगुणंचक्रमेणाव
मकांस्तथा॥रुद्रैकादशिनीतेषांसर्वकामफलप्रदाः॥एकादशगुणासैक
३३२ रुद्रस्यसंनिधीयते॥रुद्रएकादशगुणासैवरुद्रस्यसंनिधीयते॥रुद्रएकाद
शगुणोमहान्संनिधीयते॥महानेकादशगुणास्त्वतिरुद्रश्चोच्यते॥अत्र
चरुक्षभेदास्संताविरोधनदोषाय॥अथरुद्रजपादिविधिः॥हेमाद्रौबोधा
यनः॥ ॥अथातःपंचांगरुद्राणांन्यासपूर्वकंजपहोमार्चनविधिंव्याख्यास्यामः
यातेरुद्रेतिशिखायामस्मिन्महत्यर्णवइतिनेत्रयोर्नमस्तुत्वायेतिकर्णयोर्मा राम
नस्तोकइतिनासिकायामवतत्येतिमुखेनीलग्रीवौधौकंठेनमस्तेअस्त्वायुधे
तिबाह्वोःयातेहेतिरिस्सुपबाह्वोर्यतीर्यानीनितिहस्तयोःसद्योजातमितिपंचानुवाका ३३२

७२

कान्पंचसुअंगुलीषुनमोवःकिरिकेभ्यइतिहृदयेनमोगणेभ्यइतिपृष्ठेनमोहि
रण्यबाहवइतिपार्श्वयोर्विज्जंधनुरितिजठरेहिरण्यगर्भइतिनाभौमीढुष्ट
मइतिकट्यांयेभूतानामधिपतयइतिगुह्ये॥सशिरजातवेदाइत्यपाने
मानोमहांतमितिपूर्वोरूणतइतिजान्वोर्मेस्सृष्टजिदितिजंघयोर्विश्वंभूतमि
तिगुल्फयोर्येपथामितिपादयोरध्ययोचदितिकवचंनमोबिल्मिनइत्युपक
वचंनमोस्तुनीलग्रीवायेतितृतीयनेत्रंप्रमुंचधन्वनेस्यस्त्रंयएतावंतेतिदिग्ब
धः॥ॐनमोभगवतेरुद्रायेतिनमस्कारंन्यसेत्॥ॐकारंमूर्ध्निविन्यस्यसंख
नकारंनासिकाग्रतः॥मोकारंतुललाटेबैनकारंस्तुमुखमध्यतः॥गकारंकं
ठदेशेतुवकारंपादयोर्न्यसेत्॥तिकारंदक्षिणेहस्तेरुकारंवामतोन्यसेत्

शो.र. सद्यंचपादयोर्न्यस्यवामंन्यस्योरुमध्यतः॥ आघोरंरुद्रंविन्यस्यमुखतत्पुरु
षंन्यसेत्॥ ईशानंमूर्ध्निविन्यस्यहंसोनामसदाशिवः॥ हंसोहंसेतियोब्रू
३३३ यात्हंसोनामसदाशिवः॥ एवंन्यासविधिंकृत्वाततःसंपुटमारभेत्॥ श्री
तारमिदंत्वत्रोअग्रेसुगंत्रःपंथासमुत्वंतंताथान्निआनोनिष्पुद्भिर्वयंसोम
तमीशानंनमस्तेरुद्रास्योतापृथिवीस्येतत्संपुटमिंद्रादिदिक्षुविन्यस्यैवा
मेवात्मनिरोद्धीकरणंकृत्वावगस्थितैःपापैःप्रमुच्यतेसर्वभूतेषु
पराजितोभवतियक्षगंधर्वभूतप्रेतपिशाचब्रह्मराक्षसयमदूतशा
किनीडाकिनीसर्पश्वापदतस्करादयुपद्रवाः॥ सर्वेज्वलंतंपत्रपंतुमांर राम
क्षंतु॥ मनोज्योतिरवोध्यामिमूर्धांतमर्माणिजातवेदाःइतिद्वाभ्यामिरुद् ३३३

७३

यत्पुरवशिरस्यस्वतिमंत्रात्मरक्षांकृत्वाशिवसंकल्पंहृदयंपुरुषसूक्तंशि
रस्त्वंरनारायणंशिखाअप्रतिरथंकवचं॥ शतरुद्रियमस्त्रंपंचांगंसकृज्ज
पेत्हृष्टांगंप्रणंम्याहिरण्यगर्भोपिप्रणतोमहाध्यायरूपस्थामथानेनषड्मंय
मायातेत्रेपयावत्खाहेसहैत्रोक्त्वोजपेत्॥ अथात्मानंरुद्ररूपंध्यायेत्शुद्धस्फु
टिकसंकाशंत्रिनेत्रंपंचवक्त्रकं॥ गंगाधरंदशभुजंसर्वाभरणभूषितं॥
नीलग्रीवंशशांकांकंनागयज्ञोपवीतिनं॥ व्याघ्रचर्मोत्तरीयंचवरेण्यम
भयप्रदं॥ कमंडल्वक्षसूत्राभ्यांमन्वितंशूलपाणिनं॥ ज्वलंतंपिंगलजटा
शिखमुद्योतकारिणं॥ अमृतेनाप्लुतंहृष्टमुमादेहार्धधारिणं॥ दिव्यसिं
हासनासीनंदिव्यभोगसमन्वितं॥ दिग्देवतासमायुक्तंसुरासुरनमस्कृ

ते॥ नित्यंवत्नाश्वतंशुद्धं ध्रुवमक्षरमव्ययं॥ सर्वव्यापीनमीशानंरुद्रंवैवि
श्वरूपिणं॥ एवंध्यात्वाद्विजसम्यक्ततोयजनमारभेत्॥ हंसइति॥ ईशानं
मूर्ध्नि विन्यस्यहंसहंसेतियोजुपात्॥ एवमुक्तेपार्थिवंयःसमर्चयेत्नरः॥
तस्मात्तु पार्थिवंलिंगंत्तेयंसर्वार्थसाधकं॥ तत्रैवशिवधर्मे॥ वालुकानि
चलिंगानिकारयेत्पार्थिवानिच॥ सहस्रस्तनाभ्यसोपिलभतेवांछितंफलं
तत्रैवकालकौमुद्यां॥ अक्षादल्पपरीमाणतल्लिंगंकुत्रचिन्नरः॥ कुर्वी
तांगुष्टतोन्हस्वंनकदाचित्समाचरेत्॥ अक्षोशीतिरक्तिकाः॥ तेषोडशा
क्षरइत्यमरात्॥ इदंच परिमाणंप्रधानलिंगस्यनवेदिकायाः॥ अंगुष्ट
शाष्ट्रेनांगुष्टदहस्यर्वग्रंथिरुच्यते॥ अंगुष्टांगुलिमानंतुयत्रयत्रोपदिश्य

ते॥ तत्रतत्रहस्तपर्वग्रंथिभिर्मितियाम्सदेतिछंदोगपरिशिष्टात्॥ अंगुष्टमानं
मंगुलिमानंचेत्यर्थः॥ तत्रैवगौतमः॥ रात्रावुदङ्मुखः कुर्याद्देवकार्यंसदैव
हि॥ शिवार्चनंत्वंसदाप्येवंशुचिः कुर्यादुदङ्मुखः॥ सदादिवारात्रौच॥ तत्रै
वलैंगे॥ विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया॥ पूजितोपिमहादेवोनस्या
त्तस्यफलप्रदः तस्मान्मृदापिकर्तव्यंललाटेवैत्रिपुंड्रकं॥ ॐह्रौंनमइतिरुद्रा
क्षान्प्रत्येकमभिमंत्र्यमालांधारयेदित्युक्तः तत्रैवपूजाधिकारार्थंपंचाक्षर
जपउक्तस्तत्रैवभविष्ये॥ अपवित्रःपवित्रोवासर्वावस्थांगतोपिवाः महा
पातकयुक्तोवामंत्रस्यास्यजपेप्रयाः॥ अधिकारीभवेत्सर्वइतिदेवोब्रवीच्छि
वः॥ इतिस्मृत्यर्थोयियापदात्॥ तत्रैवब्राह्मे॥ यावन्नदीयतेचार्घ्यंभास्कराय

शां॰र॰ निवेदितं॥ तावत्र पूजयेच्छंभुं शंकरं महेश्वरं॥ तत्रैव देवीपुराणे॥ सद्यादृरण
संघट्टप्रतिष्ठाह्वानमेव च॥ स्थापनं पूजनं चैव विसर्जनमतः परं॥ हरो महेश्वर
३३५ श्चैव शूलपाणिः पिनाकधृक्॥ पशुपतिः शिवश्चैव महादेव इति स्मृतः॥ ना
क्रमेण पूर्वोक्तकर्माणि कारयेदित्यर्थः॥ पूजनमध्यादिः प्रतिष्ठाह्वानयोर
दृष्टार्थत्वात्प्राक्क्रमएव यद्यप्यत्र नामान्येवेति विनिमुक्तानि तथापि ध्या
त्वा प्रणवपूर्वं तु तत्तन्नाम्ना समाहितः॥ नमस्कारेण पुष्पादि विन्यसेद्वै पृ
थक् पृथक् इति॥ सामान्यवाक्यात्प्रणवोंततात्तेषां॥ पूजने च यद्यपि त्रि राम
वन्नामोक्तं तथापि तदेकैकपंचाक्षरोऽग्राह्य इत्युक्तं॥ तत्रैकधा त्रेधा षोढा
षोडशधा अष्टाचत्वारिंशद्धा एकोनसप्तत्युत्तरशतधा चेति॥ तत्र त्रेधा ३३५

७५

विभक्ते धा विभक्तं जुहोति त्रयस्त्रिंशतोकार इति श्रुत्योक्तः॥ षोडशधा विभागोपि अपि
वाग्यमा उपक्रम्य नमस्तक्षभ्य इति जानुदघ्ने धारयमाणो जुहोति रथकारेभ्यश्च
व इत्युपक्रम्य नमस्तक्षभ्य इति जानुदघ्ने॥ नमः स्वायुधायेत्यानाभिदघ्ने शेषेण
प्रागवतानेभ्यस्य दघ्ने ऊत्वा सहस्राणि सहस्रश इति दशानतानूऊत्वा अन्वा
रोहान् जुहोति नमो रुद्रेभ्यो ये दिवीत्यास्यदघ्ने ऊत्वेति बौधायनेनोक्तः॥ एको
नसप्तत्युत्तरशतविभागस्तु॥ अथैकत्वादेकं वा कामितिन्यायेन शाणकव
ण्याद्युक्तोन्यतो नमस्कारत्वादित्यवसिद्धः॥ तत्र प्रथमानुवाके पंचदश
र्च इति पंचदश मंत्राः॥ द्वितीये त्रयोदश यजूंषि॥ तितावंतः॥ तृतीयचतुर्थ
योः प्रत्येकं सप्तदश यजूंषि॥ पंचमषष्ठयोः प्रत्येकं पंचदश यजूंषि॥ सप्त

शां·र· मेषोडशः॥ अष्टमेसप्तदशः नवमेएकोनविंशति॥ दशमेद्वादशार्चः॥ एकादशे
दशार्चः॥ स्त्रीणि चयज्जूंषीति एकोनसप्तत्युत्तरस्त्रातं मंत्राः॥ अस्मिंश्चपक्षेद्वि
३३६ तीयानुवाकमारभ्य नवमानुवाकपर्यंतं नमस्कारादिनमस्कारांतमेवंयजु
जूंरिति शाकपाणिः॥ नमस्कारद्वैकंयजुरितियास्करः॥ महार्णवस्तु शाक
पूणिविहितस्तु नयोनमस्कारत्व द्वितीयतृतीयचतुर्थानुवाकविषयं॥ पारस्क
रेच नमस्कारादित्वं पंचमादिनवमांतं तथा शिष्टाचारादित्याह॥ अस्मिन्प
क्षेदेवतानांहृदयेअस्मरति मंत्रावशेष्वसुत्तरमंत्रंचतुष्टयेनुषज्यते॥ जपा राम
दौनुविनावाक्तानुषंगः॥ अष्टाचत्वारिंशद्विभागस्तुअष्टावनुवाकअष्टौय
जूंषीति काशस्तोके द्वितीयानुवाकप्रभृतिनवमांतेरनुवाकेरष्टौमंत्राः॥ ३३६

७६

ऽन्तरानुवाकेषुत्वनंतरपक्षोक्तोमंत्रविभागइति॥ तत्ररूपजपेदशांशांशहोमो
नास्तिदशावारंजपाभावात्॥ एवमेकादशिनीजपेशतांशहोमोनास्तिएका
दशिनीदशांशहोमेएकैकेनैवरूपेणहोमः॥ अवशिष्टैकरूपस्यदशांशहोमो
नास्ति॥ एवंलघुरुद्रमहारुद्रादावप्यवशिष्टरूपस्यसनास्तीतिमहार्णवः॥
पितृचरणास्तुरूपावृत्तीनांदशांशेशासंभवाद्दष्टाचत्वारिंशत्पक्षेपंचावृत्तयः॥
एकोनसप्तत्युत्तरस्त्रातपक्षेसप्तदशातप्रत्यार्घेमंत्रैरावृत्तेर्वाएवमेकादशिन्या
दिजपेपिअवशिष्टरूपेदशांशाः संभवतीत्याहुः॥ अत्रमूलंनलभ्यंकेचित
त्रिष्टरूपेदशांशाःसंभवतीत्याहुः केचित्तुअवशिष्टरूपेष्वोक्तवचनात्रमः॥
संभवमंत्रेणहोमइत्याहुः॥ एवंमहारुद्रादावपिद्रष्टव्यं॥ अथपंचषोडशविभा

शां.र. गोनमकेष्वेवचमकेष्वनुविभागमाह ॥ महार्णवेबौधायनः ॥ अग्नाविष्णूसजो
षसेतिचतुर्गृहीतंकृत्वा वाजश्चमेप्रसवश्चमइतिसततवसोर्धारांजुहोत्यामंत्र
३३१ समाप्तनादिति ॥ आमंत्रसमापनादितिसर्वचमकानुवाकेएकाहुतिरित्य
र्थः ॥ तथाचसर्वनमकानुवाकहोमांतेअग्नाविष्णूचैकाहुतिः ॥ अवशिष्ट
चमकाध्यायेनापरेत्याहुतिद्वयमितिकेचित् ॥ अन्येतुवाकभेदाद्देवद्वि
तीयाद्यनुवाकेषुमंत्रभेदसिद्धेः ॥ प्रथमानुवाकसमाप्तिरेवात्रोच्यतेतथा
चाद्यचमकानुवाकेद्वेआहुतीद्वितीयादिचमकानुवाकेदशहोत्याहुः ॥ तथा राम
चद्वेआहुतीद्वादशवाहुतयइतिपक्षद्वयंसिद्धांतेतीयोपिपक्षोर्थसिद्धोमहा
र्णवोक्तः ॥ तथाहि ॥ नमस्तेरुद्रमन्यवइत्येकादशानामनुवाकानामेकैकं ३३१

जपेदितिबौधायनेनद्वितीयादिवदाद्यस्याद्यचमकां ॥ नुवाकस्यसमस्तस्य
जपेएकमंत्रत्वंबोधितंजपानुसाराच्चहोमः ॥ अतःसर्वनमकानुवाकहोमां
तेसमस्ताद्यचमकानुवाकेनहोमएवमुत्तरेष्वप्यनुवाकेष्वित्येकादशाहुत
यइति ॥ अयमेवपक्षोमुख्यः ॥ आकृतिगणनामस्येवतेनोक्तः ॥ इदानींतु
शिष्टाद्वादशाहुतिपक्षमेवकुर्वंति ॥ अथैकादशिन्यादिकुंडनिर्णयार्थं
चमकद्वादशाहुतिपक्षमाश्रित्यदशगोत्रहोमेचावशिष्टरूपाहुतिस्तागमाश्रित्या
हुतिसंख्योच्यते ॥ एकादशिन्यांसमग्रहोमेप्रतिमंत्रपक्षेआहुतयः एकसप्त
त्यधिकाष्टादशशतानीतिहस्तंकुंडंतत्रैवाष्टचत्वारिंशतिसहस्रापंचशतानु
क्षेचत्वारिंशदधिकापंचशती ॥ एकहस्तंकुंडंलघुरुद्रेसमग्रहोमेप्रतिमंत्रप

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्मारकम्

श्री·२ क्षे विंशतिसाहस्री पंचशतानि एकाशीतिश्च ॥ त्रिहस्तं कुंडं लघुरुद्रे समग्र
होमे प्रतिमंत्रपक्षे विंशतिसाहस्री पंचशतानि एकाशीतिश्च ॥ त्रिहस्तं कुं
३३८ डं ॥ तत्रैवाष्टचत्वारिंशत्पक्षे पंचसहस्राणि नवशतानि चत्वारिंशच्च द्विह
स्तं कुंडं ॥ महारुद्रे समग्रहोमे प्रतिमंत्रपक्षे लक्षद्वयं षड्विंशतिसहस्राणि
शतत्रयं सप्तत्रिंशच्च चतुर्हस्तं कुंडं ॥ अतिरुद्रे समग्रहोमे प्रतिमंत्रपक्षे च
तुर्विंशतिलक्षाणि नवतिसहस्राणि एकाधिकशतत्रयं च ॥ अष्टहस्तं कुं
डं ॥ तत्रैवाष्टचत्वारिंशत्पक्षे ॥ षट्शती ॥ एकहस्तं कुंडं ॥ महारुद्र राम
जपदशांशहोमे प्रतिमंत्रपक्षे द्वाविंशतिसहस्राणि षट्शती त्रयस्त्रिंश ३३८
च्च ॥ चतुर्हस्तं कुंडं तत्रैवाष्टचत्वारिंशत्पक्षे षट्सहस्राणि पंचशतानि चत्वा

७९

रिंशच्च द्विहस्तं कुंडं ॥ अतिरुद्रजपदशांशहोमे प्रतिमंत्रपक्षे लक्षद्वयं एकोन
पंचाशत्सहस्राणि चतुर्विंशतिश्च षड्हस्तं कुंडं ॥ तत्रैवाष्टचत्वारिंशत्पक्षे
एकसप्ततिसहस्राणि अष्टशती अशीतिश्च चतुर्हस्तं कुंडं ॥ तत्रैवाष्टचत्वा
रिंशत्पक्षे एकसप्ततिसहस्राणि अष्टशती अशीतिश्च चतुर्हस्तं कुंडं ॥ त
त्रैवाष्टचत्वारिंशत्पक्षे एकसप्ततिसहस्राणि अष्टशती अशीतिश्चतुर्हस्तं
कुंडं ॥ त्रेधा विभागादिपक्षास्तु न प्रचरंतीति तद्गणना नोक्ता ॥ रुद्रे मंडप
परिमाणमाह परशुरामः ॥ मंडपो द्विगुणः कुंडात् कुंडं होमानुसारतः ॥
अथ रुद्रवेदिः ग्रहवेदिरपि रपि तत्रैवेति केचित् ॥ कुंडस्य प्रागुदीच्यां
वा प्राच्यामुत्तरतो पि वा चतुरस्रं चतुर्धारिं कर्त्तव्यं ॥ ग्रहपीठकमिति गोभि

रा०र० लोके ॥ प्राच्यास्तुदीक्षांवेशयनेन ॥ अपरेतुग्रहवेदिरेवरुद्रवेदिः अतिरिक्त
तत्सत्वेप्रमाणाभावादितिवदंति ॥ वयंतुरुद्रहोमेमंत्रहोमत्वात्त्रांत्रिकी
३३९ वेदिः ॥ तथाचमंडपमध्येनवमांशेनतुलापुरुषवद्वेदिःकार्याकुंडवत
दीक्षणेनतुलावत् ॥ ग्रहवेदिस्तुकुंडादीशानादौमंडपांतर्बहिर्वा ॥ ग्रह
मखेतथाविधानात् ॥ नचरुद्रहोमस्यानियतंत्र्यंतिरूपत्वंयेनग्रहमख
विकृतित्वंस्यात् ॥ काम्यस्यापितस्यसत्वादितिवदाम ॥ गूर्जरपरशुरामोपि
तत्रैकावेदिकाकार्यायत्रमंडपमध्यतः ॥ मध्यस्तंभांतरंयावत्तावन्मानां
करोच्छ्रयेत्याह ॥ महार्णवस्तुकुंडमंडपरूत्विक्तत्संख्यावसोर्धारादिवा राम
युतादिहोमवत्कार्यमित्याह ॥ अत्ररुद्रमंत्रवर्धपरिवर्तोविशिष्टाः कुर्वंति ३३९

नितदुच्यते ॥ स्कांदे ॥ प्रणम्यजगतामीशमुमादेहार्धधारिणं ॥ यंत्रोद्धारमहं
वक्ष्येरुद्रकल्पानुसारतः ॥ मध्येवृत्तंसमालिख्यतन्मध्येचदशाक्षरं ॥ बहि
रष्टदलंपद्मंततःषोडशपत्रकं ॥ चतुर्विंशतिपत्राब्जंद्वात्रिंशत्पत्रकंतथा
चत्वारिंशत्पत्रकंतुमध्यंसूर्यसमप्रभं ॥ पंचपद्मात्मकंवृत्तंचतुरस्रंचतुर्द्वा
रं ॥ सत्वंरजस्तमश्चेतित्रिगुणैःपरितोवृतं ॥ चतुर्द्वारेद्वारदेशेबहिर्नाग
समावृतं ॥ रुद्रपीठमितिख्यातंदेवतास्तत्रविन्यसेत् ॥ चत्वारिंशच्चतत्रैकं
देवतानामुदाहृतं ॥ कर्णिकामध्यदेशेतुरुद्रंपंचास्यमालिखेत् ॥ नमोभग
वतेरुद्रायेति तीरतदकेन्यसेत् ॥ सोयंदशाक्षरोमंत्रःसर्वकामा
र्थसिद्धिदः ॥ प्रणवादिनमोतानिपंचास्यानिततःपरं ॥ सद्योजातंवाम

शा॰ र॰ देवमघोरं तदनंतरं॥ ततस्तत्पुरुषं न्यसेदीशानं पंचमं क्रमात्॥ प्रधा
३४० नमिदमाख्यातं प्रथमावरणे ततः॥ दलेष्वष्टसु तं चादौ न्यसेत्पूर्वादिक्रम
तो न्यसेत्॥ पूज्यपूजकयोर्मध्ये प्राचीं साध्यत्र लेखने॥ आदौ नंदि
महाकालौ गणेशं वृषभं तथा क्रमात्॥ अनंतरं भृंगरीटिं स्कंदं देव्या च षट् संज्ञकाः
॥ षोडशारे ततः पद्मे द्वितीयावरणे यतेत्॥ अनंतं च तथा सूक्ष्मं शिवं चैवै
कपदं तथा॥ तृतीयावरणे सद्मे चतुर्विंशद्दले तथा॥ अणिमा महिमा
चैव लघिमा गरिमा तथा॥ प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चाष्टसि राम
द्धयः॥ ततः परं क्रमेणैव न्यसेद्ब्राह्म्यादिदेवताः॥ ब्राह्मी माहेश्वरी चैव कौ
मारी वैष्णवी तथा॥ वाराही चेंद्री च चामुंडा चंडिका चेति ताः क्रमात्॥ ततो ३४०

८०

ष्टस्वसितांगाद्यान्भैरवान्विन्यसेत्पुनः॥ असितांगो रुरुश्चंडः क्रोधमुन्मत्त
भैरवं॥ कालं भीषणसंहारा भैरवाश्चाष्ट कीर्तिताः॥ द्वात्रिंशत्पत्रके पूर्वं
नवाष्टकमुदाहृतं॥ ततोऽनंतो वासुकिश्च तक्षकश्च कुलीरकः॥ कर्कोट
कः शंखपालः कंबलोऽश्वतरस्तथा॥ ततोऽष्टसु न्यसेद्धन्यं घृष्टुं हेहयमेम
र्जुनं॥ शाकुंतलेयं भरतं नलं राममिति क्रमात्॥ ततः कुलाचलानष्टौ
दलेष्वष्टसु विन्यसेत्॥ हिमवान्निषिधो विंध्यो माल्यवान्पारियात्रकः॥ मल
यो हेमकूटश्च गंधमादनसंज्ञकः॥ चतुर्थावरणं ह्येवं पंचमावरणे ततः॥
चत्वारिंशद्दले पद्मे पंचमावरणे न्यसेत्॥ इंद्राद्यष्टौ लोकपालानष्टसु विन्य
सेत्॥ क्रमशो लिखेत्॥ इंद्रादिलोकपालानामष्टौ शक्तीस्ततो लिखेत्॥

शां. र. मग्निंयमंचैवनिऋतिंवरुणंतथा ॥ वायुंकुवेरमीशानंदलेष्वष्टसुविन्यसेत् ॥
इंद्रादिलोकपालानामष्टौशक्तीस्ततोलिखेत् ॥ ऐन्द्रीस्वाहाचवाराहीखड्गि
३४१ नीवारुणीतथा ॥ मृगारूढाचकौवेरीशूलिनीचतथाष्टमी ॥ ततोष्टाना
मायुधानिवज्रादीन्यष्टसुन्यसेत् ॥ वज्रंशक्तिर्दंडखड्गौपाशांकुशगदाअ
पि ॥ त्रिशूलंलोकपालानामायुधानिक्रमाल्लिखेत् ॥ ततोष्टौवाहनान्ये
षामष्टसुक्रमतोलिखेत् ॥ ऐरावतंतथामेषंमहिषंश्वेतसंज्ञितं ॥ म
करंचमृगंचैवनरंचवृषभंतथा ॥ ऐरावतोद्ययोप्यष्टदिग्गजास्तदनंत राम
रं ॥ ऐरावतःपुंडरीकोवामनःकुमुदोंजनः ॥ पुष्पदंतःसार्वभौमःसुप्र
तीकश्चदिग्गजाः ॥ भूरुहांतःपुनर्लेख्याःपंचपद्मात्मिकाबहिः ॥ इंद्रंविन्य ३४२

८१

स्यपूर्वस्यामाग्नेयामग्निमेवच ॥ दक्षिणस्यांयमंचैवनिरृत्यांनिरृतिंन्यसेत् ॥
प्रतीच्यांवरुणंवायुंवायव्यांविन्यसेत्ततः ॥ कुवेरंचैवकौवेर्यामीशान्यांमीश
मालिखेत् ॥ विरूपाक्षंतुविन्यस्येदाग्नेय्यामग्नियोगतः ॥ कुवेरंचैवकौवेर्यां
मीशान्यांमीशमालिखेत् ॥ विरूपाक्षंतुविन्यस्येदाग्नेय्यामग्नियोगतः ॥ नै
ऋत्यांनिरृतेर्योगेविश्वरूपंविन्यसेत् ॥ वायव्यांवायुयोगेचलिखेन्मृत्युपतिं
तथा ॥ ईशान्यामर्घलिंगंचन्यसेदीशानयोगतः ॥ प्रागादिक्रमतोलेख्या
:शेषाद्याभूरुहाबहिः ॥ विप्रवर्णंश्वेतरूपंसहस्रफणमंडितं ॥ शेषंवि
न्यस्यपूर्वस्यांपूजयेदुपचारकैः ॥ तक्षकंवैश्यवर्णंचनीलंपंचशतैः
फणैः ॥ पुरुषंत्वंगकायंचआसव्यांदिशिविन्यसेत् ॥ अनंतंविप्रवर्णंच

शां.र. तथाकुंकुमवर्णाभंसहस्रफणसंयुक्तंदक्षिणस्यांप्रपूजयेत्॥ वासुकिं
क्षत्रियंपीतवर्णंसप्तशतैः फणैः॥ युक्तमुत्तुंगकायंचनैरृत्यांदिशिविन्यसे
३५२ त्॥ शंखपालंक्षत्रियंचपीतंसप्तशतैः फणैः॥ युक्तमुत्तुंगकायंचवाय
व्यांदिशिपूजयेत्॥ कंबलंशूद्रवर्णंचकृष्णंत्रिंशत्फणैर्युतं॥ कौबेर्यांदि
शिविन्यस्यपूजयेच्चविधानतः॥ कर्कोटकंशूद्रवर्णंश्वेतंत्रिंशत्फणा
युतं॥ ईशान्यांदिशिविन्यस्यपूजयेद्विधिवत्ततः॥ रुद्रपीठमिदंसर्वंरुद्र
कल्पेषुविश्रुतंन्यसेत्॥ शंभुनास्वयमाख्यातंलोकानुग्रहकाम्यया॥ कुं राम
कुमागुरुकर्पूरैर्लिखेत्पत्रेथवापटे॥ लिखितंपूजितंयस्मात्सर्वकामार्थसि
द्धिदं॥ यंत्रंमंत्रमयंप्रोक्तमाख्यातादेवतेतिच॥ पूजनीयंप्रयत्नेनतेनेदंदे ३५२

८२

वतामयं॥ नाग्निचोरभयंतत्रनचराजभयंक्वचित्॥ यत्रेदंलिखितंयंत्रंपूज्यते
विधिवत्सदा॥ ॥अथरुद्रप्रयोगः॥ ॥देशकालौसंकीर्त्यअमुकफला
वाप्त्यर्थंवाश्रीपरमेश्वरप्रीत्यर्थंस्वयंब्राह्मणद्वाराअमुकरुद्रजपंकरिष्य इ
तिसंकल्प्यतंगतयागणपतिपूजनपुण्याहवाचनमातृपूजननांदीश्रा
द्धाचार्यब्रह्मर्त्विग्वरणानिकृत्वादेवाजयादौजपंसमाप्य॥ भद्रंकर्णे
भिरितिमंडपंप्रविश्यकृतस्यामुकरुद्रजपस्यदशांशेनप्रतिमंत्रपक्षे
णाष्टत्वारिंशत्पक्षेणाष्टचत्वारिंशत्पक्षेणवातिलद्रव्येणहोमंकरिष्य इ
तिसंकल्प्यगणेशंसंपूज्यसर्षपविकिरणादिमंडपप्रतिष्ठांतंग्रहमखवत्कृ
त्वाग्निंप्रतिष्ठाप्यग्रहवेद्यांग्रहान्प्रतिष्ठाप्यरुद्रवेदिस्थवर्तिस्थितरुद्रपीठदे

DR. BHAU DAJI MEMORIAL

शां. र. वता: स्थापयेत् ॐ नमो भगवते रुद्राय ॥ तत्रैव दिक्षु: सद्योजात: ॥ वाम
देव: ॥ अघोर: ॥ तत्पुरुष: ईशान: तत: पूर्वादि नंदी० महाकाल: गणे
३४१२ श्वर वृषभ० भृंगिरिटि० स्कंद: उमा-चंडीश्वर: ॥ इति प्रथमावरणं ॥ अ
नंत: सूक्ष्म० शिव० एकपात्० एकरुद्र: त्रिमूर्त्ति: श्रीकंठ: वामदेव: ज्येष्ठ
श्रेष्ठ: रुद्र: काल: कलविकरण: बलविकरण: बलप्रमथन: इति द्वितीयं
अणिमा: ० महिमा० गरिमा: ० लघिमा० प्राप्ति० प्राकाम्य० ईशिता: वशि
ता: ० ब्राह्मी माहेश्वरी० कौमारी० वैष्णवी० वाराही० ऐंद्री० चामुंडा० चं राम
डिका० असितांगभैरव० रुरुभै: चंडभै० क्रोधभै० उन्मत्तभै: ० भीषण ४५१२
भै० संहारभै० इति तृतीयं ॥ भव: शर्व: ईशान: पशुपति: रुद्र० उग्र: भीम०

८३

महान् ॥ अनंत वासुकि: तक्षक: कुलीर: कर्कोटक: शंखपाल: कंबल: अ
श्वतर: वैन्य: पृथु: हैहय: अर्जुन: शाकुंतलेय: भरत: नल: राम: हिमवान् नि
षध० विंध्य: माल्यवान्० पारियात्र: मलय: हेमकूट: गंधमादन: इति च
तुर्थ: इंद्र: अग्नि० यम० निर्ऋति० वरुण: ० वायु: कुबेर: ईशान: शर्व० स्वा
हा वाराही० रक्षिणी० वारुणी० वायवी० कौबेरी: ईशानी० वज्रं: शक्तिदंड:
खड्गपाश: अंकुश: गदा: ० त्रिशूलं० ऐरावत: मेष: महिष: प्रेत: मकर: ह
रिण: नर: वृषभ: ऐरावत: पुंडरीक: वामन: कुमुद: अंजन: पुष्पदंत: सा
र्वभौम: सुप्रतीक: ॥ इति पंचमं ॥ पूर्वे इंद्र: ॥ आग्नेयामग्निर्विरूपाक्षश्च ॥
दक्षिणे यम: ॥ निर्ऋत्यां निर्ऋतिर्विश्वरूपश्च पश्चिमे वरुण: ॥ वायव्यां वायु: प

रु॰र॰ स्थपतिश्च॥उत्तरेकुबेरः ईशान्यामीशानः॥ऊर्ध्वलिंगंच॥ पूर्वादिशेषः॥
तक्षकः अनंतः वासुकिः॥शंखपालः महापद्मः कंबलः कर्कोटकः॥
२४७ ततः तदस्तुगृहावेश्यावाह्यसंपूज्यतदीशान्यांकुंभेवरुणंसंपूज्यरुद्रजपा
र्थंविप्रंवृणुयात्॥ ततोग्रहमखवत्ग्रहादिभ्योहोमंकृत्वाघृताक्तबिल्वैरु
द्रहोमंकृत्वारुद्रपीठदेवताभ्यएकैकस्याआहुतिंदत्वादिक्पालादिभ्योरु
द्रायक्षेत्रपालायचग्रहमखवद्बलिंदत्वापूर्णाहुतिंचवसोर्धारांकृत्वापूर्ण
पात्रविमोकादिकर्मशेषंसमाप्याचार्यादिभ्योजपहोमश्रेयोगृहीत्वा राम
चार्यादिभ्योदक्षिणांदद्यात्॥ ततोयजमानोग्रहाणांरुद्रस्यचोत्तरपूजां
कृत्वास्वशाखोक्तमंत्रेणविसृज्याचार्यायदत्वाग्निंसंपूज्यगच्छगच्छेतिवि २४७

५८

सृज्यमंडपमाचार्यायदत्वाब्राह्मणान्भोजयित्वायस्यस्मृत्याप्रमादाद्वि
जपित्वाकर्मसंपूर्णतांवाचयित्वाकर्मेश्वरार्पणंकृत्वासुहृद्युक्तोभुंजीत॥
॥ ॥इतिरुद्रपद्धतिः॥ ॥अथरुद्राभिषेकविधिः॥ ॥हेमाद्रौमहार्णवेच
॥अथातोरुद्रस्नानार्चनविधिंव्याख्यास्यामः॥आदितएवतीर्थेगत्वास्नात्वो
देत्यशुचिः॥ प्रयतोब्रह्मचारीशुक्लवासासमास्तस्यदक्षिणप्रस्थेदेशेतन्मुख
स्थित्वात्मनिदेवताः॥स्थापयेत्॥प्रजननेब्रह्मातिष्ठतुपादयोर्विष्णुस्तिष्ठ
तुहस्तयोर्हरस्तिष्ठतुबाह्वोरिंद्रस्तिष्ठतुजठरेअग्निस्तिष्ठतु॥ हृदयेशिव
स्तिष्ठतु॥ कंठेवसवस्तिष्ठंतुवक्त्रेसरस्वतीतिष्ठतुनासिकयोर्वायुस्ति
ष्ठतु॥नयनयोःसूर्याचंद्रमसौतिष्ठेतांकर्णयोरश्विनौतिष्ठेतां॥लला

शां॰र॰ देरुद्रस्तिष्ठतु ॥ मूर्द्धन्यादित्यास्तिष्ठंतुः ॥ पृष्ठे पिनाकी तिष्ठंतु ॥ ततो बहिः पू
र्वतोग्निज्वालामालापरिवृतस्तिष्ठेत् ॥ सर्वेष्वंगेषु सर्वादेवतास्तिष्ठंतु मां
३४५ रक्षंतु ॥ अग्निर्वायुः सूर्यश्चंद्रमा दिश आपः ॥ पृथिव्योषधिवनस्पतयः
इंद्रः पर्जन्य ईशान आत्मा पुरुष अग्निर्मे वाचि श्रित इति यथालिंगमंगानि स्पृ
ष्ट्वा न्यायेन गंधपुष्पाक्षतधूपदीपैरात्मानं प्रत्याराधयेत् ॥ आराधितो मन्त्रकोसं
सिद्धे देवैः सुरादिभिः ॥ आवाहयामि नत्वा त्वां मां शरणं महेश्वर ॥ त्र्यंबकं य
जामहे इत्यनेनमाराधयेत् ॥ आवाहनं हृदयः सेचेतसश्चेतो रश्चेः सह राम
केतुमूर्ध्नि ॥ वातजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोमि
त्यावाह्य संस्थापिते त्वावाहनं ॥ सद्योजातं प्रपद्यामीत्यावाहनं दद्याति ३४५

भवेभवेनातिभवे भजस्व मामिति पाद्यं भवोद्भवाय नम इति अभिगामिश्चस्ना
नं ॥ अभिगाः आपोहिष्ठेत्याद्याः ॥ अथाद्भिः तर्पयति ॥ भवं देवं तर्पयति
मः ॥ शर्वं देवं तर्पयामिः ॥ उग्रं देवं तर्पयामि पशुपतिं देवं तर्पयामिः ॥ रुद्रं
देवं तर्पयामि ॥ उग्रं देवं तर्पयामि ॥ भीमं देवं तर्पयामि महांतं देवं तर्प
यामि ॥ इति तर्पयित्वा ज्येष्ठाय नम इत्याचमनीयं ॥ श्रेष्ठाय नम इति मधुप
र्कं कलविकरणाय नम इति पुष्पाणि ॥ सर्वभूतदमनाय नम इति धूपं ॥
मनोन्मनाय नम इति दीपं ॥ मनोन्मनाय नम इति कालेनैवेद्यं ॥ अथाष्ट
भिर्मंत्रैरष्टौ पुष्पाणि ॥ भवाय देवाय नमः ॥ शर्वाय देवाय नमः ॥ ईशानाय
देवाय नमः ॥ पशुपतये देवायः० रुद्राय देवायः ॥ उग्राय देवाय० भीमाय देवा

श्री. रु. य:० महते देवाय॥ अथास्याघोरतनूरुपतिष्ठते॥ अथैतस्य हिरण्येन मूर्ध्नि कु
३४६ लशेन संततधारां निषिंचेत्॥ मधुना सर्पिषा पयसा चेक्षुरसेन नारिकेले
न वा आम्ररसेन वा तद्दलाभे उदकेन वा नमस्ते रुद्र मन्यव इत्येकादशानु
वाकानामेकं जपेत्॥ सर्वेषां चारे पुनराधयेत्॥ उत्तमाराधनेन तदेतद्विधा
नमुक्तं तेनाभिषिक्तेनोदक्षीण्यामित्यनुवाकेनाभिगाभिष्य पादाक्षं मृज्या
त्पापक्षयार्थी व्याधिविमोचनार्थी जीवनार्थी श्रीकामः शांतिकामः पुष्टि
कामस्तुष्टिकामो मोक्षार्थी कुर्यादेवं कुर्वन् सिद्धिमाप्नोति॥ आचार्याय द राम
क्षिणां दद्यात् दशगाः सवत्साः सुवर्णभूषिता वृषभैकादशास्य दत्वाभर
कांगं दद्यादित्याह भगवान् बोधायनः॥ यद्यप्यत्रैक एव न्यासस्तथा २४६

८६

पि पूर्वोक्तन्यासा यत्त्वमकमपि कार्यं॥ रुद्राणां जपहोमविधिं व्याख्यास्याम
इत्युक्त्वा पंचन्यासोक्तेः अर्चनमभिषेक इति महार्णवः आत्मानं प्रतीति स्व
शरीरे मनसा पूजयेदित्यर्थः॥ आराधित इति मंत्रो मानसावाहने गंधादौ त्र्यंबु
बकमंत्रः यद्यपि मानसपूजायां निवेद्यं नोक्तं तथा शिष्टाः कुर्वंति॥ संस्था
पितः इत्यावाह्य पूजायामात्वा वहंत्वित्यावाह्य सद्योजातं इति पुनरावाहयेदि
त्यर्थः॥ अघोरतनूः अघोरेभ्य इत्यादि सदाशिवोमित्यंताः सर्वेषां पंचविध
रुद्राणां॥ उत्तमेति अभिषेकोत्तरं बाह्यपूजने वेत्यर्थः॥ तदेतदिति पत्ररुद्रा
भिषेका विहितत्रैषष्ठ्यविधिरित्यर्थः॥ तेनेति॥ पापक्षयव्याधिविमोक्षा
द्यर्थाभिषेकेंग संमार्जनमधिकं कुर्यादित्यर्थः॥ त्र्यंबकमंत्रविधिस्तु कर्म

ग्रं.र. विपाकसारेऽप्युक्तः॥ ॥अथपार्थिवपूजाविधिः॥तिथितत्वेभविष्ये॥मृन्मयं
३४७ गोत्राकृस्पिंडताम्रकांस्यमयंतथा॥ कृत्वालिंगंसकृत्पूज्यवसेत्कल्पायु
तंदिवि॥वृक्षवित्तप्रदंलिंगंस्फाटिकंसर्वकामदं॥ नर्मदागिरिजंश्रेष्ठं
मम्मथापिशिलिंगवत्॥लिंगवत्लिंगाकारं॥तेननार्मदस्यापिलिंगाकार
स्यैवपूज्यतेतिथितत्वे॥तत्रैवनंदिपुराणे॥आयुष्मान्बलवान्पुत्रवान्ध
नवान्सुखी॥ वरमिष्टंलभेल्लिंगंहंसनामासदाशिवोभवतीत्यर्थः॥अ
त्रपंचन्यासाउक्ताः॥शिखाद्यस्त्रांतमेकत्रिंशदंगन्यासःप्रथमः मूर्धा
दिपादांतंदशांगन्यासोद्वितीयः॥पादादिमूर्धांतंपंचांगन्यासस्तृतीयः॥ राम
गुह्यादिमस्तकांतंपंचांगन्यासस्तृतीयः॥गुह्यादिमस्तकांतंपंचांगन्यासो ३४७

DR. BHAU DAJI MEMORIAL

२
८९

श्चतुर्थः॥हृदयाद्यस्त्रांतेपंचांगन्यासःपंचमइति॥पंचांगरुद्राणामित्युपक्र
मेबौधायनपंचैवन्यासाः॥शातातपेनतुबहवोपिन्यासउक्ताः॥षडंगेकादश
शीरुद्रइत्युक्तेसचप्रजननादिसर्वांगपर्यंतषोडशांगेषुकर्तव्यः॥ बौधा
यनेनाभिषेकप्रकरणेतदुक्तेरितिमहार्णवः॥ हेमाद्रौतुकौशिकेनसंक
ल्पजपहोमौविपक्रम्यन्यासद्वयंप्रकारांतरेणोक्तं॥न्यासंभवादिभिः
कुर्यान्मंत्रैःप्रणवादितैः॥भवंचपादयोन्यस्यसर्वन्यस्यसर्वन्यासो
रुमध्यतः॥ईशानंगुह्यदेशेतुनाभौपशुपतिंन्यसेत्॥ रुद्रंचहृदये
न्यस्यमुखेनोग्रंतुविन्यसेत्॥भीमंललाटेपटेचमहांतंशीर्षेविन्यसे
त्॥ तथैवांत्यानुवाकस्यद्वितीयंजानुदेशतः॥कवोस्तृतीयंविन्यस्यच

शा.र. तुर्यंगुह्यदेशतः॥ पंचमंवामदेशेतुषष्ठंतुहृदयंन्यसेत्॥ सप्तमंकंठदेशेतु
३४८ मुखेचाष्टमन्तुत्तमं॥ नवमंनासिकायांचदशमंनेत्रयोर्द्वयोः॥ एकादशंल
लाटेतुद्वादशंशीर्षेविन्यसेत्॥ त्रयोदशंतुकवचंकृत्वास्त्रेतुफट्तता॥
इति॥ ॥अथरुद्रहोमविधिः॥ ॥हेमाद्रौबौधायनः॥ रुद्रैकादशिनीजा
प्येत्रयस्त्रिंशद्याहुतीः॥ रुद्रेशतत्रयंप्रोक्तंषष्ठ्याअधिकयायुतं॥ रुद्रे
लघुरुद्रेस्यर्थः॥ चत्वारश्चमहारुद्रेसहस्राःसप्तवर्जिताः॥ चत्वारिंशत्स
हस्राश्चकर्तव्याश्चतुरुत्तराः॥ ऊनाश्चसप्तसप्तत्याद्यतिरुद्रेविनिश्चयः राम
होमश्चनमःशंभवेतिमंत्रेणेतिहेमाद्रिः॥ तथाचतन्मतेमंत्रेविनियोगोहो
मेनास्ति॥ महार्णवस्तुश्रुतिषुनानाविधमंत्रविभागाश्रातंवपनप्रकरण ३४८

८१

स्यमप्यपेक्षितत्वात्॥ तत्रहोमस्त्रेधा॥ समग्रहोमोदशांशहोमः॥ शतांश
होमश्चेतितत्राद्यःप्रधानभूतोगजपांगभूतश्च॥ तत्रशेत्वंगभूतावेवेतिम
हार्णवः॥ त्रिष्वपिचपक्षेषुमंत्रविभागःबोधायनंदिपुराणेःगोभूहिरण्यवा
सांसिबलिपुष्पनिवेदने॥ तेयोनमःशिवायेतिमंत्रःसर्वार्थसाधकः॥ पं
चाक्षरस्यनमोंतत्वाभावात्तुननमः॥ शाष्टेवाच्यइत्युक्तंतत्रैव॥ ततः नमः
शाष्टस्यदानार्थत्वात्पूर्वस्थितनमःशाष्टेनत्वसिद्धेःविसर्जनात्पूर्वंवामाव
र्तनाष्टमूर्तिपूजोक्तातत्रैवचविष्णे॥ शर्वायक्षितिमूर्तयेनमः॥ भवायजल
मूर्तयेनमः॥ रुद्रायअग्निमूर्तयेनमः॥ उग्रायवायुमूर्तयेनमः॥ ईशाना
यसूर्यमूर्तयेनमः॥ भीमायआकाशमूर्तयेनमः॥ पशुपतयेयजमानमूर्तयेन

शो॰र॰ मः॥ महादेवायसोममूर्त्तये नमः॥ ईशानायसूर्यमूर्त्तयेनमः॥मूर्त्तयोष्टौ
शिवस्यैताः॥ पूर्वादिक्रमयोगतः॥आग्नेय्यंताः प्रयोज्यास्तुवेद्यांलिंगोत्थि
२४९ वंयजेत्॥ एतावेद्यांपूज्यास्त्यर्थाः॥अत्रप्रसिद्धयागादिग्रहणमित्युक्तंतत्रैव
॥ प्रोक्तंतुपूज्यपूजकांतरात्रस्येति॥ अत्रशूद्रस्याप्यधिकारः॥शूद्रकर्मा
णियोनित्यंसौधातिकुरुतेप्रिये॥ तस्याहमर्चांगृह्णामिचंद्ररवंगविभूषि
तेः॥ नमोंतेनशिवेनैवस्त्रीणांपूजाविधीयते॥ स्वाहाप्रणवसंयुक्तंशूद्रे
मंत्रंददद्विजः॥ शूद्रोनिरयमाप्नोतिब्राह्मणःशूद्रतामियात्॥ इतितत्रैवस्कं राम
दात्॥ एवंकारेणवनिर्वृत्तिः॥ अथप्रयोगः॥अमुककामपार्थिवलिंग २४९
पूजांकरिष्यइतिसंकल्पविभूतिरुद्राक्षधारणंकृत्वायथाशक्तिपंचाक्षरंज

८८

प्त्वापुष्पंरूवांसुतमर्घ्यंस्वर्पायेदमर्घ्यंनममेतिदत्वाहरायनमइतिमृदाहरणं
॥ महेश्वरायनमइतिसंघट्टनं॥शूलपाणयेनमइतिप्रतिष्ठापनं॥ पिनाकधृषे
नमःइत्यावाहनं॥अथपारदोक्तंध्यानं॥ ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचा
रुचंद्रावतंसंरत्नाकल्पोज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नं॥ पद्मासीनंसमं
तात्स्तुतिममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रं
त्रिनेत्रं॥ नमःशिवायेतिपाद्यार्घ्याचमनीयानि॥ पशुपतयेनमइतिस्नानं॥न
मःशिवायेतिवस्त्रं॥ यज्ञोपवीतगंधालंकारपुष्पधूपदीपनैवेद्यफलतांबू
लदक्षिणादत्वावेद्यामष्टमूर्त्तियेनमः॥ईशान्यांरुद्रायअग्निमूर्त्तयेनमः॥उदी
च्यां॥उग्रायवायुमूर्त्तयेनमःउदीच्यां॥उग्रायवायुमूर्त्तयेनमः॥प्रतीच्यांःपशु

शां॰र॰ पतयेयजमान॥मूर्त्तयेनमः॥नैरृत्यां॥ महादेवायसोममूर्त्तयेनमः दक्षिणस्यां
ईशानायसूर्यमूर्त्तयेनमः॥आग्नेय्यां॥महादेवक्षमस्वेतिसंहारमुद्रयाविस
३५० र्जनं॥ ॥इतिश्रीकमलाकरभट्टकृतेशांतिरत्नाकरेपंचविधरुद्रादिशांतिः
॥ ॥अथशतचंडीविधिः॥ ॥रुद्रयामले॥शतचंडीविधानंचप्रोच्यमानंशृ
णुष्वतत्॥सर्वोपद्रवनाशार्थंशतचंडीसमाश्रेत्॥षोडशस्तंभसंयुक्तंमं
डपंपल्लवोज्वलं॥ वसुकोणयुतांवेदींमध्येकुर्यात्रिभागतः॥पक्वेष्टकचि
तांरम्यांमुच्छ्रायेहस्तसंमितां॥पंचवर्णरजोभिश्चकुर्यान्मंडलकंशुभं॥पं राम
चवर्णवितानंचकिंकिणीजालमंडितं॥आचार्येणसमंविप्रान्वरयेद्दशसु ३५०
व्रतान्॥ईशान्यांस्थापयेत्कुंभंपूर्वोक्तविधिनाहरः॥ वारुण्यांचप्रकर्तव्यं

कुंडंलक्षणलक्षितं॥मूर्त्तिर्देव्याःप्रकर्तव्यास्तुवर्णस्यपलेनवैः॥तदर्धेनतद
र्धेनतदर्धेनमहामते॥अष्टादशभुजांदेवींकुर्याद्वाष्टकरामपि॥पट्टकू
लयुगाच्छिन्नांवेदीमध्येनिधापयेत्॥देवींसंपूज्यविधिवज्जपंकुर्युर्द्विजाः॥
शतमादौशतंचांतेजपेन्मंत्रंनवार्णकं॥चंडीसप्तशतीमध्येसंपुटोयमुदा
हृतं॥एकंद्वेत्रीणिचत्वारिजपेद्दिनचतुष्टयं॥रूपाणिक्रमशस्तत्रस्वधर्मजना
दिकमाचरेत्॥पंचमेदिवसेप्राप्तेकुर्याद्धोमंविधानतः॥गडूचीपायसंदूर्वां
तिलान्सुक्तान्यवानपि॥चंडीपाठस्यहोमंतुप्रतिश्लोकंदशांशतः॥होमंकु
र्याद्ब्रह्मादिभ्यःसमिदाज्यचरूःक्रमात्॥हुत्वापूर्णाहुतिंदद्याद्विप्रेभ्योदक्षिणां
क्रमात्॥कपिलांगांनीलमणिंश्वेताश्वंछत्रचामरे॥अभिषेकंततःकुर्यु

यजमानस्यकुत्विजः॥एवंकृत्वामरेशानसर्वसिद्धिःप्रजायते॥ ॥अथसहस्र
चंडीविधिः॥ तत्रैव॥ सहस्रचंडीविधिवक्ष्येशृणुविघ्नोमहामते॥राज्यभ्रंशेऽप्य
मर्त्येचिजननमारेमहाभये॥गजमारेऽश्वमारेस्वपरचक्रभयेतथा॥इत्यादिवि
विधेऽःखेक्षयरोगादिजेभये॥सहस्राचंडिकापाठंकुर्याद्धाकारयेत्तथा॥जा
पकास्तुशतंप्रोक्ता विंशहस्तश्चमंडपः॥ नान्याःसहस्रंविप्रेंद्रः गोश
तंदक्षिणांदिशेत्॥ शतचंडीसहस्रचंडीनवचंडीभपद्धत्यनुसारेण
संप्रदायानुसारेणचहोमंविधायनवग्रहमखंविनियोज्यः॥ प्रायश्चि
त्तहोमांतेचनवग्रहविनायकादिक्षेत्रपालादिभ्योमाषभक्तबलीन्दत्वा
धादशगृहीतेनसमुद्रादूर्मिरितिद्वचेनमूर्धानंदिवः॥ पुनस्त्वादित्यापूर्णा

दर्विःसप्ततेऽग्ना मंतेइत्यंतैर्मूलेनचपूर्णाहुतिंकृत्वाइदमग्नयेवैश्वानरायवसुरु
द्रादित्येभ्यःशतक्रतवेसप्ततेऽग्नयेऽग्नोमहालक्ष्मैवनममेतित्यजेत्॥ ततोवसो
र्धारांकृत्वासंस्रवान्प्राश्यप्रणीताविमोकादिकर्मशेषंसमाप्यमूलमंत्रेणहोम
द्रव्यशेषेणदुग्धेनजलेनवातर्पयित्वातद्दशांशेनमार्जयेत्॥ ततःश्रेयसंपा
द्याचार्यादीन्वस्त्राद्यैःसंपूज्याचार्यायशतंतदर्धमष्टौवागोमिथुनानिसुवर्ण
चतुष्टयंचदद्यात्॥ब्रह्मणेनिष्कद्वयंगोद्वयंच॥ ऋत्विग्भ्यएकैकंनिष्कत्रयं
गोमिथुनंच॥ इदंसहस्रचंड्यां॥ तदर्धंशतचंड्यां॥ तदर्धंनवचंड्यां॥अत्रा
क्तोसर्वेभ्यस्सुवर्णः॥ ततोदानान्याचार्यादिभ्योन्येभ्योवादद्यात्॥ मंत्राः॥
विप्रसंपूज्यकपिलांगांस्वर्णश्रृंगींरौप्यखुरांताम्रपृष्ठींकांस्यदोहनांवस्त्रां

शां.र. संपूज्य कपिले सर्वभूतानां पूजनीया सिरोहिणी तीर्थदेवमया यस्मात्ततः
शांतिं प्रयच्छंतु मे इति मंत्रेण दद्यात्॥ यथा रत्नेषु सर्वेषु सर्वे देवा व्यवस्थि-
३५२ ताः॥ तथा शांतिं प्रयच्छंतु रत्नदानेन मे सुराः॥ इति नीलमणि॥ अथ श्वेता-
श्वदानं॥ विप्रं संपूज्य॥ अश्वं हेमपल्याणरौप्यकटकगजदंतवज्रनेत्रताम्र-
मयखुरक्षौमपुच्छं स्वर्णललाटपट्टं कक्षास्थानेषु घंटे वेयस्तु वस्त्रयुतं ध-
म्मरत्नोपरिस्थं कृत्वा मार्त्तंडाय शुद्धवेगाय कारुण्याय त्रिमूर्त्तये॥ जगद्दी-
पाय सूर्याय त्रिवेदाय नमो नमः इत्यमुकशर्मणे मुकशाखाध्यायिने राम
सूर्यलोकनिवासकामनया देवीप्रीतिकामनया वा इमं श्वेताश्वं तुभ्यमहं
संप्रददे न मम इत्युक्त्वा कर्णं विप्रहस्ते दत्वा मंत्रं पठेत्॥ महार्णवे समुत्प- ३५२

न्नः उच्चैःश्रवसपुत्रकामे यात्वं विप्रस्तु स्वायदत्तोहयस्सुखी भव॥ इमं विप्रान-
मस्तुभ्यमश्वं तेप्रतिपादितं॥ प्रतिगृह्णीष्व विप्रेंद्र मया दत्तं स्वश्रेष्ठमिति॥ त-
तः सुवर्णं दक्षिणां दद्यात्॥ ततः इत्यमुत्रात पात्राणां कुरु केशव मे प्रभोऽक्ष-
त्रं त्वहीतये दत्तं ब्राह्मणाय मया सहेति छत्रं॥ शंखांककरसंकाशाहिम-
डिंडिरपांडुरः॥ घोरसंसारपापघ्न इति तं चामरामरवाल्लूने ति चामरं॥ सर्वस-
स्याग्रयाभ्यामिर्वराहेण समुद्धृता॥ अनंतसस्यफलदा अतः शांतिं प्रय-
छंतु॥ यथा कृष्णस्य नारायणं यस्य सागरजा तथा॥ सस्या समाप्य श्रन्यास्तु
तथा जन्मनि जन्मनि॥ इति शय्यां॥ तृप्तिं करोति भूतानामिहलोके पर-
त्र च॥ तस्मात्प्रदीते धान्य मतः शांतिं प्रयच्छ मे इति सप्त धान्यानि दद्या-

Dr. BHAU DAJI MEMORIAL

ग्रां.र.

३५३ त॥ ततोक्षरजापकेभ्योन्येभ्यश्चदक्षिणांदद्यात्॥ ततःसर्वकलशोदकेन
सामान्येयजमानंसमुद्धृत्येद्दृइद्यौ।स्यांसुरास्त्वेत्यादिभीरागोभ्याभिषिंचेत्॥
॥ततोयजमानोनवग्रहाद्युत्तरपूजांकृत्वाविसृज्याचार्यहस्तेदत्वादेवींसं
पूज्यबलिंदद्यात्॥ तत्रक्षत्रियादिनाश्वमेषछागमहिषाणामन्यतरद्देयं॥
विप्रेणतुकूष्मांडबिल्वमिक्षवश्चदेयाः॥ यद्यादेवीद्रोणपुष्पबिल्वाम्रदलजा
तीभिःपकैःसंपूज्यउदङ्मुखःकर्त्तापूर्वमुखेदेवीमुखंवाबलिंगंधादिनाभ्य
र्च्यपशुस्त्वंबलिरूपेणममभाग्यादुपस्थितः॥ प्रणयामिततःसर्वरूपिणंब
लिरूपिणं॥ चंडिकाप्रीतिदानेनदातुरापद्विनाशनं॥ चामुंडाबलिरूपा राम
यबलेतुभ्यंनमोस्तुते॥ यज्ञार्थेबलयःसृष्टाःस्वयमेवस्वयंभुवा॥ अ ३५३

५२

तस्त्वांघातयाम्यद्यत्तेवधोवधः इत्यभिमंत्र्यऐंह्रींश्रीमितिप्रक्षिप्त्वाखड्गस्वारसना
त्वंचंडिकायाःसुरलोकप्रसाधकः॥ ह्रींह्रींखड्गआंऊंफडितिखड्गमन्यद्वाशस्त्रंसंपू
ज्य॥ ॐकालिकालियज्ञेश्वरिलोहदंडायैनमः इतिछेदयित्वाॐह्रींऐंह्रींक्लींश्रींकौं
रुधिरेणाप्यायतामितिदद्यान्निवेद्यशेषंगृहीत्वाघृतनायै० चरकीः विदार्यै० पा
पराक्षस्यैवनिवेद्यमाषपिष्टमयंशत्रुंकृत्वाखड्गेनछेदयित्वास्कंदायविशाखा
यचदत्वाबलिशेषंरक्षोभ्योहरेत्॥ मंत्रस्तु॥ ॐह्रींस्फुर२कंप२सून२तुतुर२ध
नु२मारय२विद्रावय२कंपातय२॥ कंतापय२पूरय२ॐह्रींॐहूंफट्मर्दय२ऊं
इति॥ ततःशेषेणबहिर्दद्यात्॥ तत्रमंत्र॥ बलिंगृह्णंत्विमंदेवाआदित्यावसव
स्तथा॥ मरुतोप्याश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः॥ असुरायातुधानाश्चपिशा

शां॰ र॰ चोरगराक्षसाः॥ डाकिन्योयक्षवेतालायोगिन्यः पूतनाः शिवाः जृंभकाः सिद्ध
गंधर्वामाल्याविद्याधरानगाः॥ दिक्पालालोकपालाश्चयेचविघ्नविनायकाः॥
३५४ जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः॥ माविघ्नंमाचमेपापंमासंतुपरि
पंथिनः॥ सौम्याभवंतुतृप्ताश्चभूतप्रेतसुखावहाः॥ इतिततः स्नात्वातिलकं
धृत्वाखड्गिनीशूलिनीत्येकेनश्लोकेनपाहिनोदेवीतिचतुष्टयेननमोदेव्यै
इतिपंचकेनप्रार्थयेत्॥ रूपंदेहियशोदेहिभगंभगवतिदेहिमे॥ पुत्रान्देहिधनं
देहिसर्वान्कामांश्चदेहिमे॥ महिषघ्निमहामायेचामुंडेमुंडमालिनि॥ आ
युरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते॥ ततः खड्गादिशुद्धिगोप्त्रीत्वंगृहाणास्म राम
त्कृतंजपं॥ सिद्धिर्भवतुमेदेविप्रसादात्त्वत्सुंदरीति॥ दक्षेनिवेद्यमूलेनपुष्पेणदे ३५४

९३

वीमुद्वास्यनासयाहृदिप्रविष्टांविभाव्यषडंगकृत्वाउत्तिष्ठआरम्यारमितिवि
सृज्याचार्यायदत्वामंत्रेणपठेत्॥ त्रैलोक्यमातर्देवित्वंसर्वभूतदयान्विते॥
दानेनानेनसंतुष्टासुप्रीतावरदाभवेति॥ नवरात्रेतुविशेषः॥ दशम्यांदेवीं
विसर्जयेत्ः मंत्रस्तु॥ उत्तिष्ठदेविचंडेशिशुभांपूजांप्रगृह्यच॥ कुरुष्वममक
ल्याणमष्टाभिः शक्तिभिःसहेस्तुच्छायागच्छपरंस्थानंदेस्वस्थानंदेविचंडिके॥
व्रजस्रोतोजलंवृद्ध्यैस्थीयतांचजलेविह॥ दुर्गेदेविजगन्मातःस्वस्थानंगच्छपू
जिते॥ संवत्सरेव्यतीतेतुपुनरागमनायवै॥ इमांपूजांमयादेवियथाशक्त्योप
पादितां॥ रक्षार्थंत्वंसमादायव्रजस्वस्थानमुत्तममितिजलेप्रवाहयेत्॥
ततोग्निंसंपूज्यविभूतिंधृत्वागच्छगच्छेतिविसृज्यसहस्रवक्त्रांसहस्रमस्यत्रेरा

शा. र. तद्यथा शाक्तिकवा विश्वासं नो ज्यः यस्मात्स्मृत्या प्रमादात्कुर्वतामिति जपित्वा पू
र्णतां वाचयित्वा ईश्वरार्पणं कृत्वा सुहृद्युतो भुंजीत ॥ इदमेव पूजाहोमब
३५५ ल्यादिविधानं नवरात्रे पि ज्ञेयं ॥ विस्तरो वस्तुमत्कृते निर्णयसिंधौ नवरात्रनि
र्णये ज्ञेयः ॥ ॥ इति शतचंडीसहस्रचंडीप्रयोगः ॥ ॥ यो नादतंत्रगहनार्णव
कर्णधारः शास्त्रांतरेष्वनिखिलेष्वपि मर्मवेत्ता ॥ यो त्र श्रमोस्ति विहितः क
मलाकरेण प्रीतो मुनास्तु सकृती बुधरामकृष्ण ॥ १ ॥ श्रीमन्नारायणाख्या
त्समजनि विबुधो रामकृष्णाभिधानस्तत्सूनुः सर्वविद्याबुधिनिजकुलकीका राम
रतः कंजजन्मा दृष्ट्वा नानानिबंधान्स्वपदनुतुलं ग्रंथमज्ञाकरास्मः पित्रो ३५५

पादाब्जद्वंगोरघुपतिपदयोः स्वश्रमं प्रार्पयच्च ॥ २ ॥ तर्केदुत्तर्कमेधः फणिप
तिभणितिः पाणिनीये प्रपंचे न्याये प्रायः प्रगल्भः प्रकटितपटिमा भाट्टशास्त्र
प्रपद्ये ॥ प्राभाकराये पयिमथितउरतांतः वेदांतसिंधुर्वेदे वादे वितंद्रो जगति
विजयते रामकृष्णार्यसूनुः ॥ ३ ॥ आद्यो निर्णयसिंधौ स्तु वर्त्तिके टिप्पणी प
णः ॥ काव्यप्रकाशगारख्या दानेवकमलाकरः ॥ शांतिरत्नं ततः पूर्त्तव्रत
योः कमलाकरैः ॥ ग्रंथो वेदांतरत्नं च सन्नादशाकुतूहलं ॥ प्रायश्चित्ते रत्न
मेकं व्यवहारे तथा परं ॥ बह्वृचाह्निकमन्यच्च गोत्रप्रवरदर्पणः ॥ रत्नं कर्म

विपाकाख्यं कार्त्तवीर्यस्य पद्धतिः ।। सोमप्रयोगः स्मृद्धांधमेरुद्रस्य पद्धतिः
टिप्पणीचतथाशास्त्रदीपिकालोकसंज्ञितः ।। मीमांसायांतथाशास्त्रत
 त्वस्यकमलाकरः सर्वतीर्थविधिश्चैवभक्तिरत्नंतथोत्तमं ।। रामकृष्ण
सुतेनेत्थंकमलाकरशर्मणा ।। अधिकाविंशतीनांचग्रंथानांरत्नमालि
का ।। सेवांकर्तुमिहाक्लेनत्यर्पितारामपादयोः ।। ।।इतिग्रंथरत्नमा
लः ।। ।।इतिश्रीमत्सदवाक्यप्रमाणपारीणरामेश्वरभट्टसूरिसुत
नारायणभट्टसुतमीमांसकरामकृष्णभट्टात्मजकमलाकरभट्टकृतं

शांतिरत्नाकरग्रंथसंपूर्णम् ।। ।। शुभंभवतु ।। ।।कल्याणमस्तु ।।
श्रीकृष्णायनमः ।। ।।श्रीरामचंद्रायनमः ।। ।।श्री ।। ।।
श्री ।। ।।श्री ।। ।।श्री ।। ।।श्री ।। ।।श्री ।। ।।श्री ।।

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ग्रो·र·
३५७

DR. BHAU DAJI
डाक्टर भाऊ दाजी इत्यस्य स्मारकम्
MEMORIAL

राम
३५७